७४
५२८८

योगीन्द्रग्रन्थमालायाः श्रीरामानन्दवेदान्तविषयकं
पञ्चमं पुष्पम्

॥ सर्वेश्वराय श्रीसाकेतविहारिणे नमः ॥
ानत्रयानन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्याय नमः ।
च्छिरोमणिमहामहोपाध्यायश्रीवाचस्पतिमिश्रविरचितः ॥

खण्डनोद्धारः

स च दीपिकाख्यव्याख्यया समलङ्कृतः

तत्र श्री ..... आचार्य श्री,
विद्यापीठ सम्मान श्री रामानन्द पीठ श्री शेष मठेन
सम्पादनी कृतमिदम्
दि. १९

दीपिकाकारः—
श्रीशेषमठ (शींगडा) श्रीरामानन्दपीठाध
जगद्गुरु त्रिदण्डी श्री रामप्रपन्नाचार्यजी

७४
तत्र श्री त्रिभुवन विश्वविद्यालय
वेदान्त
आचार्य श्री,
त्रिदण्डी सस्थान श्री रामानन्द पीठ श्री शेष मठेन.
समुपाधनी कृतमिदम्
दि. २७.७.१९७४

क्र. ५२७८)

वेदान्त आं.

मूल्यांक १३/-

योगीन्द्रग्रन्थमालायाः श्रीरामानन्दवेदान्तविषयकं

पञ्चमं पुष्पम्

सर्वेश्वराय श्रीसाकेतविहारिणे नमः ।

प्रस्थानत्रयानन्दभाष्यकारजगद्गुरुश्रीरामनन्दाचार्याय नमः ।

विद्वच्छिरोमणिमहामहोपाध्यायश्रीवाचस्पतिमिश्रविरचितः

खण्डनोद्धारः

स च दीपिकाख्यव्याख्यया समलङ्कृतः

दीपिकाकारः—

शेषमठ (शींगड़ा) श्रीरामानन्दपीठाधीश

जगद्गुरु त्रिदण्डी श्रीरामाप्रपन्नाचार्य योगिराज

प्रकाशकः—

स्वामी श्रीरामेश्वरानन्दाचार्य सा, र. व्या. रामानन्दवेदान्ताचार्य

श्रीरामानन्दपीठ (शेषमठ)

विश्रामद्वारका—शींगड़ा

पोरबन्दर (सौराष्ट्र)

मूल्य—{ राजसंस्करण १५।००
साधारणसंकरण १३।००

प्रति—१०००

सन्—१९७३ ई.

सर्वाधिकार सुरक्षित

खण्डनोद्धारदीपिका का मुद्रणस्थल :—

मातृभूमि प्रिंटिंगप्रेस—जयपुर

सामयिकनिवेदनादि का मुद्रणस्थल :—

श्रीरामानन्द प्रिन्टिंग प्रेस कांकरियारोड अहमदाबाद—२२

तत्र श्री त्रिभुवन विश्वविद्यालय
... ...

समन्वयवाद की युक्तियों से अन्यथाख्याति की विवेचना सुनकर मिश्रजीने आचार्यचरण को शरणागति स्वीकार करके आचार्याज्ञा शिरोधार्य कर धर्मप्रचारार्थ पूर्वदिशा में प्रस्थित हुए थे।

प्रस्तुत ग्रन्थ सन् १९०९ ई. में काशीस्थ मेडिकलहाल प्रेसमें मुद्रित हुआ था, इसकी अन्य प्रति हमें प्राप्त न हो सकी। आदर्शपुस्तक श्रीरामानन्दसम्प्रदाय के तात्त्विक विद्वान् तीन सौ से अधिक साम्प्रदायिक दिव्य प्रबन्धों के रचयिता अभिनववाचस्पति पण्डितसम्राट् स्वामी श्रीवैष्णवाचार्य जी वेदान्तपीठाधीशके पुस्तकालय में थी। वहाँ से ले कर पढ़ा किन्तु सामान्य जनों के लिए दुर्बोध होने से यत्र तत्र समझने में कठिनाई प्रतीत हुई। अतः महर्षिकल्प वीतराग प्रातःस्मरणीय जगद्गुरु श्रीयोगिराज जी से सर्वजनोपयोगी टीका से अनुगृहीत करने की प्रार्थना की। अनेक सत्प्रवृत्तिओं में लगे रहने के कारण समयाभाव होने पर भी मेरी प्रार्थना को स्वीकार कर आपश्रीने अनतिविस्तृत विवेचनापूर्ण सर्वजनसुलभ राष्ट्रभाषा से अलंकृत कर देने की कृपा की। इसी महाप्रसाद को यथाबुद्धिवैभव सम्पादित कर आप सब के समक्ष हम रख रहे हैं। इस प्रसंग में श्री आचार्यपदासीन मठ के विषय में कुछ कहा जाय उसे अप्रासंगिक न समझकर अति संक्षिप्त विवरण दे रहे हैं—

श्रीरामानन्दसम्प्रदाय

सम्प्रदानं सम्प्रदायः सम्–प्र पूर्वक दा धातु से भावे ३।३।१८ से घञ् प्रत्यय तथा आतोयुक् चिण्कृतोः ७।३।३३ से

युगागम करने पर सम्प्रदाय शब्दको सिद्धि होती है। जिसको गुरु परम्परागत परम्पराप्राप्त 'सिद्धान्त' या 'ज्ञान' परम्पराप्राप्त शिक्षा आदि अनेक अर्थ होते हैं।

जो कि एक वैदिक परम्परा का प्रतिनिधित्व करनेवाला व्यापक शब्द है पर क्षुद्र स्वार्थ के दास बने, कितने हो इस व्यापक अर्थ को न समझने वाले व्यक्तियों के द्वारा पारस्परिक द्वेष कलह वैमनस्यको उभारने के लिये इस शब्द का प्रयोग किया जा रहा है। जो धर्मप्राण भारतीयों के लिये प्राणघातक सिद्ध हो सकता है।

अस्तु यहाँ पर उस प्राचीन वैदिक व ऋषिपरम्परा के सदुपदेश अर्थ में ही इस शब्द का प्रयोग किया जा रहा है। जिसके सन्दर्भमें अटक से कटक तक सेतु से शीताचल पर्वत तक अक्षुण्ण रूप से प्रतिष्ठापूर्वक "गेहे गेहे जने जने" फैले हुए श्री रामानन्दसम्प्रदाय का अतिसंक्षिप्त विवरण हम प्रस्तुत कर रहे हैं।

इस सम्प्रदाय की परम्परा श्री मैथिलीमहोपनिषद में इस प्रकार है—

"इदमेव मनुं पूर्वं साकेतपतिर्मामवोचद्। अहं हनुमते मम प्रियाय प्रियतराय। स पराशराय, स व्यासाय स शुकाय।"

इस सम्प्रदायकी परम्परा साकेताधिपति मर्यादापुरुषोत्तम सर्वेश्वर श्री रामचन्द्रजी से प्रारम्भ होती है। भगवान् श्री रामचन्द्र जी ने षडक्षर तारक महामंत्रराज को स्वानन्यस्वरूप श्री सीताजी को प्रदान किया। परम करुणाशील श्री भूमिजा ने अपने अत्यन्त

प्रिय सेवक श्री हनुमान्‌जी को प्रदान किया। महाबली श्रीहनुमानजी ने ब्रह्माजी को प्रदान किया। इस प्रकार भूमण्डल तक अद्यावधि प्रचलित रहा है जिसका वर्णन अगस्त्य, वाल्मीकि और वसिष्ठादि संहिताओं में प्राप्त होता है।

उक्त संहितोक्त परम्परा को आनन्दभाष्यकार जगद्गुरु श्री रामानन्दाचार्यजीने गीता के स्वानन्दभाष्य में इस प्रकार स्मरण किया है-

श्रीरामं जनकात्मजामनिलजं वेधोवसिष्ठावृषी
योगीशं च पराशरं श्रुतिविदं व्यासं जिताक्षं शुकम्।
श्रीमन्तं पुरुषोत्तमं गुणनिधिं गंगाधराद्यान् यतीन्
श्रीमद्राघवदेशिकं च वरदं स्वाचार्यवर्यं श्रये ॥

इससे यह विदित हुआ कि-रामानन्दः स्वयं रामः प्रादुर्भूतो महीतले। इस वैश्वानरसंहितावचन के प्रामाण्य से यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। (गीता) "जब जब होइ धर्मकी हानी। बाढइं विविध असुर अभिमानी। तब तब धरि प्रभु विविध शरीरा" इत्यादि स्वप्रतिज्ञानुस्मरण कर परम कारूणीक भगवान् साकेतनिलय जगदाचार्य श्रीरामानन्दाचार्यजीके स्वरूपमें, तीर्थराज, प्रयागमें १३५६, वि. सं. में अवतरित हुए। जो कि भारतीय संस्कृति के लिये धर्म की कसौटीका आपत्तिग्रस्त काल था। उस समय मुसलमान शासकों का बोलबाला था हिन्दुओंका भविष्य गाढ़ अंधकारमय था। सितारे हिन्द राजाजी शिवप्रसादजी के शब्दों में कहें तो

"छोटे छोटे हिन्दु बच्चे दो दो चार चार पैसेमें बेचे गये थे, और लड़किया व स्त्रियां लौण्डियाँ बनायी जाती थीं।" अर्थात् धर्म परिवर्तन का अस्वीकार करनेवालों को निर्दयतापूर्वक कतल कर देना एक सामान्य बात हो गयी थी। इसी विषम अवस्थामें आचार्यश्रीने हिन्दु-मात्र का क्या मनुष्य मात्र का हृदय परिवर्तन कर अपने अभूतपूर्व तपोबल योगशक्ति की अनेक चमत्कारिक घटनाओं द्वारा सन्मार्गमें अग्रेसर किया है।

वह समय मुसलमान प्रशासक तुगलकका अन्तिमप्राय था, तलवारके बलपर धर्मपरिवर्तन कराकर मुसलमान बनाये गये व्यक्तिको आध्यात्मिक शक्तिका जादू फेंक कर बातों बातोंमें धर्मपरिवर्तित सारे भारत वासियो को स्वधर्ममें दीक्षित करना, समर्थ जगदाचार्य श्रीरामा-नन्दाचार्यजीका ही काम था। उनका आध्यात्मिक शंखनाद भारत-वर्षके कोने कोने तक गूँज उठा। और उनके द्वारा प्रवाहित भक्ति भागीरथी के शीतल कणोंने जनान्तःकरण को निर्मल कर प्रभुपदपथिक बना दिया। इसी समन्वित कार्यमें आचा-र्यचरणने "अपि चेत् सुदुराचारो भजते मामनन्यभाक्।" "स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्" ॥ इत्यादि दिव्यवाणी द्वारा दुन्दुभिनाद करनेवाले भगवत्पादीय सिद्धान्त को लक्ष्य में रखकर काम लिया। इसीका परिणाम था कि रैदास कबीर आदि अनेक सिद्ध उनके चरण के अनन्य सेवक बनके जनसेवामें तल्लीन रहे। जो एक सूत्रमें आबद्ध होकर भारत स्वातन्त्र्य का बीजवपन करनेमें समर्थ हुये। इसी संगठनशक्ति का परिणाम था कि **"श्रीरघुपति राघव**

राजाराम पतित पावन सीताराम" के दुन्दुभि घोष के साथ एक मात्र श्रीरामनाममहा-अस्त्र के बल से महात्मागांधी जी भारत को स्वतन्त्र करानेमें सक्षम हुये। यानी जगद्गुरु श्रीरामानन्दाचार्यजीने समाज से उपेक्षित रैदास-कबीर-धना आदि विभिन्न वर्गों के लोगो को संगठित कर जो एक रूपताका आदर्श स्थिर किया था उसी आदर्श को श्रीगांधीजीने भी अपना आदर्श बनाया। परिणाम स्वरूप समस्त भारतीय जनसमुदाय एक सूत्रमें बंध गया जिसका फल स्वातन्त्र्य के रूपमें आगे आया।

आचार्यचरणने भक्तिमार्गको जो सर्वजनसुलभ बना दिया था वह मात्र उनके मस्तिष्ककी उपज नहीं है। उन्होंने महर्षि बोधायन श्रीपुरुषोत्तमाचार्यजीके

'रामो ब्रह्म परात्परं श्रुतिमतं भक्त्यैव निःश्रेयसम्।'

इत्यादि श्री सदानन्दाचार्यजी आदि अनेक पूर्वाचार्यों के प्रबन्धों से प्रतिपादित भक्तिमार्गका ही विशद प्रचार किया हैं। जगद्गुरु श्री रामानन्दाचार्य जीके द्वारा इन्हीं पूर्वाचार्यों से प्रवर्तित श्री सम्प्रदाय ही विशदरूप प्राप्त करने के कारण से श्रीरामानन्दसम्प्रदायके नामसे व्यवहृत होने लगा अर्थात् आपने किसी नूतन सम्प्रदाय का प्रवर्तन नहीं किया किन्तु ब्रह्मसूत्रवृत्तिकार भगवान् श्रीपुरुषोत्तमाचार्यजी बोधायन तथा उनके पश्चात्वर्त्ती अन्याचार्योंने जो सनातनमार्ग दर्शाया था उसीका विशद प्रचार भगवान् श्रीरामानन्दाचार्य जी ने किया है।

इन्हीं दार्शनिक सिद्धान्तोंके स्थायित्व प्रदान करने के लिये आचार्य श्रीने प्रस्थानत्रय पर आनन्दभाष्य किये हैं। उन भाष्योंका

मत विशिष्टाद्वैत है। आचार्यपादने विशिष्टाद्वैत मत को ही ब्रह्म-मीमांसा-अभिमत रूपसे स्वीकारा है क्योंकि यह मत ही श्रुतिस्मृति इतिहास पुराणादि सम्मत तथा युक्तियुक्त सिद्धान्त है। इसीलिये तो आचार्यश्रीने अथातो ब्रह्मजिज्ञासा सूत्र के व्याख्यानमें "एवं चाखिल श्रुतिस्मृतीतिहासपुराणसामञ्जस्यादुपपत्तिबलाच्च विशिष्टाद्वैतमेवास्य ब्रह्ममीमांसाशास्त्रस्य विषयो न तु कवलाद्वैतम्'। (ब्रह्मसूत्रआनन्दभाष्य १।१।१) कहा है।

विशिष्टाद्वैत शब्दकी व्युत्पत्ति द्वयोर्भावो द्विता द्वितैवेति द्वैतम् न द्वैतमित्यद्वैतम्, विशिष्टञ्च विशिष्टञ्च विशिष्टे विशिष्टयोरद्वैतं विशिष्टाद्वैतम् इस प्रकारकी जाती है। प्रथम विशिष्टशब्दसे कारण-ब्रह्म तथा द्वितीय विशिष्ट शब्दसे कार्यब्रह्म का ग्रहण होता है अतः विशिष्टाद्वैतशब्द का अर्थ हुआ कार्य और कारण ब्रह्म की एकता।

आचार्यपादके मतसे ब्रह्मशब्दवाच्य अनन्त कारुणीक सर्वेश्वर भगवान् श्री रामचन्द्रजी हैं। इस विषयमें आपने इन शब्दों से अपना मत व्यक्त किया है। "ब्रह्म शब्दश्च महापुरुषादिपदवेदनीयनिरस्तनिखिलदोषनिरवधिकातिशयासंख्येयकल्याणगुणगणं भगवन्तम् श्रीराममाह। सामान्यवाचकानां पदानां विशेषे पर्यवसानात्' ब्रह्मसूत्र का आनन्दभाष्य १।१।१ "एवञ्च सर्वेशसर्वशक्तिमज्जगत्कारणनिर्गुणसगुणादिपदवाच्यं श्रीरामतत्त्वं तदेव जगत्कारणं ब्रह्मेत्युच्यते, अनेन सूत्रेण (आ. भा. १।१।२)

आचार्य के मत में सकल ब्रह्मविद्याशास्त्रका पर्यवसान सगुण ब्रह्ममें होता है निर्गुणमें नहीं। श्रुतियों में आये हुए निर्गुण शब्दकी व्याख्या 'परास्य शक्तिर्विविधैव श्रूयते' इत्यादि श्रुति तथा "सत्वादयो न सन्तीशे यत्र च प्राकृता गुणाः। स शुद्धः सर्वशुद्धेभ्यः पुमानाद्यः प्रसीदतु॥ योऽसौ निर्गुणः प्रोक्तः शास्त्रेषु जगदीश्वरः। प्राकृतैर्हेयसत्वाद्यैर्गुणैर्हीनत्वमुच्यते॥" (वि. पु.) आदि वाक्यों को लक्ष्यमें रखकर निकृष्टगुणराहित्यमेव निर्गुणत्वम् (आ. भा. १।१।२) कहा है।

श्रीसम्प्रदाय की खास विशेषताओंमें सद्योमुक्त्यभाव अन्यतम है। इस सिद्धान्तमें ज्ञानी जनोंको सद्योमुक्ति नहीं होती है प्रत्युत क्रममुक्ति ही होती है। इस विषय को भाष्यकारने ब्रह्मसन् ब्रह्माप्येति आदि श्रुतियों का ब्रह्मसदृशः सन् ऐसा विवेचन करते हुए ४।२।६ सूत्रके व्याख्यानमे विशदरूपसे प्रतिपादित किया है विस्तार भयसे दिङ्मात्र निदर्शन किया है।

सर्वजनोंके लिये मुक्ति के साधनरूपसे "न जाति भेदं न कुलं न लिङ्गं न गुणक्रिया न देशकालौ नावस्थां न योगो ह्ययमेपक्षते। (भार. सं.) रामदीनोऽनुकूलोऽहं विश्वस्तोऽप्रातिकूल्यवान् त्वयि न्यस्यामि चात्मानं पाहि मां पुरुषोत्तम॥ (पु. प्र.) आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनन्। रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा॥ आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः। (अ. बु. सं.) इत्यादि शास्त्रप्रमाणों से भक्ति तथा भगवच्छरणागति ही मानी गई हैं।

शरणागति प्रार्थना को ही आचार्य प्रवरने प्रपत्ति माना है। सेयमुपायत्वप्रार्थनैव प्रपत्तिः (गो. आ. भा. १८-६६) दोनों

(भक्ति–प्रपत्ति) ही जीवात्माओं को भगवत्सान्निध्य प्राप्त कराने में समान रूप से स्वीकृत हैं, फिर भी इन दोनों योगोंमें अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् । यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥ इस भगवदुक्ति से भक्तियोग में अन्तिम काल तक स्मृति की अपेक्षा रहती है पर

"सकृदेव प्रपन्नाय तवास्मीति च याचते
अभयं सार्वभूतेभ्यो ददाम्येतद् व्रतं मम । (वा. रा.)

इस श्री भगवत्पादीय वचनप्रमाण से एक वार भगवच्छरणापन्न होनेसे 'साध्यभक्तिस्तु सा हन्त्री प्रारब्धस्यापि भूयसी ।' इस वचन प्रमाण से प्रारब्ध कर्मों का भी प्रपत्तियोग द्वारा नाश होना सिद्ध है।

तथा स्थिरे मनसि सुस्वस्थे शरीरे सति यो नरः ।
धातुसाम्ये स्थिरे स्मर्त्ता विश्वरूपञ्च मामजम् ॥
ततस्ते म्रियमाणन्तु काष्ठपाषाणसन्निभम् ।
अहं स्मरामि मद्भक्तं नयामि परमां गतिम् ॥

इस भगवदुक्ति से अन्तिम स्मृति की अपेक्षा प्रपन्नजीवात्माओं को नहीं रहती है। स्वतः भगवान् ही उस भक्त का स्मरण कर स्वधाम ले जाते हैं। यही भक्ति योग की अपेक्षा प्रपत्ति योग की विशेषता है। जिसको विशद रूप से गीता १८–६६ के भाष्य में वर्णन किया गया है। यहां लेखकायवृद्धिभय से निदर्शन मात्र किया गया है।

इस संप्रदायके आचार्य प्रवरोंने कर्म को भक्ति योग का अंग माना है। तथा जगत् का अभिन्ननिमित्तोपादन कारण ब्रह्म को ही

माना है। जीवोंका परस्पर में एकत्व मानने में गुरु शिष्य, पिता पुत्र जन्म मृत्यु आदि व्यवहारों में बाध तथा श्रुति स्मृति विरोध होता है अतः परस्पर में जीवों का भेद तथा नानात्व स्वीकार किया हैं।

अत एव "बालाग्रशतभागस्य शतधा कल्पितस्य च" आदि श्रुति–प्रामाण्य से जीवों के स्वरूपतः अणुत्व, कर्तृत्व भोक्तृत्व ज्ञातृत्व तथा नित्यत्वादि धर्म स्वीकार किए गए हैं।

संक्षेपतः श्री रामानन्दसम्प्रदाय का यही विवरण है। विशेष जिज्ञासुओं को आचार्य प्रणीत भाष्यग्रन्थावलोकन करना चाहिये।

विश्रामद्वारकाः–

श्री शेषमठ–तथा श्री कोसलेन्द्र मठ का

संक्षिप्त परिचय।

मध्ये मार्गपरिश्रान्तो विश्रामं प्राप्य श्रृङ्गिणः।
आश्रमे परमारामे कृष्णो वचनमब्रवीत् ॥१॥
त्वया संस्थापितां मूर्त्तिं विश्रामद्वारकापते!।
अदृष्ट्वा द्वारका–यात्रा नराणां निष्फला भवेत् ॥२॥
यथा व्यासमनालोक्य काशीयात्रा हि निष्फला
तथैव द्वारकायात्रा ऋतेऽत्राऽऽगमनाद् भवेत् ॥३॥

इन पौराणिक श्लोकों के द्वारा वर्णित विश्राम–द्वारका जो कि वर्तमान में **'श्री शेषमठ'** नाम से प्रसिद्ध है, लीला पुरुषोत्तम भगवान् श्री कृष्णचन्द्रजी के बालमित्र प्रसिद्ध संत श्री सुदामाजी की

पुरी से (पोरबन्दर आधुनिक नाम) लगभग ३२ किलोमीटर उत्तर द्वारका धाम जाते समय प्रधान रास्ते पर ही कमण्डलु तथा वर्तु नदी के किनारे पर स्थित है।

जो कि प्राचीन समय में शृङ्गि ऋषी को आवास स्थली होने से शृङ्गपुर नाम (अपभ्रंश आधुनिक शींगडा नाम) से परिचित है। उक्त श्लोकों के अनुसंधान में यों मालूम होता है कि लोक-सर्जक भगवान् श्री कृष्ण जब द्वारका पुरी में विराजमान थे, तब उनके दर्शनाथ शृङ्गीऋषि द्वारका पधार रहे थे। उसी समय इसी स्थल पर विश्राम किया और भगवान् शंकरजी की उन्होंने स्थापना की जो 'शृङ्गेश्वर महादेव' के नाम से इस समय भी मौजूद हैं। इसी अवसर पर ऋषीश्वर की आराधना से प्रसन्न होकर भगवान् यह वरदान देते गये कि जिस प्रकार व्यासेश्वर के दर्शन बिना काशी श्री विश्वनाथजी का दर्शन निष्फल हो जाता है उसी प्रकार आपके द्वारा समाराधित मेरी सौम्य मूर्ति के दर्शन किये बिना द्वारका यात्रा निष्फल हो जायेगी। इसी भगवद्वरदान को ध्यान में रखकर शृंगी ऋषी जी ने जिस भगवत् श्रीविग्रह की स्थापना की वह आज भी विद्यमान हैं।

शीशोदियां वंशजरत्न-राणा
दृदाररूयडोसात्मजबन्धुवर्गैः
श्रीनन्दरामाख्यगुरुं महान्तं
मत्वाऽर्पितो ग्राम सुशींगडाख्यः ॥

किञ्चः—

श्रीमन्मेहरवंशशेखरमणिर्दूधाख्यडोसात्मजः
सप्तग्रामजनाः सुपञ्चपरिषन्मुख्या मिलित्वा समे
श्रीगोपालकलाल–पूजनकृते श्री नन्दरामाभिधं
बाबाऽऽख्यं परिपूज्य संवसथकं श्रीशींगड़ाख्यं ददुः॥

आगे चलकर उस प्रान्त में रहने वाले मेहर जाति के लोगों ने उस स्थान के परितः स्थित जमीन भगवान की अराधना के लिये समर्पित कर दी। जो आधुनिक शब्दों में "शींगड़ा स्टेट' कहलाने लगा। वर्तमान मन्दिर एक सुभव्य राजमहल के सदृश पक्के पत्थरों से बना हुआ विरामदुर्ग की याद दिलाता है। जो प्राचीन भारतीय संस्कृति को अपने गहन गह्वरों में लेकर प्राणी मात्र को शान्ति और समृद्धि का संदेश दे रहा है।

अघटित घटना पटीयस भगवान् श्री कृष्णचन्द्रजी का काल-चक्र ने करवट लिया उनके परम भक्त ऋषीश्वर के द्वारा संस्थापित इस आश्रम को हलचल कुछ दिन के लिये गुप्त हो गयी। जो कि एक समय में सारे विश्वको "संगच्छद्ध्वम् संवदध्वम् सम्वो मनांसि जानताम्" मधुव्वा वा ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। मधुमत्पार्थिवं रजः। सर्वे हि सुखिनः सन्तु सर्वे सन्तु निरामयाः। इत्यादि सन्देश द्वारा सचेत करता था।

इस मठ की शुभ्र कीर्तिपताका पुनः तब फहराने लगीं जब दिः २६–४–१९३१ ई० को श्री सम्प्रदायोद्धारक जगद्विजयी महा-

महोपाध्याय स्वामी श्री रघुवराचार्य वेदान्त केशरी इस ऋषि-आश्रम के पूर्वाआचार्यपीठमें पीठाधिपति हुए।

श्रीवेदान्तकेशरीजी दि. २६-४-१९३१ को श्री रघुवर-संस्कृतमहाविद्यालय के समुद्घाटन के साथ लगभग २० वीस वर्ष तक विविध प्रदेशों से अनेक शास्त्र अभ्यासार्थ समागत अनेक छात्रों को समुचित व्यवस्था के साथ नाना शास्त्राभ्यास कराते हुए विराजमान रहे।

आपने अनेक ग्रन्थों के संशोधनकार्यातिरिक्त अनेक पारिष्कारिक दार्शनिकग्रन्थों का प्रणयन भी किया जो महर्षि श्री पुरुषोत्तमाचार्यबोधायनप्रवर्तित जगद्गुरु श्री रामानन्दाचार्यजी द्वारा स्वीकृत विशिष्टाद्वैत मत के परम पोषक हैं। जिनमें से प्रधान ये हैं:-

(१) ब्रह्मसूत्रीय वेदान्तवृत्ति (२) वेदार्थरक्षा (३) श्रीमद् भगवद्गीतार्थचन्द्रिका (४) मन्त्रराजमीमांसा (५) वैष्णवमताब्जभास्करभाष्य। आपके हिन्दी तथा गुजराती-भाषा में भी अनेक ग्रन्थ उपलब्ध हैं। सारे भारतवर्ष में सदाचार्यों द्वारा प्रवर्तित अनादि वैदिक विशिष्टाद्वैत सिद्धान्तानुमोदित सद्धर्म का उपदेश करते हुए आप ऐहिक लीला को वसन्त पंचमी (वि. सं. २००७) को समाप्त कर साकेत धाम पधारे। आप अपने समयके अद्वितीय दार्शनिक विद्वान् सदुपदेशक असाधारण वक्ता व शास्त्रार्थी विद्वान् थे। जो उनके परिष्कारित अनेक ग्रन्थों से स्पष्ट ज्ञात होता है।

साकेतनिवासी महामहोपाध्यायजी के द्वारा सुशोभित आचार्य-पीठ पर तर्क वेदान्त योगादि शास्त्रों में पारंगत योगिराज जगद्गुरु स्वामी श्री रामप्रपन्नाचार्यजी दर्शनकेशरी दि, २०–११–१९५२ ई. को आसीन हुए ।

परम वीतराग श्री योगिराज का जन्म त्रिभुवन पावनी गङ्गा तथा भूतभावन भगवान् श्री शंकरजी द्वारा समुपसेवित पुण्यनगरी वाराणसी में वि. सं. १९४९ चैत्र शुक्ल श्री रामनवमी को हुआ था । वे बाल्यकाल से ही भगवान श्री साकेतविहारीजी के परमोपासक थे अतः माता पिता दोनों के ही भगवद्धाम प्राप्त करने के बाद स्वमार्ग प्रशस्त हो जाने से एहिक बन्धन रूप बन्धनों को छोड़ कर अनेक तीर्थाटन करते हुए महामहोपाध्याय स्वामी श्री रघुवराचार्य वेदान्तकेशरीजी की शरण में आये और आचार्यप्रवरका अनुग्रह प्राप्त कर भगवत्प्रपन्न हुए ।

आचार्य प्रवर तथा अन्यान्य विद्वानों के सान्निध्य में रहकर आपने अनेक शास्त्रों में पारंगतता प्राप्त की । ऐहिक भोगसाधनों को भगवच्छरणापन्नता में बाधक अनुभव कर लौकिक लज्जा तथा शरीररक्षा के साधन "कौपीनं युगलं वासं कन्था शीतनिवारिणी" के आदर्श को चरितार्थ करते हुए टाटाम्बर (टाट) तथा शरीररक्षण-साधन कन्द मूल फल गोदुग्ध मात्र का सेवन करते हुए राजयोग मार्ग से परमपथ के पथिक बनने लगे ।

स्वाधीत सुरभारती का विशद प्रचार हो इस दृष्टिसे आचार्य-चरण द्वारा संस्थापित श्रीरघुवरसंस्कृतमहाविद्यालय की उत्तरोत्तर वृद्धि तथा सुदामापुरीस्थ 'श्रीजानकीमठ' का सपादलक्ष रुपये व्यय कर जीर्णोद्धार तथा सुभव्यशिखरदार मन्दिर बनवाकर श्री अवधविहारीजी (श्री सीतारामजी) की प्राणप्रतिष्ठा २५।३।१९६०ई० श्री रामनवमी के दिन बड़े समारोह के साथ करवाई। जहाँ द्वारका यात्रा के लिये संत महात्मा विद्वान् व दर्शनार्थियों के लिये निवासादि की समुचित व्यवस्था है।

श्री योगीराजजीने भौतिक वातावरण की प्रबलता से दलितमानवमात्र के स्वान्तःदुःखको धर्म–प्रचार सदुपदेशादि कार्यद्वारा उपशान्ति के लिये गुजरात–प्रदेश के पाटनगर अहमदाबाद के पश्चिम भागमें श्री मरीचि महर्षिके तपसे पूत पुण्यभूमि साभ्रमती (सावरमती) के किनारे पर विविध उद्देश्यों से प्रेरित 'श्रीकोसलेन्द्र-मठ' नामक संस्था की सन् १९६१ ई० में स्थापना की।

मठ की मुख्य प्रवृत्तियाँ निम्नलिखित हैं—

१. प्रवचन–नित्यप्रति सायंकालमें विविध शास्त्रनिष्णात आचार्यों धर्मोपदेशकों द्वारा वेद उपनिषद् गीता रामायण भागवतादि के प्रवचनों द्वारा सनातन धर्म का प्रचार।

२. सुरभारती (संस्कृतवाङ्मय) के प्रचारार्थ मठ द्वारा संचालित श्रीरघुवररामानन्दवेदान्तमहाविद्यालयमें वेद उपनिषद न्याय व्याकरण वेदान्त साहित्यादि के अध्ययन–अध्यापनकी समुचित

व्यवस्था है। जहाँ उच्च कोटि के विद्वानों के द्वारा प्रदत्त सुरभारती-शिक्षाको गुजरात विहार आसाम उत्तरप्रदेश उड़ीसादि विविध प्रान्त व नेपालादि देशोंके छात्र नाना विषयों में प्राप्त कर रहे हैं। संस्कृत-अध्ययन करने वाले समस्त छात्रों की भोजनाच्छादन निवास पुस्तक-शुल्क वृत्त्यादि की व्यवस्था मठ द्वारा को जाती है। संस्कृत मैट्रिक-आई. ए. बी. ए. एम. ए. व रिसर्चवाले अन्य छात्र भी इस महा-विद्यालय से लाभ उठाते रहते हैं।

१ किसी सेठ साहुकार व्यक्ति से किसी प्रकार की सहायता लिए विना ही निजी व्यय से लगभग दो लाख रुपये लगाकर—

श्री योगिराज जी द्वारा संचलित उभयस्थानों (श्री शेषमठ तथा श्रीकोसलेन्द्रमठ) की अध्ययन अध्यापन संचालनादि प्रणाली को देखकर सहजमें ही प्राचीन गुरुकुलपरम्परा याद आ जाती है।

३. अष्टांग योग—साधना द्वारा ऐहिक (स्वास्थ्य) तथा आमुष्मिक लक्ष्य की प्राप्ति।

४. गौशाला—गौसंवर्धन—संरक्षणादि के द्वारा भारतीय संस्कृति के साथ जनस्वास्थ्य की रक्षा।

५. देशी औषधोपचार द्वारा जन स्वास्थ्य लाभादि

संक्षेप में इन मठों का यही इतिवृत्त है।

उपर्युक्त सारी प्रवृत्तियों में रात्रिदिन लगे रहते हुए भी पूज्य श्री योगिराज जी योगमार्ग द्वारा श्रीसाकेतविहारीजी के चरण-

कमलों से निस्यन्दित मकरन्दानुपान करते रहते हैं। इतना ही नहीं, दि. २८–३–६९ से दि. १२–४–६९ तक के दीर्घकाल पर्यन्त समाधिस्थ भी रह चुके है। इन प्रवृत्तियों के साथ साथ आप विविध दार्शनिक ग्रन्थों में अनेक टीका ग्रन्थों के प्रणयन द्वारा भारतीय सेवामें संलग्न रहते हैं।

जिनमें से प्रधान ग्रन्थ ये हैं :—

१. नव्यन्याय जागदीशी व्याधिकरण के ऊपर विशद विवेचना पूर्वक सारगर्भित दीपिका टीका संस्कृत में। २. श्री वैष्णवमताब्ज-भाष्यकरभाष्य की टीका संस्कृत में। ३. सिद्धान्तदीपक विवरण संस्कृत में। ४. ब्रह्मसूत्रानन्दभाष्य की टीका (अप्रकाशित) ५. उपनिषदानन्दभाष्यका भाष्यपरिष्कार (अप्रकाशित) योगसूत्रविवरण (अप्रकाशित) तत्वत्रयसिद्धि आदि तथा खण्डनोद्धारदीपिका टीका हिन्दी। आप जिन मठों का संचालन कर रहे हैं वे श्रीरामानन्द–सम्प्रदाय के ३७ द्वारों में अन्यतम जगद्गुरु श्रीअनुभवानन्दाचार्यजी के द्वारे के मठ हैं। जिनकी परम्परा इस प्रकार है :–

आचार्य-परम्परा

१ सर्वावतारी सर्वेश्वर भगवान् श्रीराम जी।

२ सर्वेश्वरी भगवती श्रीसीता जी।

३ श्री हनुमान्‌जी। ४ श्री ब्रह्माजी। ५ श्री वसिष्ठजी।

६ श्री पराशरजी। ७ श्री व्यासजी ८ श्री शुकदेवजी।

९ श्री पुरुषोत्तमाचार्यजी (बोधायन) १० श्री गंगाधराचार्यजी
११ श्री सदानन्दाचार्यजी। १२ श्री रामेश्वरानन्दाचार्यजी।
१३ श्री द्वारानन्दाचार्यजी। १४ श्री देवानन्दाचार्यजी।
१५ श्री श्यामानन्दाचार्यजी। १६ श्री श्रुतानन्दाचार्यजी।
१७ श्री चिदानन्दाचार्यजी। १८ श्री पूर्णानन्दाचार्यजी।
१९ श्री श्रियानन्दाचार्यजी। २० श्री हर्यानन्दाचार्यजी।
२१ आचार्यसार्वभौम श्री राघवानन्दाचार्य जी।
२२ प्रस्थानत्रयानन्दभाष्यकार जगद्गुरु श्री रामानन्दाचार्यजी।
२३ ,, श्री भावानन्दाचार्यजी।
२४ ,, श्री अनुभवानन्दाचार्यजी।
२५ ,, श्री विरजानन्दाचार्यजी।
२६ ,, श्री आशारामाचार्यजी। (श्री हाथीरामजी)
२७ ,, श्री रामभद्राचार्यजी।
२८ ,, श्री रघुनाथाचार्यजी।
२९ ,, श्री विश्वम्भराचार्यजी।
३० ,, श्री राघवेन्द्राचार्यजी।
३१ ,, श्री वैदेहीवल्लभाचार्यजी।
३२ ,, श्री कोसलेन्द्राचार्यजी।
३३ ,, श्री रामकिशोराचार्यजी।
३४ ,, श्री जानकीनिवासाचार्यजी।

३५ ,, श्री साकेतनिवासाचार्यजी ।

३६ ,, श्री जानकीजीवनाचार्यजी ।

३७ ,, श्री भरताग्रजाचार्यजी ।

३८ ,, श्री हनुमदाचार्यजी ।

३९ महामहोपाध्याय ,, श्री रघुवराचार्यजी वेदान्तकेशरी

४० वर्तमानाचार्य योगिराज ,, श्री रामप्रपन्नाचार्यजी दर्शनकेशरी

अन्त में—"गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥"

इस नीति का अनुसरण कर कृपापूर्वक स्खलन को सूचित कर दें ताकि पुनरावृत्ति शुद्ध की जा सके ।

विद्वज्जनविधेय :—

स्वामी रामेश्वरानन्दाचार्य
चैत्र शुक्ल श्री रामनवमी
संवत् २०२९
ता.—११ । ४ । १९७३

विश्रामद्वारका
श्रीरामानन्दपीठ
श्रीशेषमठ
पोरबन्दर (सौराष्ट्र)

युक्तिदीपिकाकारविद्वद्रत्न–

श्रीयुक्तिधरविरचितम्

आत्मगुणाष्टकम्

रामं ब्रह्म नमस्कृत्य श्रुतानन्दं गुरुं तथा ।
आत्मगुणाष्टकं वच्मि वैष्णवानामपेक्षितम् ॥१॥
कश्चिद् धर्मो न यत्तुल्यो वैष्णवत्वप्रयोजकः ।
सर्वभूतहितेच्छा सा दयाख्यश्चात्मनो गुणः ॥२॥
शक्तस्य क्लेशितस्यापि वैष्णवत्वप्रयोजकः ।
क्रोधाभावो बुधः प्रोक्तः क्षमाख्यश्चात्मनो गुणः ॥३॥
गुणेष्वदोषदर्शित्वं वैष्णवत्वप्रयोजकम् ।
अनसूयाऽभिधस्तच्च भाषितश्चात्मनो गुणः ॥४॥
बाह्याभ्यन्तरसंशुद्धिर्वैष्णवत्वप्रयोजिका ।
कुसङ्गरहिता सा च शौचाख्यश्चात्मनो गुणः ॥५॥
सतामकष्टदं कर्म वैष्णवत्वप्रयोजकम् ।
अनायासाभिधस्तद्धि धर्म्य एवात्मनो गुणः ॥६॥
वर्जनमप्रशस्तानां वैष्णवत्वप्रयोजकम् ।
प्रशस्ताचरणं चाथ मङ्गलं चात्मनो गुणः ॥७॥
पात्रेऽदीनतया दानं वैष्णवत्वप्रयोजकम् ।
अदैन्याख्यो बुधैः प्रोक्तः प्रशस्यश्चात्मनो गुणः ॥८॥
न्यायार्जितेन सन्तोषो वैष्णवत्वप्रयोजकः ।
स्पृहाभावो बुधैः प्रोक्त उत्तमश्चात्मनो गुणः ॥९॥
श्रीयुक्तिदीपिकाकारयुक्तिधरेण निर्मितम् ।
आत्मगुणाष्टकं भूयाद् वैष्णवानां सुखप्रदम् ॥१०॥

—*—

बोधायनवृत्तिकारभगवच्छ्रीपुरुषोत्ताचार्यप्रणीता

पुरुषोत्तमप्रपत्तिः (प्रपत्तिषट्कम्)

रामिति बीजवान् नाथ ! मन्त्रराजो हि तारकः ।
तं जपामि तव प्रीत्यै पाहि मां पुरुषोत्तम ! ॥१॥
राम ! दीनोऽनुकूलोऽहं विश्वस्तोऽप्रातिकूल्यवान् ।
त्वयि न्यस्यामि चात्मानं पाहि मां पुरुषोत्तम ! ॥२॥
मामनाथं स्वशेषं च न्यासितं स्वार्थमेव हि ।
निर्भरं स्वभरत्वेन पाहि मां पुरुषोत्तम ! ॥३॥
यस्मिन् देहेऽहमानीतः कर्मणा स्वेन राघव ! ।
तदन्ते देहि सायुज्यं पाहि मां पुरुषोत्तम ! ॥४॥
न गतिर्जानकीनाथ ! त्वां विना परमेश्वर ! ।
परां गतिं प्रपन्नं त्वां पाहि मां पुरुषोत्तम ! ॥५॥
मोहितो मायया तेऽहं दैव्या गुणविशिष्टया ।
शरण्यं त्वां प्रपन्नोऽस्मि पाहि मां पुरुषोत्तम ! ॥६॥
बोधायनमहर्षिश्रीपुरुषोत्तमनिर्मितम् ।
प्रपत्तिषट्कमेतच्छ्रीभुक्तिमुक्तिप्रदायकम् ॥७॥

———o———

महामहोपाध्याय जगद्विजयि स्वामिश्रीरघुवराचार्य-
वेदान्तकेसरिप्रणीतं

स्तोत्रामृतम्

जगल्लीलाबीजं निरवधिककल्याणगुणकं
महेशाद्यैर्वन्द्यं कलुषितगुणास्पृष्टवपुषम् ।
शरण्यं लोकानां श्रुतिनुतपदं भक्तसुखदं
श्रयेऽहं श्रीरामं द्विभुजकमनीयं प्रतिदिनम् ॥१॥

जगन्नाथोऽनाथावनदृढमतिस्सर्वगतिकः
स्वतन्त्रस्सर्वज्ञो निरवधिककल्याणगुणकः ।
विरिञ्चेशानाद्यैरमरपतिभिः स्वर्चितपदः
परेशः श्रीरामो विहरतु हृदब्जे मम चिरम् ॥२॥

परैर्वेदान्तार्थे कलुषितपथं प्रापयति यो
विशिष्टाद्वैताख्यं प्रथितमतभेनत्प्रकटयन् ।
परप्रत्यग्भेदं श्रुतिशिरसि सिद्धं विशदयन्
यती रामानन्दः स हि सुगुणसिन्धुर्विजयते ॥ ३ ॥

यस्यादेशवशादवेदिषमहं मोहाम्बुधेर्वाडवं
वेदान्तस्य विशिष्टतत्त्वगमकं सिद्धान्तमादन्दनम् ।
मिथ्यावादविमर्दनेतिचतुरा यद्भारती राजते
स्वाचार्यं श्रुतिवित्तमं तमनिशं वन्दे दयावारिधिम् ॥४॥

महामहोपाध्याय जगद्विजयी स्वामी श्री रघुवराचार्यजी वेदान्तकेसरी

आविर्भाव :– विक्रम संवत १९४३ अश्विन शुक्ल विजयादशमी

तिरोभाव :– विक्रम संवत २००७ माघ शुक्ल वसन्तपंचमी

जगद्गुरुश्रीत्रिदण्डिग्रन्थमालायाः श्रीरामानन्द-
वेदान्तविषयकं प्रथमं पुष्पम् ।

प्रस्थानत्रयान्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्याय नमः

श्रीरामानन्दपीठनामकश्रीअनुभवानन्दद्वारपीठसंस्थापकाचार्य-

जगद्गुरुश्रीअनुभवानन्दाचार्यप्रणीतः

श्रौतार्थसंग्रहः

संशोधकः—

महामहोपाध्याय स्वामी श्री रघुवराचार्य वेदान्तकेसरी

श्रीरामानन्दपीठ (शेषमठ शींगडा)

जगद्गुरुश्रीमदनुभवानन्दाचार्याष्टकम्

रक्षकं वैष्णवानां च धर्मवारिधिवर्धकम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥१॥

रामानन्दकृतानन्दभाष्याब्जस्य प्रभाकरम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥२॥

भक्तिगङ्गाप्रवाहेण मुक्तिदं लोकपावनम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥३॥

विशिष्टाद्वैतवादेन वादिवादापसारकम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥४॥

सर्वसिद्धिप्रदातारं सिद्धेन्द्रं सिद्धसेवितम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥५॥

मुद्रोर्ध्वपुंड्रमालादे रक्षकं परमं बुधम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥६॥

श्रीगीतार्थसुधाकारं सदाचारोपदेशकम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥७॥

त्रयाणां च रहस्यानां भव्यव्याख्याविधायिनम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥८॥

वैष्णवभाष्यकारश्रीवैष्णवाचार्यनिर्मितम् ।
अष्टकं भवतादेतत् सर्वकल्याणकारकम् ॥९॥

———०———

श्रीसीतारामाभ्यां नमः ।

आनन्दभाष्यकारश्रीरामानन्दाचार्याय नमः ।

श्रीअनुभवानन्दद्वारपीठसंस्थापकजगद्गुरु

श्रीअनुभवनन्दाचार्यप्रणीतः

श्रौतार्थसंग्रहः

वन्दे सीतापतिं सीतां मारुतिं च महामतिम् ।
आनन्दभाष्यकृद्रामानन्दाचार्यं यतीश्वरम् ॥१॥
नत्वाऽहं स्वगुरुं भावानन्दाचार्यं जगद्गुरुम् ।
श्रौततत्त्वावबोधाय कुर्वे श्रौतार्थसंग्रहम् ॥२॥

"सर्वे वेदा यत्पदमामनन्ति" इति "रामपदेनासौ परब्रह्माभिधीयते" इत्यादिश्रुतिप्रामाण्यात् परब्रह्मपदाभिधेयः सर्वेश्वरः श्रीराम एव मुख्यं श्रौतं तत्त्वम् । मोक्षावाप्त्यर्थं तज्ज्ञानमेव मुमुक्षुभिः सम्पादनीयं "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इत्यादिश्रुतिप्रामाण्यात् । स च भगवांश्छ्रीरामः सर्वदा चिदचिद्विशिष्ट एवावतेष्ठते । तथा चाहुराचार्यसार्वभौमाः श्रीराघवानन्दाचार्याः श्रीराघवेन्द्रमङ्गलमालायाम्—

'चिदचिद्भ्यां विशिष्टाय शिष्टपक्षसुरक्षिणे ।
सच्चिदानन्दरूपाय राघवेन्द्राय मङ्गलम् ॥१॥ इति

वेदान्तरहस्यमार्त्तण्डभाष्येप्युक्तम्—

"बोधायनवृत्तिकारभगवत्पुरुषोत्तमाचार्यबोधायनप्रशिष्यैराचार्यचक्रचूडामणिभिः श्रीसदानन्दाचार्यैरप्युक्तं, वेदान्तसारस्तवे—

"चिताऽचिता विशिष्टाय सूक्ष्मयाऽसूक्ष्मयाथ च ।
कारणकार्यरूपाय श्रीरामाय नमो नमः ॥" इति ॥"

चिदचितोः श्रीरामस्य विशेषणत्वं तु "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः" "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः" इत्यादिश्रुतिनिचयप्रतिपादिततच्छरीरत्वादेव । निगदितं चैतदुपेयोपायदर्पणे जगद्गुरुभिः श्रीश्रुतानन्दाचार्यैः—"ईशस्य देहरूपत्वात् प्रकारौ कथितावुभौ । उभाभ्यां च विशिष्टो हि सर्वेशो रघुनायकः ॥" इति । सिद्धान्तविजयिभिः श्रीश्रियानन्दाचार्यैरप्युदितं—"प्रमिताक्षरासारे—तनुत्वेन श्रुतो जीवो ब्रह्मणो हि विशेषणम्" (प्र. सा. २।३।२२) "तनुत्वात् तत् प्रकारत्वेनाचितो ब्रह्मणोंऽशता" (प्र. ३।२।९) इति । भगवद्रामानन्दाचार्य आचार्यसार्वभौमोऽप्याह—"चिदचिद्वस्तुशरीरतया तत्प्रकारं ब्रह्मैव सर्वदा सर्वशब्दाभिधेयम् ।" (आनन्दभाष्य २।१।१४)

शरीरं तु चेतनं प्रत्याधेयं विधेयं शेषभूतं चापृथक्सिद्धं द्रव्यम् । तथा हि—भाष्यम्—"प्राणशरीरः"—सर्वेषां प्राणानां धारकः "यस्य प्राणः शरीरम्" इति श्रुत्या प्राणस्य शरीरत्वनिर्देशादाधेयत्वविधेयत्वाङ्गत्वादयस्तस्मिन् फलन्ति । लोकेऽपि शरीरपदेनाधेयत्वादय एव गृह्यन्त इति तान्येव शरीरपदबोध्यानीति ।" (आनन्दभाष्य १।२।२) इति ।

एतेन चिदचिदीश्वरश्चेति त्रय एव श्रौताः पदार्था इत्युक्तं भवति । तथा हि श्रुतिः—"क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः" इति । उक्तं च सदाचार्यसुरेन्द्रैः श्रीराघवानन्दाचार्यैः श्रौत-तत्त्वसमुच्चये—'भोक्ता भोग्यं प्रेरितारं च मत्त्वे" त्यादिश्रुतिप्रामाण्या-च्चिदचिदीश्वरश्चेति त्रीण्येव श्रौतानि तत्त्वानीति ।" इति ।

१—अथ चिद्रूपार्थनिरूपणम्

तत्र चित्पदवाच्यो जीवः । स चाणुचेतनो विशेषणानुक्तावीश्वरे विशेष्यानुक्तौ प्रकृतिकार्येऽतिव्याप्तिरत उभयोपादानम् । चेतनो नाम ज्ञानाश्रयो जानामीतिप्रतीते 'बोद्धा कर्त्ते' तिश्रुतेश्च ।

"एष द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुषः" (प्रश्न०५।९) इतिश्रुतिप्रण्याज्ज्ञानाश्रयोऽपि जीवः । सिद्धान्ते ज्ञानरूपतयाऽङ्गीकृतोऽत एव स ईश्वरवत् प्रत्यक्पदवाच्यः । यः स्वस्मै स्वयमेव प्रकाशते स प्रत्यक् । एवकारेण नित्यविभूतिधर्मभूत-ज्ञानयोर्व्यावृत्तिः । जीवस्य स्वरूपभूतं ज्ञानं धर्मिभूतज्ञानत्वेन तदाश्रितं तद्गुणभूतं च ज्ञानं धर्मभूतज्ञानत्वेनाभिधीयते "सुखमहमस्वाप्समि" तिप्रतीत्या. जीवः स्वयम्प्रकाशो ज्ञानत्वाद् धर्मभूतज्ञानवदित्यनुमानाच्च जीवे स्वप्रकाशत्वसिद्धिः ।

जीवात्मनो नित्यत्वम् ।

स च जीवो नित्यः "न जायते म्रियते वा विपश्चित्" "नित्यो नित्यानां चेतनश्चेतनानामि" त्यादिश्रुतेः । जीवस्य जन्ममरणाव-स्थाऽवाप्तिशङ्का तु देहसंयोगवियोगावादाय समाधेया । जीवस्यानि-त्यत्वे तु कृतविप्रणाशाकृताभ्युपगमौ दोषौ भवेतामिति नित्यत्वमेवाभ्यु-पगन्तव्यं तस्य ।

"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि"ति श्रुतिविरोधस्तु न शङ्कनीयः, सिद्धान्ते सृष्टेः प्राङ् नामरूपविभागानर्हचिदचिद्विशिष्टस्यैकस्य ब्रह्मणः स्वीकारात् । अत उक्तमेतच्छ्रुतेरानन्दभाष्ये भगवद्भिः श्रीरामानन्दाचार्यैः—"यद्यप्ययं सच्छब्दो विशेष्यलक्षणपरमात्मबोधकस्तथापि कारणविषयत्वसामर्थ्यात् कारणताप्रयोजकगुणविशिष्टप्रकृतिपुरुषकालशरीरकं परमात्मानमेव समुपस्थापयति ।" (छादोग्यानन्दभाष्य ६ । २।१) इति । इदं प्रत्यक्षादिप्रमाणेन परिदृश्यमानं जगद् विभक्तनामरूपं बहुत्वावस्थं सृष्टेः पूर्वं निमितान्तररहितमविभक्तनामरूपतया एकं सच्छब्दशब्दितं ब्रह्मलक्षणमेवाभवदिति ।" (छान्दोग्यानन्दभाष्य ६।२।१) इति च ।

जीवात्मनोऽणुत्वम्

"एषोऽणुरात्मा चेतसा वेदितव्यः" "बालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥" आराग्रमात्रो ह्यवरोऽपि दृष्टः ।" इत्यादिश्रुतिप्रामाण्यादणुपरिमाणोऽयं जीवात्मा ।

स्थूलदेहमपहाय सूक्ष्मदेहोपादानकाले सकलस्यावकाशाभावात् स्वरूपशैथिल्यप्रसङ्गाद्धेय एव सर्वथा जीवमध्यमपरिमाणवादः । ननु सङ्कोचविकाशावङ्गीकृत्य स्थूलसूक्ष्मजीवानां क्रमात् सूक्ष्मस्थूलदेहप्रवेशस्योपपन्नत्वेन समीचीन एव जीवमध्यमपरिणामवाद इति चेन्न, तथात्वे जीवानां सावयवत्वेनानित्यत्वापत्तेः ।

ननु शरीरव्यापिसुखदुःखाद्युपलब्धये सुदूरदेशेऽपि जीवादृष्टप्रयुक्तजीवभोग्यपदार्थोत्पत्तये जीवविभुत्वमेवाङ्गीकर्त्तव्यमिति चेन्न, तथात्वे

जीवोत्क्रान्त्यादिप्रतिपादकश्रुतिव्याकोपप्रसङ्गात् । तथा चाहुर्ब्रह्मसूत्रकारा भगवन्तो बादरायणाः–'उक्रान्तिगत्यागतीनाम् ' (ब्र०सू० २।३।२१) व्याख्यातञ्चैतत् पारमार्षे सूत्रञ्चैवमेवानन्दभाष्यकारैर्भगवद्भिः श्रीरामानन्दाचार्यैः श्रीसम्प्रदायप्रधानाचार्यैः स्वभाष्ये । तथा हि– "आत्मनः सर्वगतत्वं निराकरोति" उत्क्रान्तोत्यादिना । ताभ्य इत्यनुवर्त्तते । नायमात्मा सर्वगतः किन्त्वणुरेव । उत्क्रान्तिगत्यागतीनाम् । आत्मोत्क्रान्तितद्गतितया गतिश्रुतिभ्य इत्यर्थः । "तेन प्रद्योतेनैष आत्मा निष्क्रामति" (बृ.६।४।२) "ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" (कौषीतकी १।२) "तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे" (ब.६।४।२) इत्यादिगत्यागत्युत्क्रान्तिश्रुतिभ्य आत्मनः सर्वगतत्वं नोपपद्यते किन्त्वणुत्वमेव । सर्वगतस्य विभोर्गतिश्चागतिश्च नोपपद्यते । तस्मादात्मनोऽणुत्वमेव ।" (आनन्दभाष्य २।३।२१)इति ।

घटोपाधिकाकाशवच्छ्रुत्यननुमतस्यान्तःकरणोपाधिकचैतन्यात्मकजीवस्य गत्यादिस्वीकारे तु "अथैष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" इत्यादि श्रुतिविरोधोऽनिवार्य एव । तस्मादणुपरिमाण एव जीवः ।

गृहकोणस्थितस्यापि दीपस्य स्वप्रभया गृहस्य सर्वप्रदेशे व्याप्तिरिवाणुपरिमाणकस्यापि जीवस्य स्वधर्मभूतज्ञानद्वारा देहस्य सर्वप्रदेशे व्याप्तिरस्त्यतो न काचिदनुपपत्तिः शरीरव्यापिसुखाद्युपलब्धौ । एवं जीवादृष्टमपि सर्वव्यापीश्वरेच्छाऽनर्थान्तरमेव । अत एवोक्तमाचार्य-

सार्वभौमैः श्रीद्वारानन्दाचार्यैः—'दैवाभिधास्ति जीवानां पूर्वकर्मफलप्रदा । यस्येच्छा सदसद्रूपा रामचद्रं नमामि तम् ॥" (श्रीरामचन्द्रदशकम्) इति । अतो दूरदेशेऽपि अदृष्टप्रयुक्ततत्तज्जीवभोग्यपदार्थोत्पत्तिरप्यनुपपत्तिशून्यैवेति ध्येयम् ।

कर्त्तृत्वम्

"एष द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुषः" (प्रश्नोपनिषद् ५।६) इति श्रुत्या बोद्धेत्येवंरूपेण ज्ञानाश्रयत्ववत् कर्त्तेत्येवंरूपेण कर्त्तृत्वाश्रयत्वमपि प्रतिपादितं जीवात्मनोऽतस्तस्याकर्त्तृत्वापादनं श्रुतिविरुद्धमेव । अत एवोक्तं जगद्गुरुभिः श्रीचिदानन्दाचार्यैश्चिदात्मप्रबोधे—'अकर्त्ता विभुर्नाथवा मध्यमानो न वा ज्ञानशून्यो जड़ो दुःखरूपः । अणुर्ब्रह्मणोंऽशः शरीरं च शेषः परं रामचन्द्रस्य दासश्चिदात्मा ।'। इति ।

सूत्रितं च ब्रह्मसूत्रकारैर्भगवद्भिर्बादरायणैः—'कर्त्ता शास्त्रार्थवत्वात्' (ब्र.सू.२।३।३४) इति । व्याख्यातं चैतत् प्रमिताक्षरावृत्त्याख्ये श्रीबोधायनवृत्तिसारे जगद्गुरुभिः श्रीदेवानन्दाचार्यैः । तथा हि —"आत्मा कर्त्ता" । न तु प्रकृतिः । 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादिशास्त्राणामप्रवृत्तस्य पुरुषस्य प्रवर्त्तकबोधोत्पादनद्वारा प्रवृत्त्युत्पादनेनार्थवत्वात् । अन्तःकरणस्य प्रवर्त्यत्वस्वीकारे तु तस्याचेतनत्वेन प्रवर्त्तकबोधोत्पादनासम्भवाच्छास्त्रवैफल्यमनिवार्यमेव ।" (बोधायनवृत्तिसारः) इति ।

जीवकर्त्तृत्वं च न जीवायत्तं किन्तु परमात्माऽऽयत्तमेव । ऊचुश्च 'परात्तु तच्छ्रुते' रित्येतत्सूत्रभाष्य आनन्दभाष्यकारा आचार्य-

सार्वभौमा भगवन्तः श्रीरामानन्दाचार्याः—"तु शब्दः पूर्वपक्षव्यावृत्त्यर्थः। तज्जीवस्य कर्तृत्वं पराज्जीवान्तर्यामिणः परमात्मन एव भवति। कुतः? तच्छ्रुतेः। 'अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा" (तै०-आ० ३।११।१०) 'य आत्मानमन्तरो यमयति" (बृ० ३।७।२२) "एष ह्येवैनं साधुकर्म कारयति तं यमन्वानुनेषत्येष एवैनमसाधु कर्म कारयति तं यमेभ्यो लोकेभ्यो नुनुत्सते" (कौषी० ३।९) इति तस्य जीवकर्तृत्वस्य परमायत्तत्वश्रुतेः। तस्माज्जीवकर्तृत्वं परमपुरुषायत्तमेव। (आनन्दभाष्य २।३।४१) इति।

कर्तृत्वप्रतिपादनाद् भोक्तृत्वमपि प्रतिपादितं भवति जीवानाम्।

देहादिभ्यो वैलक्षण्यम्

जीवश्च न देहेन्द्रियप्राणबुद्धिस्वरूपः 'मम देहः' 'मम चक्षुरादीनीन्द्रियाणि' 'मम प्राणाः' 'मम बुद्धि' श्चेत्यादिप्रतीतेः। ऊचुश्च श्रौततत्त्वसमुच्चये भगवन्तः श्रीराघवानन्दाचार्याः—"स च 'यस्यात्मा शरीरमि' तिश्रुतिप्रामाण्यादीश्वरशरीररूपोऽपि न पाञ्चभौतिकस्वशरीररूपोऽहमित्युपलभ्यमानत्वात्, "मम पाञ्चभौतिकं शरीरम्' इति शरीरात् पृथक्त्वेनोपलभ्यमानत्वात् "न जायते म्रियते वा विपश्चित्" "नित्यो नित्यानां चेतनश्चेतनानाम्" इत्यादिश्रुतिभिर्नित्यत्वेन प्रतिपादितत्वाच्च। इन्द्रियप्राणबुद्धिवैलक्षण्यमप्यनयैव रीत्या बोध्यम्। अत एवोक्तं जगद्गुरुश्रीश्रुतानन्दाचार्यैः—

"सुखाश्चाणुचिजज्ञातृरूपोऽस्ति जीवः
परब्रह्मणोंशस्तनुर्नित्यशेषः।

न देहेन्द्रियप्राणबुद्धिस्वरूपो

विकारी जडो ब्रह्मरूपोऽपि नैव" ॥इति॥

उक्तश्च बोधायनमतादर्शाख्यायां सहस्रश्लोक्यां जगद्गुरु-श्रीश्रुतानन्दाचार्यप्रशिष्यैर्जगद्गुरुश्रीपूर्णानन्दाचार्यैः सिद्धान्त-सार्वभौमैः —

"स्थूलश्चाहं हि गच्छामि" प्रत्ययाच्चेतनस्तनुः ।
मृते देहे तु चैतन्यं प्राणनिर्गमनान्न हि ॥ ८७७ ॥

इति चेन्न वरं चैतद्, विकल्पासहता यतः ।
देहस्यावयवे तच्चैकस्मिन् सर्वेषु वाऽस्ति हि ॥ ८७८ ॥

नाद्यः प्रतीयते यस्माच्चैतन्यमितरत्र च ।
बहुचेतनवत्त्वं स्यादन्त्ये चैकतनावथ ॥ ८७९ ॥

उच्छेदो व्यवहारस्य वैमत्ये तु मिथो भवेत् ।
हस्ताद्यन्यतमोच्छेदे स्मृतेश्चानुपपन्नता ॥ ८८० ॥

संघातरूपवत्त्वान्न त्वात्मा तनुर्यथा घटः ।
देहस्यानात्मता सिद्धा चेत्येवमनुमानतः ॥ ८८१ ॥

"मम देहः" प्रतीतेश्च नात्मता मन्यते तनोः ।
अनित्यत्वाज्जडत्वाच्च शरीरस्यात्मता न हि ॥ ८८२ ॥

इन्द्रियस्य न चात्मत्वं "ममेन्द्रियं" प्रतीतितः ।
जीवत्वं न च नेत्रादेस्तच्छून्ये जीव्यते यतः ॥ ८८३ ॥

"मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।"
भोगोपकरणं चैवं तस्मादात्मा मनो न हि ॥ ८८४ ॥

"मम प्राणः" प्रतितेश्च प्राणस्य चात्मता न हि ।
"प्राणोऽस्मी"तिश्रुतौ चोक्तः प्राणदेही परेश्वरः ॥ ८८५ ॥
"अहं जानामि" चेत्यत्राहमर्थस्यात्मता खलु ।
तस्य धर्मतया ज्ञाने ज्ञाते सा न कथञ्चन ॥ ८८६ ॥ इति ।

जीवाश्च "ममैवांशो जीवलोके जीवभूतः सनातनः" इति भगवद्वचनप्रामाण्याद् विशिष्टस्य विशेषणवद् ब्रह्मणोंशभूताः ।

जीवानां मिथो भेदः

अनन्ताः परस्परभिन्नाश्च जीवाः । अन्यथा 'नित्यो नित्यानाम्' 'न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्वे वयमतः परम् ।' इत्यादिश्रुतिस्मृतिव्याकोपः प्रसज्येत । जीवानामैक्य एकः सुख्यपरो दुःखी केचिद् बद्धा केचिच्च मुक्ता इत्यादिव्यवस्था च न स्याद् अत एवोक्तमानन्दभाष्यकारैर्भगवद्भिः श्रीरामानन्दाचार्ययतिसार्वभौमैर्गीताभाष्ये—

"किञ्चात्मनां भेदाभावे गुरुशिष्यव्यवस्थाभङ्गोऽपि स्यात् । एवं शिष्यतया कञ्चन शिक्षणीयमुपलभ्यानुपलभ्यतया वोपदिशत्याचार्यः ? आद्ये स्वस्माद् भिन्नमभिन्नं वा ? प्रथमे सत्यमसत्यं वा ? नाद्योऽपसिद्धान्तात् । अन्त्ये तु तस्य मिथ्यात्वेनोपलम्भे तस्मा उपदेशासम्भवः । सत्यत्वेनोपलम्भे तु भ्रान्तत्वेनाचार्यत्वहानिराचार्यस्य । अभिन्नत्वपक्षे कथमुपदेशः । अनुपलभ्येति पक्षे तु कस्मा उपदिशति ?

एवमात्मभेदानभ्युपगमे बद्धमुक्तव्यवस्थाभङ्गश्च भवेत् ।" (गीताया आनन्दभाष्यम् २।१२)इति ।

श्रौत प्रमेयचन्द्रिकायां श्री श्रियानन्दाचार्यैरप्युक्तम्—
एककाले सुखी चैको दुःखी चान्योऽवलोक्यते ।
विज्ञैः परस्परं भेदश्चात्मनां मन्यते ततः ॥ २१ ॥

सुखीदुःखीतिभेदो नन्वन्तःकरणभेदतः ।
मैवं कुतो यतश्चैवं सौभर्यादौ कथं न हि ॥ २२ ॥
मुक्तामुक्तत्वभावश्च बोध्यबोकता तथा ।
मृतामृतव्यवस्था च ह्यात्मैक्ये सम्भवेन्न हि ॥ २३ ॥
नन्वात्मनामभेदोऽस्ति 'भोक्ता भोग्यमि'तिश्रुतेः ।
मैवं यतः प्रकारैक्याज्जीवानां च तथा श्रुतिः ॥ २४ ॥

आहुश्च नवरत्नीकाराः श्रीश्यामानन्दाचार्याः —अहं देहेन्द्रियादिभ्यः प्राणेभ्यो ज्ञानतोऽपि च । अन्यात्मभ्यश्च रामाद्धि भिन्नो रामतनुस्तथा ॥" इति ।

अतश्चैकजीववादः श्रुतिविरूद्धो युक्तिविरुद्धश्चास्तीति बोध्यम् ।

बद्धजीवाः

जीवास्त्रिविधा बद्धमुक्तनित्यभेदात् । उक्तञ्चेत्थमेव भाष्ये —

"एतेन जीवानां बद्धमुक्तनित्यभेदेन त्रैविध्यमपि दर्शितं भवतीत्यन्यत्र विस्तरः । (श्रीरामानन्दभाष्यम् १।१।१४) इति । तत्रानादिकालीनस्वनियामकपुण्यपापात्मककर्मानुगुणजननिधनत्वादिधर्ममापन्ना आब्रह्मकीटादयो जीवा बद्धाः । भगवान् श्रीरामोऽपि जीवस्य प्राक्तनं कर्मानुसृत्यैव फलप्रदोऽतो न तत्र स्वातन्त्र्यप्रयुक्तवैषम्यनैर्घृण्यदोषोऽत एवोक्तमाचार्यशिरोमणिश्रीश्रुतानन्दाचार्यैः —

"विकारञ्च रामो दयाब्धिस्तथात्वे
दयाशून्यतां पक्षपातञ्च नैति ।
प्रकारे विकारस्तथा चित्रसृष्टौ
च हेतुर्यतः प्राणिनां प्राच्यकर्म ॥" इति ।

(श्रौतसिद्धान्तबिन्दुः)

मुक्तजीवाः

अनन्तजन्मोपार्जितपुण्योदयेन सत्त्वोद्रेकात् सद्गुरुमुपसद्य ततोऽनन्तब्रह्माण्डनायकनिखिलदोषप्रत्यनीकानन्तकल्याणगुणसागरं परं ब्रह्म भगवन्तं श्रीराममवबुध्य तद्भक्तिप्रपत्तिभ्यां बन्धकारणभूतानि कर्माणि विनाश्य कर्मोपार्जितदेहं परित्यज्य दिव्ये श्रीसाकेतधामनि भगवत्सायुज्यमवाप्ता जीवा मुक्ताः ।

भक्तिः

भक्तिश्च ध्रुवा स्मृतिः । उक्तञ्च महर्षिश्रीपुरुषोत्तमाचार्यबोधायनोक्तसाधनसप्तकस्य पद्यात्मिकायां साधनदीपिकाख्यायां व्याख्यायां श्रीबोधायनचरणचञ्चरीकैराचार्यसुरेन्द्रैः श्रीगङ्गाधराचार्यैः—

रामस्य ब्रह्मणोऽनन्यभक्त्यैव मुक्तिराप्यते ।
भक्तिर्ध्रुवा स्मृतिः सा च विवेकादिकसप्तकात् ॥ इति ॥

भक्तिमधिकृत्याभिहितं चापरबोधायनाचार्यजगद्गुरुश्रीदेवानन्दाचार्यवेदान्तविद्यानिधिभिः प्रामिताक्षराकारैर्योगपञ्चके—

"श्रीरामस्यानवच्छिन्नं स्मरणं प्रीतिपूर्वकम् ।
श्रीमद्वैष्णवाचार्यैर्भक्तियोगतया मतम् ॥२३॥
अङ्गमष्टाङ्गयोगोऽङ्गी भक्तियोगः प्रकीर्त्तितः ।
लभ्यते भगवान् रामो भक्तियोगेन नान्यथा ॥३३॥
भक्तिर्बोधायनप्रोक्तैर्विवेकादिकसाधनैः ।
ध्यानध्रुवस्मृतीत्यादिशब्दवाच्या प्रजायते॥३४॥
संसारिता मताऽभक्त्या भक्त्या मुक्तिरुदीरिता ।
आमृत्युसमयं भक्तेरावृत्तिश्च मता श्रुतौ ॥३५॥
प्रारब्धान्ते मता भक्तिर्मुक्तिदा चार्चिरादिना ।
अङ्गिनी च मता भक्तिरङ्गे त ज्ञानकर्मणी ॥३६॥

"श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्" ॥३७॥
एवं महापुराणे श्रीभागवते हि मुक्तिदाः।
भक्तेश्च नवधा भेदाः प्रह्लादेन प्रकीर्त्तिताः॥३८॥
एभिराराधितो रामो भक्ते परं प्रसीदति।
योगक्षेमं वहँल्लोके चान्ते मुक्तिं प्रयच्छति ॥३९॥
घृतं जलात् तथा तैलं सिकतातश्च निःसरेत्।
तथाऽपि भगवद्भक्तिं विना मुक्तेर्न सम्भवः ॥४०॥
पूर्वाघनाशिनी चाथ पराघश्लेषवर्जिनी।
भक्तिरेव ततः सैव पुंसां संसारनाशिनी" ॥४१॥ इति।

आनन्दभाष्यकारैराचार्यसार्वभौमैर्भगवद्भिः श्रीरामानन्दाचार्यैरप्यभिहितमेवमेव श्रीवैष्णवमताब्जभास्करे—

"सा तैलधारासमनित्यसंस्मृतेः सन्तानरूपेशि परानुरक्तिः।
भक्तिर्विवेकादिकसप्तजन्या तथा यमाद्यष्टसुबोधकाङ्गाः॥ इति।

श्रीरामानन्दभाष्येऽपि—"सा च भक्तिः परमप्रेयो भगवदितरवैतृष्ण्यपूर्वकपरमपुरुषानुरागरूपो ज्ञानविशेष एव"

(आ० भा० १।१।१।) इति।

प्रपत्तिः

"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज। अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः" (गी० १८।६६) इत्येतस्य श्लोकस्यानन्दभाष्ये भगवद्भिः श्रीरामानन्दाचार्यैः प्रपत्तेः स्वरूपमपि निरूपितम्। तथाहि—'सर्वज्ञस्य सर्वशक्तेर्वात्सल्यजलधेः स्वभाव एवैष यत्

स प्रार्थित एव सर्वं करोतीत्युपायत्वप्रार्थनाऽवश्यं कर्त्तव्येत्यपि ध्येयम्। सेयमुपायत्वप्रार्थनैव प्रपत्तिः।.....

प्रार्थनांशेन शरणागतिपदवाच्य आत्मनिक्षेपांशेन न्यासपदवाच्यश्च प्रपत्तियोग एव। आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनं रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं कार्पण्यञ्चेतीमानि प्रपत्तियोगस्य पचांगानि। तथा हि शास्त्रं "आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम्। रक्षिष्य-सीतीति वश्विासो गोतृत्ववरणं तथा। आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः।" (अहिर्बुध्निसंहिता ३७।२८) इति। पञ्चापीमानि प्रपत्यङ्गानि बोधायनवृत्तिकृता भगवता श्रीपुरुषोत्तमाचार्यबोधायनेन श्रीपुरुषोत्तमप्रपत्तिषट्के विहितानि। तथा हि—

"राम दीनोऽनुकूलोऽहं विश्वस्तोऽप्रातिकूल्यवान्।
त्वयि न्यस्यामि चात्मानं पाहि मां पुरुषोत्तम!॥"

(गीताया आनन्दभाष्यम् १८।६६)

प्रपत्तिं समधिकृत्य व्याहृतं चापरबोधायनाचार्यैर्जगद्गुरुभिः श्रीदेवानन्दाचार्यैर्वेदान्तविद्यानिधिभिः प्रमिताक्षराकारैर्योगपञ्चके-

"श्रीरामाय ससीताय स्वात्मस्वीयानुबन्धिनाम्।
रक्षाभरार्पणं पुंसो न्यासयोगः प्रकीर्त्तितः॥४२॥
आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम्।
विश्वासोऽकिञ्चनत्वं च गोप्तृत्ववरणं तथा॥४३॥
आचार्यैरुक्तमेतद्धि न्यासयोगाङ्गपञ्चकम्।
अङ्गपुष्टौ प्रजातायामङ्गिपुष्टिर्मता ध्रुवा॥४४॥
श्रीमद्रामानुकूलोऽहं भविष्याम्यद्यतः खलु।
इत्यानुकूल्यसङ्कल्पो न्यासयोगाङ्गमादिमम्॥४५॥

श्रीरामप्रतिकूलोऽहं भविष्याम्यद्यतो न हि ।
एतन्न्यासद्वितीयाङ्गं प्रातिकूल्यस्य वर्जनम् ॥४६॥
अवश्यं जानकीनाथो मम रक्षां विधास्यति ।
विश्वासनामकं चैतन्न्यासाङ्गं हि तृतीयकम् ॥४७॥
त्वामेव हि प्रपन्नं त्वं रक्ष राम शरण्य माम् ।
एतन्न्यासचतुर्थाङ्गं गोप्तृत्ववरणं मतम् ॥४८॥
प्रपन्नं साधनैर्हीनं मां पाहि रघुनन्दन ।
न्यासस्य पञ्चमं चाङ्गमाकिञ्चन्यमिति स्मृतम् ॥४९॥
मानसादिविभेदेन न्यासोऽयं त्रिविधो मतः ।
न्यासस्यैवापरे नाम्नी प्रपत्तिशरणागती ॥५०॥
प्रतिज्ञातं च रामेण प्रपत्त्या सर्वतोऽभयम् ।
राम एव प्रपद्यो यद् रामो द्विर्नाभिभाषते ॥५१॥
अयं प्रपत्तियोगो हि प्रारब्धस्यापि नाशकः ।
अस्य प्रपत्तियोगस्याधिकारः सर्वदेहिनाम्" ॥५२॥ इति ।

मुक्तावस्थायां "निरञ्जनः परमं साम्यमुपैति" इति श्रुतिप्रतिपादितपरमसाम्यापन्नोऽपि मुक्तजीवः सर्वेश्वरो न भवति साम्यस्य भेदघटितत्वादत एव सूत्रितं ब्रह्ममीमांसायां भगवता बादराणेण— "जगद्व्यापारवर्ज्जं प्रकरणादसन्निहितत्वाच्च" (ब्र.सू.४।४।१७) इति। अभिहितञ्चैतस्य सूत्रस्यानन्दभाष्य आचार्यसार्वभौमैर्भगवद्भिः श्रीरामानन्दाचार्यैः—"पूर्वं संकल्पमात्रेण मुक्तस्य सर्वकामावाप्तिरभिहिताऽनन्याधिपतित्वञ्चोक्तम् । तथा सतीदानीं विचार्यते । किं मुक्तस्य संकल्पमात्रेण परमपुरुषस्येव सर्वेश्वरत्वमपि प्राप्यते आहोस्वित् सर्वकामप्राप्तिरूपमैश्वर्यमेवेति संशये सर्वजगतामीश्वरत्वमपि । कुतः ? मुक्तत्वादनन्याधिपतित्वेनार्थात् सर्वाधिपतित्वोपपत्त्या परमेश्वरस्येव

सर्वनियन्तृत्वोपपत्तेः। "निरञ्जनः परमं साम्यमुपैति" इति परमपुरुष-साम्यापत्तिश्रवणाज्जगत्सृष्ट्यादिकर्तृत्वमपि मुक्तस्य सम्भवतीति प्राप्तेऽभिधीयते—जगद्व्यापारवर्ज्जमिति। जगद्व्यापारो जगदुत्पत्त्यादिकर्तृत्वं तच्चाशेषचेतनाचेतनस्वरूपपस्थितिप्रवृत्तिभेदनियमनं तद्वर्ज्जमविद्यातिरोधानराहित्यपूर्वकपरब्रह्माऽनुभवरूपम् "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति श्रुत्यभिहितसङ्कल्पमात्रेण सर्वकामावामिरूपं मुक्तस्यैश्वर्यमस्ति न तु जगदीश्वरत्वमपि, तत्तु परमपुरुषस्यासाधारणम्। कुतः? प्रकरणात्। 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्म।" (तै.३।१) इति परमात्मानमेव प्रकृत्याम्नातं न तु मुक्तात्मानम्। एवं "तदैक्षत बहुस्याम्प्रजायेयेति तत्तेजोऽसृजत" (छा० ६।२।३) इत्यादिप्रकरणान्तरेष्वपि ज्ञेयम्। असन्निहितत्वाच्चापि मुक्तस्य। न हि जगन्नियमनादिषु मुक्तस्य सान्निध्यमप्यस्ति येन तस्याप्ययं व्यापारः स्यात्।" (आनन्दभाष्य ४।४।१७) इति।

तस्मान्मुक्तो जीवो ब्रह्मभिन्न एव न तु ब्रह्मस्वरूप इति बोध्यम्।

नित्यमुक्तजीवाः

"यत्र पूर्वे साध्याः सन्ति देवाः" इत्यादिश्रुतिप्रतिपादिता हनुमदादयो नित्यमुक्तास्तु भगवत्प्रतिकूलाचरणाभावात् कदाचिदपि संसारं नाप्नुवन्ति। नित्यमुक्तानामवतारास्तु भगवदिच्छया स्वेच्छया वा भवन्ति। भगवन्नित्येच्छया सनातनत्वेन व्यवस्थापितास्तेषामधिकारविशेषा इति ध्येयम्।

उक्तं च जीवतत्त्वमधिकृत्याचार्यसार्वभौमैरानन्दभाष्यकारैर्भगवद्भिः श्रीरामानन्दाचार्यैर्वेदान्तसारे—

"नित्योऽज्ञश्चेतनोऽजः सततपरवशः सूक्ष्मतोऽत्यन्तसूक्ष्मो
भिन्नो बद्धादिभेदैः प्रतिकुणपमसौ नैकधा सूरिवर्यैः ।
श्रीशाक्रान्तालयस्थो निजकृतिफलभुक् तत्सहायोऽभिमानी
जीवः सम्प्रोच्यते श्रीहरिपदसुमते तत्त्वजिज्ञासुवेद्यः ॥" इति ।

इत्यनुभवानन्दद्वारपीठनामकश्रीरामानन्दपीठसंस्थापकैर्जगद्गुरु-
श्रीमदनुभवानन्दाचार्यैर्विरचिते श्रौतार्थसंग्रहे
जीवनिरूपणात्मकः प्रथमः परिच्छेदः ॥१॥

—*—

२—अथाचिदर्थनिरूपणम्

अथ क्रमप्राप्तमचित्तत्त्वमभिधीयते—

अचिन्नाम ज्ञानविरहितं तत्त्वम् । तच्चावस्थान्तरापत्तिरूपविकाराश्रयरूपमत एव द्रव्यम् । तद् द्विविधं जडाजडभेदात् । तत्र परप्रकाश्यं जडम् । तद्भिन्नमजडम् । अजडं द्विविधं पराक्प्रत्यग्भेदात् । तत्र स्वयंप्रकाशमानत्वे सति परस्मा एव भासमानत्वं पराक्त्वम् । परागपि द्विविधं शुद्धसत्त्वज्ञानभेदात् ।

शुद्धसत्त्वम्

शुद्धसत्त्वं नाम त्रिगुणभिन्नं शुद्धसत्त्वगुणाधिकरणमचिद्द्रव्यम् । तन्नित्यमजडमधःप्रदेशे परिच्छिन्नमूर्ध्वप्रदेशे चान्तरहितम् । "आदित्यवर्णं

तमसः परस्तात्" (श्वेता० ३।८) "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः" (नृ०पु० ५।१०) इत्यादिश्रुतयस्तत्र प्रमाणभूताः। तदीश्वरसंकल्पान्नित्यमुक्तेश्वराणां भोग्यभोगोपकरणभोगस्थानरूपं भवति। नित्यविभूतिनित्यधामपरमधामपरमव्योमाक्षरधामसाकेतादिशब्दाः शुद्धसत्त्वपर्यायाः।

ज्ञानम्

अर्थप्रकाशो ज्ञानम्। तच्च प्रभावद् द्रव्यगुणात्मकमजडं विभुद्रव्यम्। तच्चेश्वरस्य नित्यानां च सदैव विभु, मुक्तानां बद्धावस्थायां तिरोहितं मुक्तौ विभु बद्धानां तु तिरोहितमेव।

ज्ञानं हि नित्यं द्रव्यम् "न विज्ञातेर्विपरिलोपो विद्यते" (बृ० ४।३।३०) इतिश्रुतेः। 'ज्ञानमुत्पन्नम्' 'ज्ञानं नष्टम्' इत्यादिव्यवहारस्तु ज्ञानसम्बन्धिसंकोचविकासावस्थाहेतुक एवेति ध्येयम्। ज्ञानं, मतिः, प्रज्ञा, संवित्, धिषणा, धीः, मनीषा, शेमुषी, बुद्धिरित्यादयः शब्दा ज्ञानपर्यायाः।

परप्रकाश्यं जडमित्युक्तं प्राक्। जडं द्विविधं प्रकृतिकालभेदात्। तथा चोक्तं श्रौतसिद्धान्तविन्दुकारश्रीश्रुतानन्दाचार्यचरणैः—

अचिन्नाम तत्त्वं द्विधा ज्ञानशून्यं
जडञ्चाजडं नैव मिथ्या कदाचित्।
जडं मिश्रसत्त्वं तथा कालतत्त्वं
मनीषाऽजडं शुद्धरूपं च सत्वम् ॥इति॥

अत्र मिश्रसत्त्वपदेनाविद्यामायाद्यपरपर्याया प्रकृतिरुक्ता।

प्रकृतिः

प्रकृतिर्नाम सत्त्वरजस्तमोरूपगुणात्रयाश्रयरूपं द्रव्यम् । तत्र सत्त्वं नाम ज्ञानसुखतदुभयसङ्गोत्पादको गुणः । रजोनाम रागतृष्णाकर्मसङ्गोत्पादको गुणः । तमोनाम विपरीतज्ञानानवधानालस्यनिद्रोत्पादको गुणः । उक्तं च श्रौततत्वसमुच्चयकारैराचार्यसार्वभौमैर्भगवद्भिः श्रीराघवानन्दाचार्यैः—"तत्र सत्वं निर्मलत्वात् प्रकाशकमनामयम्। सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥ रजोरागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्। तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥ तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।" (गीता) इति भगवद्वचनप्रामाण्यात् सत्वं नाम ज्ञानस्य सुखस्य तदुभयसङ्गस्य च जनको गुणः । रजोनाम रागतृष्णाकर्मणां सङ्गानां जनको गुणः । तमोनाम विपरीतज्ञानानवधानालस्यनिद्राणां जनको गुणः । " (श्रौततत्त्वसमुच्चयः) इति ।

प्रलये प्रकृतेस्त्रयोऽपि गुणाः साम्यमापन्ना एव भवन्ति । 'तदैक्षत बहुस्याम्' इतीश्वरसङ्कल्पवशात् प्रकृतिर्गुणवैषम्यप्रयुक्तां कार्योन्मुखावस्थामवाप्याव्यक्तपदवाच्या भवति ।

महत्तत्त्वम

अव्यक्तपदवाच्यायाः प्रकृतेर्यः प्रथमो विकारः स महान् । स च त्रिविधः । सात्विकराजसतामसभेदात् ।

अहङ्कारः

महतः प्रथमो विकारोऽहङ्कारः । सोऽपि सात्विकादिभेदात् त्रिविधः । एते सात्विकराजसतामसाख्या अहङ्काराः क्रमाद् वैकारिकतैजसभूतशब्दैरप्यभिधीयन्ते ।

एकादशेन्द्रियाणि

राजसाहङ्कारसहकृतात् सात्विकाहङ्कारादेकादशेन्द्रियाणि जायन्ते। तानि द्विविधानि। ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च।

ज्ञानप्रसरणे शक्तानीन्द्रियाणि। ज्ञानेन्द्रियाणि। तानि षड्विधानि। मनः श्रोत्रं त्वक् चक्षू रसनं घ्राणञ्चेति।

तत्र स्मृत्यादिकरणमिन्द्रियं मनः। हृदयदेशवृत्तिः।

शब्दमात्रग्रहणसमर्थमिन्द्रियं श्रोत्रम्। कर्णशष्कुलीवृत्ति। सर्पाणां तु नेत्रगोलकवृत्ति।

स्पर्शमात्रग्रहणसमर्थमिन्द्रियं त्वक्। सर्वशरीरवृत्ति।

रूपमात्रग्रहणसमर्थमिन्द्रिय चक्षुः। नेत्रवृत्ति।

रसमात्रग्रहणसमर्थमिन्द्रियं रसनम्। जिह्वाग्रवृत्ति।

गन्धमात्रग्रहणसमर्थमिन्द्रियं घ्राणम्। नासाग्रवृत्ति।

उच्चारणाद्यन्यतमकर्मसमर्थानीन्द्रियाणि कर्मेन्द्रियाणि। तानि पञ्चविधानि वाक्पाणिपादपायूपस्थभेदात्।

तत्रोच्चारणकरणमिन्द्रियं वाक्। हृदयादिस्थानाष्टकवृत्तिः।

शिल्पादिकरणमिन्द्रियं पाणिः। अंगुल्यादिवृत्तिः।

सञ्चारकरणमिन्द्रियं पादः। चरणादिवृत्तिः।

मलोत्सर्जनकरणमिन्द्रियं पायुः। गुदादिवृत्तिः।

मैथुनकरणमिन्द्रियमुपस्थः। मेहनादिवृत्तिः।

तन्मात्रपञ्चकं भूतपञ्चकं च

राजसाहङ्कारसहकृतात् तामसाहङ्काराच्छब्दतन्मात्रमुत्पद्यते। तन्मात्रं नाम भूतोपादानं द्रव्यम्। तत् पञ्चविधं शब्दस्पर्शरूपरसगन्ध-

भेदात् । विशिष्टशब्दादिगुणाश्रयो भूतम् । तदपि पञ्चविधमाकाशवायुतेजोऽप्पृथिवीभेदात् ।

तत्र तामसाहङ्काराव्यवहितोत्तरावस्थाविशिष्टं द्रव्यं शब्दतन्मात्रम् । तस्मादाकाशमुत्पद्यते । रूपरहितं विशिष्टशब्दाधिकरणं द्रव्यमाकाशम् । तच्च शब्दगुणकम् ।

आकाशाव्यवहितोत्तरावस्थाविशिष्टं द्रव्यं स्पर्शतन्मात्रम् । तस्माद् वायुरुत्पद्यते । रूपरहितं विशिष्टस्पर्शवद् द्रव्यं वायुः । स च शब्दस्पर्शगुणकः । वायोः स्पर्शोऽनुष्णाशीतोऽस्तीति बोध्यम् । देहधारको वायुविशेषः प्राणः। स पञ्चविधः । प्राणापानव्यानोदानसमानभेदात् । तत्र प्राणो हृदयवृत्तिरपानो गुदवृत्तिर्व्यानः सर्वशरीरवृत्तिरुदानः कण्ठवृत्तिः समानश्च नाभिवृत्तिरिति बोध्यम् ।

वाय्वव्यवहितोत्तरावस्थाविशिष्टं द्रव्यं रूपतन्मात्रम् । तस्मात्तेज उत्पद्यते । उष्णस्पर्शवद्द्रव्यं तेजः । तच्च शब्दस्पर्शरूपगुणकम् । तेजसो रूपं भास्वरं शुक्लमिति बोध्यम् ।

तेजोऽव्यविहितोत्तरावस्थाविशिष्टं द्रव्यं रसतन्मात्रम् । तस्मादाप उत्पद्यन्ते । शीतस्पर्शवत्य आपः । शब्दस्पर्शरूपरसा अपां गुणाः अपां रूपमभास्वरं शुक्लं रसश्च मधुर इति बोध्यम् ।

अबव्यवहितोत्तरावस्थाविशिष्टं द्रव्यं गन्धतन्मात्रम् । तस्मात् पृथिव्युत्पद्यते । विशिष्टगन्धवद् द्रव्यं पृथिवी । सा च शब्दादिगुणपञ्चकशालिनी । पृथिव्यां स्पर्शोऽनुष्णाशीतो रूपं शुक्लरक्तकृष्णपीतेति चतुर्विधं रसो मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधो गन्धो सुरभ्य

सुरभीति द्विविधः । तत्र रूपमभास्वरशुक्लमिति बोध्यम् । पृथिव्या रूपरसगन्धस्पर्शाः पाकनिमित्तकाः ।

पञ्चीकरणम्

सर्वेश्वरो भगवान् श्रीरामो भूतसृष्टिं विधायैकैकस्य भूतस्य समानभागद्वयं कृत्वैकं विहायापरस्य समभागचतुष्टयं विधायककं तदर्धातिरिक्तेषु भूतार्धेषु संयोजयति । एतदेव भूतानां पञ्चीकरणम् । अत एवाकाशादिषु सर्वेषु भूतेषु शब्दादीनां सर्वेषां गुणानामुपलब्धिः । इत्थं सर्वभूतेषु सर्वभूतानां विद्यमानत्वेऽपि पृथिव्यादिव्यपदेशः स्वभागस्य भूयस्त्वादपरभागस्य चाल्पीयस्त्वादेवेति बोध्यम् । वेदे त्रिवृतकरणोपदेशः पञ्चीकरणसप्तीकरणयोरप्युपलक्षणम् ।

कालः

भूतादिव्यहारजनको गुणत्रयशून्यो जडद्रव्यविशेषः कालः । अखण्डकालो नित्यो विभुपरिमाणश्च । निमेषादिरूपस्त्वनित्यः ।

उक्तं चाचित्तत्त्वमधिकृत्यापरबोधायनाचार्यजगद्गुरुश्रीदेवानन्दाचार्यवेदान्तविद्यानिधिभिः प्रमिताक्षराकारैर्योगपञ्चके—

"चिदात्माभिहितो द्रव्यं चतुर्धाऽचिदचेतनम् ।
जीवेशयोर्गुणो ज्ञानमर्थाभासोऽजडं विभु ॥ १९ ॥
संकोच्यः कर्मणा नित्योऽन्तरङ्गं भक्तिसाधनम् ।
शुद्धसत्वगुणा नित्यविभूतिरजडा मता ॥२०॥
कालावश्या तथा विभ्वीभोग्यभोगस्थलादिका ।
सत्वादिस्हितः कालो विभुर्जडो हरेस्तनुः ॥२१॥

कालभिन्ना जडा नित्या प्रकृतिस्त्रिगुणाश्रयः ।
तद्विकारो महानाद्यस्तद्भेदाः सात्विकादयः ॥२२॥
सत्वादिगुणभेदेनाहङ्कारस्त्रिविधस्ततः ।
इन्द्रियाणि दशैकं च सात्विकाहंकृतेरथ ॥२३॥
तामसाहंकृतेश्चाथ राजससहंकारतः ।
जायते शब्दतन्मात्रं स्पर्शहेतुस्ततो नभः ॥२४॥
स्पर्शाद् वायुस्ततो रूपं रूपात् तेजस्ततो रसः ।
रसादापस्तथा चाद्भ्यो गन्धो जाता क्षितिस्ततः ॥२५॥
तन्मात्रं द्रव्यरूपं चाद्रव्यं शब्दादयो गुणाः ।
शब्दादयो गुणा भिन्नाः शब्दादिकतन्मात्रतः ॥२६॥
पञ्चीकृत्य च भूतेभ्यो रामो जगत् करोति हि ।
स एव रक्षति तद्वत् प्रलयं विदधात्यपि ॥२७॥
पञ्चीकरणतः पूर्वा सृष्टिः समष्टिरुच्यते ।
उत्तरा व्यष्टिसृष्टिस्तु क्रियते ब्रह्मदेहिना ”॥२८॥ इति ।

उक्तं च प्रकृतितत्त्वमधिकृत्याचार्यसार्वभौमैरानन्दभाष्यकारैर्भगवद्भिः श्रीरामानन्दाचार्यैर्वेदान्तसारे—

“पृष्टानामेकमाद्यं त्रिकमपि शृणु तद्भेदतो नामभेदै-
र्नित्याऽज्ञाऽचेतना सा प्रकृतिरविकृतिर्विश्वयोनिः शुभैका ।
नाना वर्णात्मकाजा त्रिगुणसुनिलयाऽव्यक्तशब्दाभिधेया
निर्व्यापारा परार्था महदहमितिसूरुच्यते तत्त्वविद्भिः ।।” इति ।

इत्यनुभवानन्दद्वारपीठनामकश्रीरामानन्दपीठसंस्थापकैर्जगद्गुरु—
श्रीमदनुभवानन्दाचार्यैर्विरचिते श्रौतार्थसंग्रहेऽचिदर्थ-
निरूपणात्मको द्वितीयः परिच्छेदः ॥ २ ॥

३–अथेश्वरार्थनिरूपणम्

ईश्वरस्तु विभुचेतनः। विशेषणानुपादाने जीवे विशेष्यानुपादाने कालेऽतिप्रसङ्गवारणायोभयोपादानम्। तत्र चेतनत्वं नाम ज्ञानाधिकरणत्वम्। विभुत्वं तु स्वरूपतो ज्ञानतः शरीरतश्च व्यापकत्वम्।

स ईश्वरः 'सत्वादयो न सन्तीशे यत्र तु प्राकृता गुणाः' इति वचनप्रमाण्याद्धेयप्राकृतगुणरहितः, 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकीज्ञानबलक्रिया च' इत्यादिश्रुतिप्रामाण्यान्निरुपाधिकानन्तकल्याणगुणविशिष्टः, 'आनन्दं ब्रह्म' 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिश्रुतेः सच्चिदानन्दरूपः, देशकालवस्तुपरिच्छेदशून्यात्मकानन्तत्वविशिष्टत्वादनन्तः, ब्रह्मशब्दवाच्यः, 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' 'यतो वा इमानि भूतानि जातानि....' इत्यादिश्रुतेरस्य जगतोऽभिन्ननिमित्तोपादानकारणरूपो भक्तिमुक्तिप्रदश्चास्ति।

ईश्वरस्य जगदुपादानत्वस्वीकारे निर्विकारत्वप्रतिपादकश्रुतिविरोधस्तु न शङ्कनीयस्तत्र सद्वारकोपादानताया एव स्वीकारात्। उक्तं च जगद्गुरुभिः श्रीश्रुतानन्दाचार्यैः–विकारञ्च रामो दयाब्धिस्तथात्वे दयाशून्यतां पक्षापातञ्च नैति। प्रकारे विकारस्तथा चित्रसृष्टौ च हेतुर्यतः प्राणिनां प्राच्यकर्म॥" इति।

"रमन्ते योगिनो यस्मिन् सत्यानन्दे चिदात्मनि। इति रामपदेनासौ परं ब्रह्माभिधीयते॥" (रामतापनीय) इतिश्रुतिप्रमाण्याद् ब्रह्मपदाभिधेयः स चेश्वरः श्रीराम एव।

"ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः। भगवच्छब्दवाच्यानि विना हेयर्गुणादिभिः॥" "तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः। शब्दोऽयं नोपचारेण अन्यत्र ह्युपचारतः॥" इत्यादिवचनप्रामाण्याद् भगशब्द-वाच्यज्ञानशक्तिबलैश्वर्यवीर्यतेजोरूपषड्विधैश्वर्यशालित्वात् स हि भगव-च्छब्दवाच्यश्च। उक्तं च बोधायनवृत्तिकारस्य श्रीपुरुषोत्तमाचार्यस्य शिष्यवर्यैः श्रीगङ्गधराचार्यैः-"ज्ञानशक्तिबलश्वयवीर्यतेजांसि षड्गुणाः। भगत्वेनेरिताः सन्ति श्रीरामे भगवान् स तत्॥ श्रीरामे भगवच्छब्दो मुख्यवृत्त्या प्रवर्त्तते। गौण एव स चान्यत्र षड्विधैश्वर्यलेशतः॥" (श्रीरामभगवत्त्वम्) इति।

'नित्यो नित्यानाम्' इत्यादिश्रुतिप्रामाण्यात् स चेश्वरो नित्यः "यदा पश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिम्" (मु० ३।१।३) इत्यादिश्रुतेर्दिव्यमङ्गलविग्रहश्चास्ति। अत एवोक्तं भगवद्भिरान-न्दभाष्यकारैः श्रीरामानन्दाचार्यैराचार्यसार्वभौमैः—"अतएव श्रुत्युपबृं-हणीभूतेतिहासपुराणादिषु बहुशस्तत्र तत्र भगवतो दिव्यमङ्गलविग्रह-स्योपवर्णनं सङ्गच्छते।" (आनन्दभाष्य १।१।२१) इति।

स च सर्वेश्वरो भगवान् श्रीरामः परव्यूहविभवान्तर्याम्यर्चावता-ररूपेण पञ्चधा स्थित। तथा चागमः—

"मम प्रकाराः पञ्चेति प्राहुर्वेदान्तपारगाः।
परो व्यूहश्च विभवो नियन्ता सर्वदेहिनाम्॥
अर्चावतारश्च तथा दयालुः पुरुषाकृतिः।

इत्येवं पञ्चधा प्राहुर्मां रहस्यविदो जना ॥" इति
(विष्वक्सेनसंहिता)

समुदीरितश्चैतदीश्वरतत्त्वमधिकृत्य प्रमेयोद्देश–
भास्करे सिद्धान्तवाचस्पतिजगद्गुरुश्रीचिदानन्दाचार्यैः—
"रामश्च ब्रह्मकर्त्ता हि विष्णुत्वमुपजिग्मिवान् ।
परव्यूहादिरूपेण सीतानाथश्च पञ्चधा ॥७४॥
परश्च परलोके हि साकेते सोऽधिराजते ।
दिव्यदेहगुणो नित्यो दिव्यशस्त्रास्त्रभूषणः ॥७५॥
अनन्तकरुणावत्या सीतया जगदम्बया ।
सिंहासने समासीनो दिव्ये दिव्यपुरे परे ॥७६॥
सर्वज्ञः सर्वशक्तिश्च भगवान् करुणाम्बुधिः ।
नित्यमुक्तैः स्तुतश्चाथ वेदेवेद्यः परात्परः ॥७७॥
व्यूहतां याति रामश्च सृष्ट्याद्यर्थमुपासितुम् ।
चतुर्धा च मतो व्यूहो वासुदेवादिभेदतः ॥७८॥
वासुदेवात् त्रिधा व्यूहा भवन्ति केशवादयः ।
सङ्कर्षणाच्च गोविन्दादयस्त्रिधा भवन्ति हि ॥७९॥
प्रद्युम्नाच्च त्रिधा व्यूहा ऋषीकेशादयो मताः ।
भवन्त्यथानिरुद्धाच्च त्रयः श्रीवामनादयः ॥८०॥
रामः सर्वावताराणामवतारी समीरितः ।
परित्राणं च साधूनामवतारप्रयोजनम् ॥८१॥
सर्वेभ्यश्चाभयं दत्ते रामः सकृत् प्रपत्तितः ।
स्वाश्रितस्यापराधांश्च रामः स्मरति नैव हि ॥८२॥

साक्षाद गौणस्तथाऽऽवेश इत्येवं विभवास्त्रयः ।
मुख्यमुख्यतरत्वादिभेदात् साक्षात् त्रिधा मतः ॥८३॥
नृसिंहवामनभेदाद् द्विधा मुख्यः प्रकीर्त्तितः ।
मुख्यतरश्च श्रीकृष्णो रामो मुख्यतमस्तथा ॥८४॥
मत्स्यकूर्मादिभेदैश्च मतो गौणस्त्वनेकधा ।
कलास्वरूपशक्तीनामावेशात् त्रिविधोऽन्तिमः ॥८५॥
विभवाश्च कलावेशात् पृथुधन्वन्तरादयः ।
शुद्धावेशस्तथाऽशुद्धावेशो द्विधा च मध्यमः ॥८६॥
शुद्धावेशाश्च विज्ञेयाः श्रीव्यासकपिलादयः ।
मता परशुरामादावशुद्धावेशिता बुधैः ॥८७॥
शक्त्यावेशो द्विधा शुद्धाशुद्धत्वभेदतो मतः ।
आदिमोऽपि द्विधा मुख्यगौणभेदात् प्रकीर्त्तितः ॥८८॥
हंसादयो मता मुख्या गौणा बुद्धादयो मताः ।
अन्तिमोऽपि द्विधा मुख्यगौणभेदादुदीरितः ॥८९॥
तत्रऽब्रह्मादयो मुख्या गौणा मन्वादयो मताः ।
अन्तर्यामी द्विधा मूर्त्तामूर्त्तभेदात् प्रभाषितः ॥९०॥
स्थापितो वैष्णवैर्मन्त्रैश्चतुर्धाऽर्चावतारकः ।
स्वयं व्यक्तश्च दैवश्च सैद्धश्च मानुषः खलु ॥९१॥ इति ।

तत्र परो नाम नित्यधाम्नि श्रीसाकेते जगज्जनन्या श्रीसीताम्बया सह दिव्यसिंहासनोपरि विराजमानो दिव्यायुधालंकारविशिष्टविग्रहशाली नित्यं नित्यमुक्तपरिसेवमानः । सर्वावतारी परिपूर्णब्रह्म भगवान् श्रीरामः ।

जगत् स्रष्टुमुपासितुं च वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धरूपेण चतुर्धाऽवस्थितो भगवान् श्रीरामो व्यूहः । तत्र वासुदेवे ज्ञानशक्त्यादिगुणषट्कं सङ्कर्षणे ज्ञानबलद्वयं प्रद्युम्ने वीर्यैश्वर्यद्वयमनिरुद्धे च तेजःशक्तिद्वयं वर्त्तते ।

मत्स्यादितत्तत्सजातीयरूपेण स्वेच्छयाविर्भूतो भगवान् श्रीरामो विभवः ।

योगदृष्ट्याऽनुभूयमानः सर्वत्र सर्वदा सर्वथा च जीवस्य परमसुहृद्रूपेण हृदयस्थितो भगवान् श्रीरामोऽन्तर्यामी ।

देशकालादिनियमविहीनस्तत्तत्स्थले भक्ताभिमतहिरण्यादिशरीरेऽप्राकृतशरीरविशिष्टरूपेण वर्त्तमानः स्नानभोजनादिष्वर्चकायत्ततां गतो मूर्तिविशेषरूपो भगवान् श्रीरामोऽर्चावतारः ।

उक्तं चेश्वरतत्त्वमधिकृत्याचार्यसार्वभौमैरानन्दभाष्यकारै र्भगवद्भिः श्रीरामानन्दाचार्यैर्वेदान्तसारे --

"विश्वं जातं यतोऽद्धा यदवितमखिलं लीनमप्यस्ति यस्मिन्
सूर्यो यत्तेजसेन्दुः सकलमविरतं भासयत्येतदेषः ।
यद्भीत्या वाति वातोऽवनिरपि सुतलं याति नैवेश्वरो ज्ञः
साक्षी कूटस्थ एको बहुशुभगुणवानव्ययो विश्वभर्त्ता ॥३॥
श्रीमानर्च्यः शरण्यो बहुविधविबुधैर्योगिगम्यांघ्रिपद्मो
ऽस्पृश्यः क्लेशादिभिः सत्समुदितसुयशाः सूरिमान्यो वदान्यः ।
शश्वच्छ्रीरामचन्द्रः सुमहितमहिमा साधुवेदैरशेषै—
र्निर्मृत्युः सर्वशक्तिर्विकलुषविजरो गीर्मनोभ्यामगम्यः" ॥४॥

इति ।

इत्यनुभवानन्दद्वारपीठनामकश्रीरामानन्दपीठसंस्थापकैर्जगद्-
गुरुश्रीमदनुभवानन्दाचार्यैर्विरचिते श्रौतार्थसंग्रह
ईश्वरार्थनिरूपणात्मकस्तृतीयः परिच्छेदः ॥३॥

समाप्तोऽयं ग्रन्थः ।

जगद्गुरुश्रीअनुभवानन्दाचार्यविरचिता
श्रीरामचन्द्रविंशतिः

रामं ब्रह्म तथानन्दभाष्यकारं जगद्गुरुम् ।
नत्वा करोमि भावार्थं श्रीरामचन्द्रविंशतिम् ॥
सोदरहृतराज्यश्रीः सुग्रीवः सह मन्त्रिभिः ।
यस्य चाश्रितवान् पादं रामचन्द्रं नमामि तम् ॥१॥
रावणन्यक्कृतो दान्तो विभीषणो भियाकुलः ।
स्वजनैर्यत्पदं चागाद् रामचन्द्रं नमामि तम् ॥२॥
रक्षोघिनाथसंक्षुब्धा सीता स्मृतवती च यम् ।
स्वभक्तवन्दितं नित्यं रामचन्द्रं नमामि तम् ॥३॥
चन्द्रांशुशोभिते रम्ये पुरा सरोवरोत्तमे ।
सस्मार यं गजो मुक्त्यै रामचन्द्रं नमामि तम् ॥४॥
पतिव्रता शिरोरत्नं गौतमधर्मचारिणी ।
अस्मरच्छापमुक्त्यै यं रामचन्द्रं नमामि तम् ॥५॥
कालिन्दीपुलिने रम्ये ध्रुवः सस्मार यं मुदा ।
लोकोत्तरपदप्राप्त्यै रामचन्द्रं नमामि तम् ॥६॥

दोनाऽप्राप्तसहाया च कृष्णा सस्मार यं प्रभुम् ।
दयालुं कृष्णरूपं श्रीरामचन्द्रं नमामि तम् ॥७॥

जनकजनितक्लेशात् कयाधूनन्दनश्च यम् ।
दीनानाथेति सस्मार रामचन्द्रं नमामि तम् ॥८॥

यस्त्राता वेदशास्त्राणां दण्डकवनपाव ।
स्वभक्तवन्दितं शान्तं रामचन्द्रं नमामि तम् ॥९॥

नक्तञ्चरसमूहाश्च वेदमार्गावदूषकाः ।
मुक्ताश्च दर्शनाद् यस्य रामचन्द्रं नमामि तम् ॥१०॥

रावणभग्नपक्षश्च जटायुर्मांसभोजनः ।
यं दृष्ट्वा सद्गतिं लेभे रामचन्द्रं नमामि तम् ॥११॥

स्वधर्मत्यागतो भ्रष्टोऽजामिलः पुत्रव्याजतः ।
यन्नामस्मरणान्मुक्तो रामचन्द्रं नमामि तम् ॥१२॥

बाली बालरविप्रख्यं यत्पदं च पुरःस्थितम् ।
ध्यायन् मोक्षपदं लेभे रामचन्द्रं नमामि तम् ॥१३॥

त्यक्त्वा सर्वाणि कृत्यानि शरभंगस्तपोधनः ।
नत्वा यं च गतो मुक्तिं रामचन्द्रं नमामि तम् ॥१४॥

यच्चरणाम्बुजोद्भूता गंगा दुर्गतिनाशिनी ।
तापत्रयविनाशित्री रामचन्द्रं नमामि तम् ॥१५॥

सुगतिं शवरी लेभे निगमकर्मगर्हिता ।
आतिथ्यकरणाद यस्य रामचन्द्रं नमामि तम् ॥१६॥

ध्यायन् यस्य पदाम्भोजं भरतः साश्रुलोचनः ।
अवसत् त्यक्तराज्यश्री रामचन्द्रं नमामि तम् ॥१७॥

गुहराजोऽप्यहन् पापं यच्चरणाम्बुपानतः ।
भवदारिद्र्यहन्तारं रामचन्द्रं नमामि तम् ॥१८॥

उपादानं निमित्तंच जगतोऽस्य प्रभुः परः ।
ध्येयोऽमोघश्च वन्द्यो यो रामचन्द्रं नमामि तम् ॥१९॥

मुच्यते स्मरणाद्यस्य सद्यो भवभिया नरः ।
ब्रह्मेशाद्यमरैर्वन्द्यं रामचन्द्रं नमामि तम् ॥२०॥

रामानन्दप्रशिष्येणानुभवार्येण निर्मिता ।
पठतां ध्वान्तहृद् भूयाच्छ्रीरामचन्द्रविंशतिः ॥

—०—

श्रीजानकीशो विजयतेतराम् ।
आनन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्याय नमः ।
श्रीअनुभवानन्दद्वारपीठसंस्थापक—
जगद्गुरुश्रीअनुभवानन्दाचार्यप्रणीता

श्रीगीतार्थसुधा

उत्पत्त्यादिविधायकं च जगतो हेतुं परं चेश्वरं
जीवाजीवशरीरिणं सुशरणं भक्त्यैव सायुज्यदम् ॥
निर्दोषं सुगुणाकरं निखिलविद्वेदान्तगम्यं विभुं
गीतोक्तं वरदं नतोऽस्मि करुणाम्भोधिं प्रभुं राघवम् ॥१॥

नत्वा गुरुं तथाऽऽनन्दभाष्यकारं जगद्गुरुम् ।
करोम्यनुभवानन्दः सुधां मृत्युविनाशिनीम् ॥२॥

कर्मज्ञानप्रसाध्या भगवति परमा भक्तिरेकोऽभ्युपायः
श्रेष्ठो मोक्षस्य वाच्यो मतमितिविदितं ज्ञापयिष्यन्मुकुन्दः ।
धर्माधर्मप्रसंगाद् विकलितमनसं पार्थमुद्दिश्य गीता-
माहोपोद्घातरूपः सुदृढमभिहितस्तत्र चाद्यः प्रपाठः ॥३॥

प्रोक्तौ देहात्मबुद्ध्या स्वजनममतया बालिशे मोहशोकौ
क्षीयेते तौ च बोधात् फलमतिरहितात् कर्मणः सोऽपि सिध्येत् ।
तस्माद् भक्तिः परेशे नियमितमनसा प्राप्यते सत्त्ववृद्ध्या
तस्याः शान्तिर्ध्रुवात्मा फलमिदमशिषत् कृष्णचन्द्रो द्वितीये ॥४॥

ज्ञानं कर्मेति निष्ठाद्वयमिह जगति प्राहुराम्नायविज्ञाः
कर्मारम्भं विहाय क्षणमपि भजते नैव कश्चित् प्रशान्तिम् ।
तस्मात् कर्मानुवृत्तिर्भगवति मनसा न्यस्य कर्माणि सम्यक्
कर्त्तव्या पुण्यपुंसा गलितफलतृषा प्रोक्तमेतत् तृतीये ॥५॥

प्रोक्ता कर्मप्रसंगान्निजविभवकथा नित्यकर्माणि पश्चात्
कर्माकर्मस्वरूपं मतिसृतिमशिषत् कर्मभिः सम्प्रवृत्ताम् ।
यज्ञानां द्वादशानामनुकथनमितो ज्ञानयज्ञस्य मौल्यं
ज्ञानाग्निर्नाशयत्येव वृजिननिचयं तूर्य इत्यभ्यधत्त ॥६॥

ज्ञानाकारं विधत्ते श्रुतिविदितफलं कर्म सम्पच्यमानं
सन्यासस्तस्य नेष्टः सममतिरुदिता ह्यात्मलब्धेरुपायः ।

भोगानां दुःखदत्त्वाद्विरतिरतितरां पण्डितैस्तेभ्य इष्टा
स्वर्थानेतानवादीत् प्रणतसुरतरुः पञ्चमे वासुदेवः ॥७॥

योगाभ्यासस्य रीतिर्विरतिरतिशया संसृतेर्मोहजाला-
च्चातुर्विध्यं प्रतीतं सममतिरधिको योगिनां तत्र चोक्तः ।
योगस्योत्कृष्टसिद्धिः परगतिफलका श्रद्धया यः स युक्तो
योगिवेष्तेषु चेडच भजति हरिमिति प्राह षष्ठे पदार्थान् ॥८॥

याथार्थ्यं स्वस्य चोक्तं जगति जनचयो मायया मोहमाप्त-
स्तामेतां तर्तुकामैः स्वरिपुचरणे सुप्रपत्तिर्विधेया ।
सेवा देवान्तराणां परिमितफलदा नैव कार्या प्रपन्नै-
र्ज्ञानी श्रेष्ठः समेषामितिमतमवदत् सप्तमे श्रीमुकुन्दः ॥९॥

प्रश्नाः पार्थस्य सप्त प्रतिवचनमथो वर्णनं चान्तिमस्य
ब्रह्माऽनुध्यानतोऽद्धा ह्यसुगतिसमये ब्रह्मभावं सदैति ।
क्षेत्रज्ञस्याप्युपास्तौ प्रकृतिविरहिणः सद्गतिः सैव शुक्ला
हेतुर्नैवागतेः सा सृतिरितिभगवानष्टमे स्पष्टमाख्यत् ॥१०॥

माहात्म्यं स्वस्य दिव्यं जगति भगवतो व्याप्तिरन्तः समस्मिन्
भक्त्याराध्यः परेशः सुमहितमनसां लक्षणं कार्यमेषाम् ।
आवृत्तिश्चात्र भूयो विलयमुपगते कर्मिणां स्वर्गलोके
ब्रह्मोपास्तेः स्वरूपं ततमिति नवमे प्रादिशद् देवदेवः ॥११॥

व्याप्तं विश्वं समस्तं किल चरमचरं येन सर्वाधिपेना-
त्रासीमैश्वर्यशाली विमलगुणनिधिर्यः स्वतन्त्रः परात्मा ।

यत्स्वायत्तस्वरूपस्थितिगतिरुदिता यद्विभूतिस्त्वनन्ता
सर्वात्मा सोऽयमेकः प्रभुरितिदशमे निश्चिकायादिदेवः ॥१२॥

पार्थश्चैशं दिदृक्षुर्हि वपुरतिततं चर्मचक्षुर्न योग्यं
तस्मै दत्त्वा तु दिव्यं स्मयभयजनकं दर्शयामास कृष्णः ।
मेघान् विद्युन्महीध्रान् क्षितिजलधियुतान् सूर्यचन्द्रादिदेवान्
दृष्ट्वा देवस्य देहे शरणमुपगतोऽवोचदेकादशेऽर्थान् ॥१३॥

श्रेष्ठोपायस्तु मुक्तेर्भगवति सुदृढा प्रीतिरेकैव शुद्धा
तत्राशक्तस्य कर्मण्यभिरुचिरुचिता ह्यात्मनिष्ठस्य पुंसः ।
आत्मोपास्तेः प्रकारा अतिरतिमदिशत् स्वस्य भक्ते परेशः
स्वार्थानेतानवादीच्छ्रुतजनरतिकृद् द्वादशे च प्रपाठे ॥१४॥

क्षेत्रक्षेत्रज्ञरूपं प्रकृतिपुरुषयोर्भेद आत्मस्वरूप–
ज्ञानोपायास्तथाऽत्र त्रिगुणपुरुषयोर्योगतो विश्वसृष्टिः ।
कर्तृत्वे हेतुरेका प्रकृतिरथ पुमान् भोक्तृभावे च हेतु–
र्बन्धोच्छेदो विवेकात् त्रिसहितदशमे शौरिणोक्ता इमेऽर्थाः ॥१५॥

सूते विश्वं समस्तं प्रकृतिरनुपमा ब्रह्मस्वायत्तमूर्तिः
सत्वादीनां त्रयाणां प्रकृतिगुणतया देहिनो बन्धकत्वम् ।
लिङ्गं कार्यञ्च तेषां खलु मतिकृतिभिर्दर्शितं तत्कृतोऽयं
बन्धो भक्त्या प्रहेयो द्विगुणित उदिताः सप्तकेऽर्था मुदैते ॥१६॥

संसारोऽश्वत्थवृक्षः श्रुतिविदितपदोऽव्यक्तमूलश्च तं वै
छित्वाऽसङ्गाख्यहेत्या प्रपदनमनिशं राघवेशे विधेयम् ।

बद्धान्मुक्तात् परश्चोत्तमपुरुष इति ख्यात ईशः स्वतन्त्रो
भर्त्ता चास्म्येक एवावददिति दशमे पञ्चयुक्तेऽर्थजातम् ॥१७॥

दैवी सम्पज्जनानां भवति सुकृतिनां मुक्तये कर्मबन्धा–
न्नित्यं बन्धाय लोके कुटिलमतिजुषामासुरी सा दुरन्ता ।
कार्याकार्यव्यवस्थां दिशति हिततमं शास्त्रमेतस्य त्याग–
श्चासुर्या मूलमुक्तं निरयफलमिमे षोडशे वर्णितार्थाः ॥१८॥

वैधं शास्त्रीयकर्म त्रिगुणपरवशं यज्ञदाने तपश्च
त्रैविध्यं तस्य वेद्यं सुकृतियुतनरैः सात्विकैः सात्विकं वै ।
ग्राह्यं नैवासुरं तत् खलु फलरहितं लक्षणं तस्य सम्यक्
श्रीमत्कृष्णेन चोक्तं वरमिह दशमे सप्तयुक्ते प्रपाठे ॥१९॥

सन्यासः त्यागरूपो जगति मनुजैः सत्वमालम्बनीयं
सीतानाथः परेशोऽमलगुणजलधिर्दिव्यदेहोऽवतारी ।
सर्वज्ञः सर्वशक्तिः कृतिचयफलदः कर्मणां संविधाता
सायुज्यं तत्प्रपत्त्या भवति तनुभृतां प्रोक्तमन्त्येऽत्र चैतत् ॥२०॥

श्रीगीतार्थसुधा चैषाऽनुभावानन्दनिर्मिता ।
जन्ममृत्युविनाशाय भूयान्मननशालिनाम् ॥२१॥

(स्वशताब्दीमहोत्सवे जगद्गुरुश्रीअनुभवानन्दाचार्योपदिष्टः प्रबन्धः)

—•—

श्रीसीतारामाभ्यां नमः ।

प्रतिपक्षिभयङ्करजगद्गुरुश्रीहर्यानन्दाचार्य-

सिद्धशिरोमणिप्रणीता

प्रमाणदीपिका

(स्वशताब्दीमहोत्सवे श्रीहर्यानन्दाचार्योपदिष्टः प्रबन्धः)

रामं सीतां तथाचार्यं श्रियानन्दं प्रणम्य च ।
प्रमाणानां प्रकाशाय कुर्वे प्रमाणदीपिकाम् ॥१॥

अथ प्रत्यक्षप्रमाणमयूखः

चिदचिदीशतत्त्वानां ज्ञानं प्रामाणिकं च यत् ।
मोक्षस्य साधनं तद्धि 'भोक्ता भोग्यमि'तिश्रुतेः ॥२॥

प्रमायाः करणं तत्र प्रमाणं सम्मतं बुधैः ।
अबाधव्यवहारस्यानुगुणा तु मतिः प्रमा ॥३॥

करणं चावगन्तव्यं व्यापारशालि कारणम् ।
त्रिधा प्रमाणमध्यक्षानुमानशब्दभेदतः ॥४॥

सम्भवस्योपमानस्य चार्थापत्तेस्तथैव हि ।
अन्तर्भावोनुऽमाने तु तत्त्वज्ञैरुररीकृतः ॥५॥

ऐतिह्यमाप्तमूलं यच्छब्दे चान्तर्भवत्यदः ।
अनुमानाङ्गतर्कस्य मन्यते स्वाङ्गिरूपता ॥६॥

भावान्तरेण चभावप्रतीतिरुपपद्यते ।
अभावाख्यः पदार्थश्चातिरिक्तो मन्यते न तत् ॥७॥

अतिरिक्तं प्रमाणं तन्नानुपलब्धिनामकम् ।
अभावसाधकत्वेन प्रमाणज्ञैर्हि मन्यते ॥८॥

अनुमाध्यक्षशाब्दीतिभेदात् त्रिधा मता प्रमा ।
ज्ञानाकरणकं ज्ञानं प्रत्यक्षत्वेन सम्मतम् ॥९॥

प्रत्यक्षं द्विविधं चाथ तत्राद्यं निर्विकल्पकम् ।
अनेकवृत्तिजात्याद्यविषया शेमुषी च तत् ॥१०॥

प्रत्यक्षं चापरं प्रोक्तं विद्वद्भिः सविकल्पकम् ।
अनेकवृत्तिजात्यादिविषया शेमुषी च तत् ॥११॥

प्रत्यक्षं द्विविधं चैतद् द्वैविध्यं च गतं पुनः ।
अर्वाचीनमथानर्वाचीनञ्चेतिविभेदतः ॥१२॥

एकमिन्द्रियसापेक्षमपरं तद्विलक्षणम् ।
स्वयंसिद्धं च दिव्यं च द्विविधमादिमं तथा ॥१३॥

योगजन्यं च तत्राद्यं परञ्चेशप्रसादजम् ।
प्रत्यक्षानुभवे तत्र करणमिन्द्रियं मतम् ॥१४॥

व्यापारस्तत्र संयोगः संयुक्ताश्रयणं तथा ।
अर्वाचीनेतरद् बोध्यं प्रत्यक्षमीशमुक्तयोः ॥१५॥

पूर्वानुभवतश्चात्र संस्कृतिरुपजायते ।
सदृशादृष्टचिन्ताद्यैरुद्बुद्धा संस्कृतिर्भवेत् ॥१६॥

उद्बुद्धसंस्कृतेर्जाता स्मृतिः प्रत्यक्षमेव हि ।
प्रतिभाप्रत्यभिज्ञे च प्रत्यक्षे एव सम्मते ॥१७॥

'यथार्थं सर्वविज्ञानमिति वेदविदां मतम् ।
शुक्तावपि हि रौप्यांशाः पञ्चीकरणतो मताः ॥१८॥

शुक्तिरौप्यमतेस्तस्मात् सत्यालम्बनता मता ।
शुक्तिरौप्यमतिर्भ्रान्ता रौप्यांशाल्पत्वहेतुतः ॥१९॥

इतिप्रतिपक्षिभयङ्करजगद्गुरुश्रीहर्यानन्दाचार्य-
सिद्धशिरोमणिप्रणीतायां प्रमाणदीपिकायां
प्रत्यक्षप्रमाणनिरूपणाख्यः
प्रथमो मयूखः ॥१॥

अथानुमानप्रमाणमयूखः

अनुमाकरणं चाथानुमानं परिकीर्तितम् ।
साधकतममेवात्र करणं प्राज्ञसम्मतम् ॥१॥

ततो लिङ्गपरामर्शोऽनुमायां करणं मतम् ।
व्याप्यस्य पक्षवृत्तित्वधीः परामर्शनामिका ॥२॥

तज्जा चानुमितिः पक्षे साध्यबुद्धिर्मता बुधैः ।
साध्याधारस्थता हेतौ व्याप्तिः प्राज्ञैः प्रकीर्तिता ॥३॥

साहचर्यस्य भूयिष्ठदर्शनाद् व्याप्तिधीर्भवेत् ।
तद्दर्शनं सपक्षे हि भवेन्निश्चितसाध्यके ॥४॥

साध्यशून्यो विपक्षश्च पक्षः सन्दिग्धसाध्यकः ।
अन्वयव्यतिरेकी हि हेतुश्च केवलान्वयी ॥५॥

यत्सत्त्वे खलु यत्सत्त्वमन्वयव्याप्तिरीरिता ।
यच्छून्यत्वं च यच्छून्येऽभावव्याप्तिर्हि साधने ॥६॥

अन्वयव्याप्तितश्चाथान्वयी हेतुर्बुधैर्मतः ।
अभावव्याप्तितो हेतुर्व्यतिरेकी समीरितः ॥७॥
सिद्धान्ते द्विविधश्चैव सद्धेतुर्बुधसम्मतः ।
केवलव्यतिरेकी तु सिद्धान्ते मन्यते न हि ॥८॥
उभे चात्रानुमानाङ्गे व्याप्तिश्च पक्षधर्मता ।
द्वयोरन्यतरस्याथ विरहे हेतुदुष्टता ॥९॥
व्यभिचारी विरुद्धोऽथासिद्धः सत्प्रतिपक्षकः ।
बाधितश्चेति पञ्चापि हेत्वाभासाः प्रकीर्त्तिताः ॥१०॥
हेतुश्च व्यभिचारी हि स्वस्थानातिक्रमे भवेत् ।
स ह्यनैकान्तिकश्चाथ द्विविधः परिकीर्तितः ॥११॥
विपक्षेऽपि स्थितश्चेत् स साधारणो मतस्तदा ।
बुधैः सपक्षमात्रस्थोऽसाधारण उदाहृतः ॥१२॥
साध्याभावेन स व्याप्तो विरुद्धत्वेन सम्मतः ।
आदिमस्त्रिष्वसिध्देष्वाश्रयासिद्धः समीरितः ॥१३॥
पक्षश्च पक्षताऽवच्छेदकशून्यश्च तत्र हि ।
पक्षे च हेतुराहित्यं स्वरूपासिद्धता स्मृता ॥१४॥
व्यप्यत्वासिद्धता चात्र द्विधा प्राज्ञैः समर्थिता ।
व्याप्तिग्राहकमानस्य शून्यत्वात् तत्र चादिमा ॥१५॥
हेतावुपाधिसत्त्वाच्च द्वितीया सम्मता बुधैः ।
साध्यव्यापकतायां च साधनाव्यापकत्वकम् ॥१६॥

उपाधित्वेन सम्प्रोक्तं हेतोः परमदूषणम् ।
प्रतिपक्षस्य सत्त्वे तु हेतोः सत्प्रतिपक्षता ॥१७॥

यस्य प्रबलमानेन साध्याभावो विनिश्चितः ।
दार्शनिकैः स हेतुर्हि बाधितः सम्प्रकीर्तितः ॥१८॥

अनुमानं द्विधा स्वार्थं परार्थं :चेति भेदतः ।
स्वार्थेन स्वानुमा चात्र परार्थेन परानुमा ॥१९॥

न्यायजस्तु परामर्शः परानुमितिकारणम् ।
न्यायस्तत्र प्रतिज्ञाद्यवयवपञ्चकं मतः ॥२०॥

प्रतिज्ञा साध्यनिर्देशो हेतूक्तेर्हेतुता तथा ।
व्याप्तिनिर्देशपूर्वा हि दृष्टान्तोक्तिरुदाहृता ॥२१॥

व्याप्यस्य पक्षवृत्तित्वबोधश्चोपनयो मतः ।
निगमनं तु साध्यस्योपसंहारवचः खलु ॥२२॥

नैयायिका भवन्त्येतत्पञ्चावयववादिनः ।
वेदान्तिनो वदन्त्येष्वनुमासिद्धौ यथारुचि ॥२३॥

इति प्रतिपक्षिभयङ्करजगद्गुरुश्रीहर्यानन्दाचार्य—
सिद्धाशिरोमणिप्रणीतायां प्रमाणदीपिकाया—
मनुमानप्रमाणनिरूपणाख्यो
द्वितीयो मयूखः ॥२॥

अथ शब्दप्रमाणमयूखः

अनाप्तानुक्तवाक्यस्य शब्दप्रमाणता मता ।
द्वारं पदार्थबुद्धिश्च शक्तिधीः सहकारिणी ॥१॥

वाक्यं पदसमूहश्च शक्तं पदतया मतम् ।
अभिधाख्या च शक्तिर्हि वेदस्यार्थावबोधिता ॥२॥

मुख्या वृत्तिः पदस्यार्थे सव प्राज्ञैरुदीरिता ।
घटेत्युक्ते घटे चैवं शक्तिर्घटपदस्य हि ॥३॥

सम्बन्धोऽभिहितः प्राज्ञैर्वृत्तिः पदपदार्थयोः ।
मुख्यार्थस्य हि बाधे तु वृत्तिर्मतौपचारिकी ॥४॥

गौणी च लक्षणा चेति भेदात् सा द्विविधा पुनः ।
शक्यस्य गुणवत्त्वेन त्वाद्या वृत्तिर्मता बुधैः ॥५॥

लक्षणा शक्यसम्बन्धः साऽन्वयानुपपत्तितः ।
जहदथाजहच्चेति द्विधा सा परिकीर्त्तिता ॥६॥

आकांक्षायोग्यताऽऽसत्तिमद् वाक्यं हि प्रमापकम् ।
प्रमाणमखिलो वेदः सिद्धे व्युत्पत्तिसम्भवात् ॥७॥

भागद्वयं हि वेदस्य कर्मब्रह्माभिधायकम् ।
तत्राद्ये कथितं कर्म ब्रह्माराधनलक्षणम् ॥८॥

शास्त्रे हि पूर्वमीमांसाऽऽख्येऽस्य शंकाः समाहिताः ।
ब्रह्मणो वर्णितं चान्त्ये स्वरूपं च गुणादिकम् ॥९॥

एतच्छङ्कासमाधानं मीमांसा चोत्तरा मता ।
मता मीमांसयोस्तस्मादुभयोरेकशास्त्रता ॥१०॥

विध्यर्थवादमन्त्रेतिभेदाद् वेदस्त्रिधा मतः ।
सम्मतस्तत्र विद्वद्भिर्विधिवाक्यं प्रवर्त्तकम् ॥११॥

विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ॥१२॥

इत्येवं हि विधिः प्राज्ञैस्त्रिविधः सम्प्रकीर्त्तितः ।
नित्यो नैमित्तिकः काम्यश्चापि भेदा विधेर्मताः ॥१३॥

प्रवृत्त्युत्तम्भकं वाक्यमर्थवादतया मतम् ।
मन्त्रत्वेन मतो वेदोऽनुष्ठेयार्थप्रकाशकः ॥१४॥

शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा ।
कल्पश्चेति षडङ्गानि वेदस्योक्तानि वैदिकैः ॥१५॥

पूर्वक्रमविशिष्टा हि वेदाश्चेशसमीरिताः ।
नित्या अपौरुषेयास्ते तस्माद् बुधैश्च सम्मताः ॥१६॥

नित्यो वेदश्च निर्दोषो वक्त्रभावाद्धि सम्मतः ।
प्रामाण्यं हि बुधैर्वेदे स्वीकृतं स्वत एव तत् ॥१७॥

स्मृत्यादेस्तु प्रमाणत्वं वेदमूलतया मतम् ।
शास्त्रं वेदविरुद्धं च नैव याति प्रमाणताम् ॥१८॥

देहस्य वाचकाः शब्दा पर्यवस्यन्ति देहिनि ।
सर्वशब्दकवाच्यस्तद् रामः सर्वशरीरकः ॥१९॥

इति प्रतिपक्षिभयङ्करजगद्गुरुश्रीहर्यानन्दाचार्यसिद्धशिरोमणिप्रणीतायां
प्रमाणदीपिकायां शब्दप्रमाणनिरूपणाख्यस्तृतीयो मयूखः ॥३॥

श्रियानन्दार्यशिष्येण हर्यानन्देन निर्मिता ।
प्रकाशिका प्रमाणानां भूयात् प्रमाणदीपिका ॥२०॥

—०—

जगद्गुरुश्रीमदनुभवानन्दाचार्याष्टकम्

रक्षकं वैष्णवानां च धर्मवारिधिवर्धकम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥१॥

रामानन्दकृतानन्दभाष्याब्जस्य प्रभाकरम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥२॥

भक्तिगङ्गाप्रवाहेण मुक्तिदं लोकपावनम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥३॥

विशिष्टाद्वैतवादेन वादिवादापसारकम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥४॥

सर्वसिद्धिप्रदातारं सिद्धेन्द्रं सिद्धसेवितम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥५॥

मुद्रोर्ध्वपुंड्रमालादे रक्षकं परमं बुधम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥६॥

श्रीगीतार्थसुधाकारं सदाचारोपदेशकम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥७॥

त्रयाणां च रहस्यानां भव्यव्याख्याविधायिनम् ।
नमाम्यनुभवानन्दं द्वाराचार्यं जगद्गुरुम् ॥८॥

वैष्णवभाष्यकारश्रीवैष्णवाचार्यनिर्मितम् ।
अष्टकं भवतादेतत् सर्वकल्याणकारकम् ॥९॥

———o———

जगद्गुरुश्रीदुन्दुरामाचार्यप्रणीतं

भक्तनिरूपणम्

श्रीसुशीलासुतं नत्वा भाष्यकारं तथा गुरुम् ।
भक्तलक्षणबोधाय कुर्वे भक्तनिरूपणम् ॥१॥
ज्ञानिनः शान्तचित्ताश्च दयाशीला गतस्पृहाः ।
परेषां पीडका ये न श्रेष्ठा भक्ताश्च ते मताः ॥२॥
अन्यदोषं न पश्यन्ति सर्वप्राणिहितैषिणः ।
ईर्ष्याविरहिता ये च श्रेष्ठा भक्ताश्च ते मताः ॥३॥
संग्रहवृत्तिहीनाश्च तुष्यन्ति स्वल्पतश्च ये ।
भगवत्पादभक्ताश्च श्रेष्ठा भक्ताश्च ते मताः ॥४॥
रामयज्ञसहायाश्च सर्वत्र समदर्शिनः ।
श्रीरामपूजका ये च श्रेष्ठा भक्ताश्च ते मताः ॥५॥
नन्दन्ति वीक्ष्य रामार्चां स्वाचार्यग्रन्थपाठकाः ।

निन्द्यकर्मविहीना ये श्रेष्ठा भक्ताश्च ते मताः ॥६॥
नासत्यवादिनो ये च प्रियसत्यस्य भाषिणः ।
ग्राहकाः सद्गुणानां ये श्रेष्ठा भक्ताश्च ते मताः ॥७॥
परेषां हानिलाभौ तु स्वीयवद् वीक्षकाश्च ये ।
साधुसेवारता ये च ष्ठा भक्ताश्च ते मताः ॥८॥
भागवतकथायाश्च श्रवणे कथने तथा ।
निरताः सात्विका ये च श्रेष्ठा भक्ताश्च ते मताः ॥९॥
उत्कण्ठिताश्च ये नित्यं भगवन्नामकीर्त्तने ।
रोमाञ्चशालिनो ये च श्रेष्ठा भक्ताश्च ते मताः ॥१०॥
च्युता नाश्रमधर्मेभ्यश्चातिथिपूजकाश्च ये ।
गुरुशास्त्रवशा ये च श्रेष्ठा भक्ताश्च ते मताः ॥११॥
संस्कारपञ्चकापन्ना आकारत्रयशालिनः ।
रहस्यत्रयवेत्तारः श्रेष्ठा भक्ताश्च ते मताः ॥१२॥
अर्थपञ्चकतत्त्वज्ञा रामकैङ्कर्यकारकाः ।
सदाचाररता ये च श्रेष्ठा भक्ताश्च ते मताः ॥१३॥
सात्विकाहारशीलाश्च वैष्णवा हरिचिन्तकाः ।
एकादशीव्रतासक्ताः श्रेष्ठा भक्ताश्च ते मताः ॥१४॥
सच्छास्त्रे सद्गुणे सक्ताः सन्निष्ठाः सत्प्रवृत्तयः ।
विषयेभ्यो विरक्ता ये श्रेष्ठा भक्तश्च ते मताः ॥१५॥
वैष्णवानाञ्च पूजायां कीर्त्तने वन्दने तथा ।
श्रद्धयोत्कण्ठिता ये च श्रेष्ठा भक्ताश्च ते मताः ॥१६॥

द्वारपीठेश्वरश्रीमद्दुन्दुरामार्यनिर्मितम् ।
भगवद्भक्तिदं भूयादेतद् भक्तनिरूपणम् ॥१७॥

—०—

नमः परब्रह्मणे भगवते श्रीरामाय ।
श्रीविशिष्टाद्वैतसिद्धान्तो विजयतेतराम् ।
जगद्गुरु श्रीश्रियानन्दाचार्यसिद्धान्तविजयिप्रणीतः

सिद्धान्तविजयः

कार्यकारणरूपं च चिदचिद्देहिनं विभुम् ।
दिव्यदेहगुणं वन्दे श्रीमद्रामं परेश्वरम् ॥१॥
भक्तिज्ञाननिधिं नत्वा पूर्णानन्दं जगद्गुरुम् ।
सिद्धान्तेविजयं कुर्वे सत्सिद्धान्तावबुद्धये ॥२॥
सिद्धान्तेषु च सर्वेषु विशिष्टाद्वैतमेव हि ।
श्रौतत्वात् युक्तियुक्तत्वाद् विश्वे विजयतेतराम् ॥३॥
प्राचीनैस्तत्त्वविद्भिर्हि वाल्मीक्यादिमहर्षिभिः ।
स्वीकृतत्वाद् यशश्चास्य दिङ्मण्डले सुविस्तृतम् ॥४॥
ग्रन्थैः सूत्रादिभिश्चास्य व्यासादयः प्रचारकाः ।
बोधायनाख्यवृत्त्याऽतिबर्धकः पुरुषोत्तमः ॥५॥
भेदाभेदाभिनन्दिन्यः सन्ति याः श्रुतयश्च ताः ।
सर्वाः समन्विताश्चास्मिन् सिद्धान्ते बुधसम्मते ॥६॥
भोक्ताभोग्येति भेदोक्तिर्विशेषणविशेष्ययोः ।
अद्वैतश्रुतिवृन्दस्य विशिष्टाद्वैतबोधिता ॥७॥
देहात्मनोर्विभिन्नत्वे देहिनश्चैकता यथा ।
भेदे चिदचिदीशानां विशिष्टस्यैकता तथा ॥८॥
घटकश्रुतिभिर्देहौ चेतनाचेतनौ मतौ ।
मतश्चात्मतया ब्रह्म ताभिश्चिदचितोरथ ॥९॥
सम्बद्धे त्वपृथक्सिद्ध्या रामे चिदचिती यतः ।

ततो ब्रह्मशरीरत्वाद् विशेषणे मते च ते ॥१०॥
व्यावृत्तिः स्वीकृता यस्माच्चिदचित्तत्त्वयोर्मिथः ।
तयोर्विशेषणत्वं तद् व्यावर्त्तकतयाऽक्षतम् ॥११॥
सूक्ष्माचिच्चिद्विशिष्टं हि ब्रह्म कारणमुच्यते ।
स्थूलाचिच्चिद्विशिष्टंतु ब्रह्म कार्यतया मतम् ॥१२॥
विशिष्टयोस्तयोरैक्यं विशिष्टाद्वैतमुच्यते ।
कार्यकारणयोरैक्यं सिद्धान्ते स्वीकृतं यतः ॥१३॥
अन्यथा सर्वविज्ञानमेकविज्ञानतः कथम् ।
सिद्ध्येच्छ्रुतिमतं चैतद् भावनीयं मनीषिभिः ॥१४॥
यतो वेत्यादिवाक्येनाभिहिता ब्रह्महेतुता ।
सत्त्यद्भावश्रुतत्वाद्धि कार्यता ब्रह्मणि मता ॥१५॥
अक्षतं निर्विकारत्वं ब्रह्मणः श्रुतिसम्मतम् ।
सद्वारिका मता यस्माद् ब्रह्मणः परिणामिता ॥१६॥
नामरूपविभागस्यानर्हता सूक्ष्मता मता ।
तद्भिन्ना स्थूलता चात्र चिदचितोरुदीरिता ॥१७॥
विशेषणान्वयि द्वित्वं मतं विशिष्टयोरिति ।
अरुणाम्बुजयोश्चाथ शुक्लकलशयोरिव ॥१८॥
वेदविद्भिश्च तत्त्वज्ञैर्ब्रह्मोपसनतत्परैः ।
सर्वश्रेष्ठतया प्रोक्तं विशिष्टाद्वैतमेव तत् ॥१९॥
पूर्णानन्दार्यशिष्यश्रीश्रियानन्दार्यनिर्मितः ।
सिद्धान्तविजयो भूयात् सिद्धान्तबोधकः सताम् ॥२०॥

—०—



पश्चिमाम्नाय-श्रीरामानन्द-पीठ-श्रीशेषमठाधीश-
जगद्गुरु-श्रीरामानन्दाचार्य-योगिराज-
स्वामि-श्रीरामप्रपन्नाचार्य-दर्शनकेसरीजी महाराज

श्री कोसलेन्द्रमठ
अहमदाबाद-७

श्री शेषमठ (विश्राम द्वारका)
शींगडा (सौराष्ट्र)

श्रीसीतारामाभ्यां नमः ।

आनन्दभाष्यकारश्रीरामानन्दाचार्याय नमः ।

विद्वद्वर्य–श्रीवाचस्पतिमिश्रविरचितः

खण्डनोद्धारः

अणोरणीयान् महतो महीयान्

एकः पुमान् विश्वजनीनवृत्तिः ।

श्रीसीतारामाभ्यां नमः

प्रस्थानत्रयानन्दभाष्यकार–श्रीरामानन्दाचार्याय नमः

श्रीगुरुचरणकमलभ्यां नमः

श्रीमद्रामप्रपन्नाचार्ययोगिराजप्रणीता

दीपिका

सर्वस्मात् प्राक् सृजति भुवनं ब्रह्मणो विग्रहेण
विष्णुर्भूत्वा पुनरपि जगद्रक्षणं यः करोति ।
ईशानः सन् ग्लपयति मुहुः संसृतिं तां समस्तां
तं श्रीरामं जनकतनयास्वामिनं नौमि नित्यम् ॥१॥

जगत्प्रसूतिस्थितिभङ्गबीज–

चेतनाचेतनांशानामंशिनं वेदवेदितम् ।
निमित्तं जगतो मूलं रामं ब्रह्म नमाम्यहम् ॥२॥

आनन्दभाष्यकृद्रामानन्दाचार्यं यतीश्वरम् ।
नौमि चानुभवानन्दं द्वारपीठेश्वरं निजम् ॥३॥

श्रीमद्रघुवराचार्यं नमस्कृत्य स्वसद्गुरुम् ।
कुर्वे तत्वप्रकाशाय खण्डनोद्धारदीपिकाम् ॥४॥

जो भगवान् चित् अचित् लक्षण सकल जगत् के उत्पत्ति स्थिति तथा विनाश के कारण हैं और अणुत्व रूप से प्रसिद्ध जो परमाणु तदपेक्षया भी जो परम अणु हैं अर्थात् परम सूक्ष्म हैं, तथा महत्वरूप से लोक प्रसिद्ध जो आकाशादिक तत्व हैं तदपेक्षया भी जो परम महान् है– जिनका कार्यकलाप व्यक्तिमात्र के कल्याण के लिये ही होता है और जो एक हैं सजातीय द्वितीय रहित हैं तथा पुरुष रूप हैं, वे भगवान् श्रीरामचन्द्र मेरे अन्तःकरण में प्रकाशित हों ।

यहां 'जगत् प्रसूति' आदि विशेषण से 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति, (जिससे इन आकाशादि भूतों की उत्पत्ति होती है, उत्पन्न होकर जिसमें यह जगत् स्थित है और

मस्माकमन्तःकरणे चकास्तु ॥१॥

अन्त में जिसमें प्रविष्ट होता है) इस श्रुति का तथा "जन्माद्यस्य यतः" (जिस परम कारण सर्वज्ञ सर्वशक्तिमान् व्यक्ति से स्थावर जंगम जगत् का उत्पादन होता है, जिसमें सम्पूर्ण जगत् निवास करता है तथा जिसमें पुनः प्रलयकाल में लीन होता है) इस सूत्र का अर्थ प्रकाशित किया गया है ।

"अणोरणीयान्" इस विशेषण से भगवान् में अतिसूक्ष्मता का प्रतिपादन किया है अर्थात् जिसने भगवान् की परमकृपा को नहीं प्राप्त की है उसे भगवान् कभी भी प्राप्त नहीं होते हैं । जैसे सूक्ष्म परमाणु प्रभृति पदार्थ अप्राप्य हैं उसी तरह अतिसूक्ष्म होने के कारण उस व्यक्ति से भगवान् अप्राप्य हैं ।

"महतो महीयान्" महत्वेन प्रसिद्ध जो आकाशादि तत्त्व हैं उनकी अपेक्षया भी भगवान् महान् हैं, इस विशेषण से यह बतलाया गया है कि जिसका मन भक्ति भावना से संविशुद्ध है उस पुरुष से भगवान् सर्वदैव प्राप्य हैं । इन दोनों विशेषणों द्वारा "अणोरणीयान् महतो महीयान् आत्माऽस्य जन्तोर्निहितो गुहायाम् । तमक्रतुः पश्यति वीतशोकः" (अणु से भी अणु महान् से भी महान् आत्म परम पुरुष भगवान् प्रत्येक प्राणी की बुद्धि में स्थित हैं, उस पर-

आनन्दाद्वयवादिनी श्रुतिरपि त्रस्तैव मूकायते

मात्मा को विशुद्ध अन्तःकरण वाले पुरुष मन की प्रसन्नता से ही देखते हैं। इस श्रुति का अर्थ प्रकाशित किया गया है। "विश्वजनीन" इस विशेषण से यह बतलाया गया है कि मर्यादावतार भगवान् श्रीरामजी का जो कोई भी लीला कार्य होता है वह सब लोक कल्याण के लिए ही होता है, स्व के लिए नहीं होता। "आप्तकामस्य का स्पृहा" इत्यादि श्रुति से स्वार्थ के अभाव का प्रतिपादन होता है। "एकः" इस विशेषण से परम तत्व में द्वित्वादि संख्या का निराकरण किया गया है। "पुमान्" यह विशेषण परम तत्व में सर्वसामर्थ्यादि सकल कल्याण गुणगणाश्रयत्व का प्रतिपादक है। "एकः" यह विशेषण चिदचिद्विशिष्ट परमतत्त्व में अद्वैत का प्रतिपादन करता है। अर्थात् चेतन और अचेतन दो तत्त्व हैं, यह भी स्थूल सूक्ष्म भेद से दो प्रकार के हैं। उसमें संसार कालिक जड़ चेतन स्थूल हैं तथा प्रलयकालिक जड़ चेतन सूक्ष्म हैं। ये दोनों भगवान् के अवयव हैं। भगवान् अवयवी हैं। अवयवी में भेद नहीं है इसलिए तादृश अवयवद्वयविशिष्ट भगवान् अद्वैतात्मक हैं। विशिष्टाद्वैत स्वरूप को जानने के लिये जिज्ञासु मत्कृत विशिष्टाद्वैत माला ग्रन्थ को देखें ॥१॥

उस तेजोविशेष को मैं नमस्कार करता हूँ, जो तेज

तस्मिन्नेव जडीभवन्ति जगतचितांसि मायामुषि ।

निर्विकार है "जायते अस्ति विपरिणमते वर्द्धते अपक्षीयते विनश्यति" इत्यादि यास्क परिपठित जो छै भाव विकार हैं उनसे जो रहित है तथा जिस तेजोविशेष में आनन्दाद्वैतका प्रतिपादन करने वाली श्रुति "सत्यं ज्ञानमानन्दं ब्रह्म" "प्रज्ञानं ब्रह्म" ब्रह्म सत्य ज्ञान आनन्दात्मक है कहकरभी डरती हुई मौन भावको आलम्बन करती है । क्योंकि "यतो वाचो निवर्तन्ते" जहाँ से वाणी निवृत्त हो जाती है । श्रुति वाणी रूप है तो जिसमें वाणी की प्रवृत्ति नहीं है वहां श्रुति क्या कर सकती है ? अतः मौन भाव का ही अवलम्बन करती है । एतावता परमतत्व में वाणी का अगम्यत्व बतलाया गया है । माया के विनाशक उस परमतत्व में सभी का अन्तःकरण (मन) जड़ हो जाता है, अर्थात् जो परमतत्व माया का विनाशक है वह मनोगम्य भी नहीं है "यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह" मन के साथ-साथ वाणी जहां से निवृत्त हो जाती है, यह श्रुति मनो अगम्यता में प्रमाण है और "यन्मनसा न मनुते येनाहुर्मनोमतम्" जो मन से नहीं जाना जाता है तथा जिससे मन को जानते हैं वही ब्रह्म है । यह श्रुति भी ब्रह्म को मनोअगम्य कहती है । जो परम तत्व भगवान् अनन्य भक्ति से भजन करने वाले व्यक्तियों को मोक्ष देने वाले हैं, जिनने भक्त को मोक्ष

निर्वाणप्रतिभूभविष्णु भजतामाभीरदारप्रियम्

देने का नियम कर लिया है और परम कमनीय तत्व है। जिनको आभीर गोप अथवा शूद्र जाति की स्त्री (शबरी) प्रिय है एवं जो स्वात्म प्रकाश चेतन रूप हैं, तथा पाप पुण्य रूप मल से रहित हैं, उनको मैं नमस्कार करता हूँ।

(श्लोक के पूर्वार्द्ध के विशेषणों से श्रीरामजी में अभक्त के लिये वाणी मनो अगम्यता का प्रतिपादन हुआ है तथा "मायामुषि" पद "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" मेरी शरण में प्राप्त होने वाले इस माया से तर जाते हैं (मैं उनकी माया को नष्ट कर देता हूँ) इस भगवत्प्रतिज्ञा का स्मरण कराता है। निर्वाणेत्यादि विशेषण से 'तमेव विदित्वाऽतिमृत्युमेति नान्यःपन्था विद्यतेऽयनाय" उस महापुरुष भगवान् श्रीराम को जानकर के मोक्ष को प्राप्त करता है, भगवान् के सिवाय मोक्ष का दूसरा मार्ग नहीं है, इस श्रुति प्रतिपादित परम तत्व का ग्रन्थकार स्मरण कराते हैं। भविष्णु पद से भगवान् में कमनीयत्व का प्रतिपादन होने से भगवान् में निरतिशय अखिल अनवधिक कल्याण-गुणाधारत्व बतलाया गया है, न कि भगवान् को निर्गुण कहा गया है। 'भजताम्' पद से पराभक्ति से परमतत्व (भगवान्) की आराधना करने वालों को ही मोक्ष प्राप्त होता है, यह कहा गया है। "भक्त्या त्वनन्यया लभ्योहम"

वन्दे स्वात्मकचित्प्रकाशममलं तन्निर्विकारं महः ॥२॥
क्षीराब्धेरुज्जिहानां त्रिदशपरिषदि प्रोल्लसद्भूरिभङ्गीम्

अनन्या भक्ति से ही मुझको प्राप्त किया जाता है। 'आभीर-दारप्रियम्' इस विशेषण से भगवान् पतितोद्धारक सिद्ध होते हैं। भगवान् श्रीराम ने नीच जाति शवरी का भी उद्धार किया था। यद्यपि आभीर शब्द गोप वाचक है, तथापि 'आभिरी तु महाशूद्री जातिपुंयोगयोः समा' इस अनुशासन से महाशूद्र बोधक भी है। 'स्त्रियो वैश्यास्तथा शूद्रास्तेपि यांति परांगतिम्' इससे सिद्ध होता है कि आभीर शब्द शूद्र बोधक भी है। रा० मानस में भी यह शब्द इस अर्थ में प्रयुक्त हुआ है यथा "आभीर यवन किरात खस श्वपचादि अति अधरूप जे" 'अमलम्' इस विशेषण से भगवान् में पाप पुण्य रूप मल का निराकरण सिद्ध होता है ॥२॥

प्रकाशन शील भगवान् अपाय (पाप कर्म) से मेरी रक्षा करें। भगवान् कैसे हैं? इस जिज्ञासा के उत्तर में 'क्षीराब्धेरित्यादि' समुद्र मथन के पश्चात् क्षीर समुद्र से निकली हुई स्वानुरूप पति के अन्वेषण के अभिप्राय से देव दानवों की सभा में दृष्टि डालने वाली त्रिभुवन जननी प्रफुल्लित कमल के समान स्मितमुखवाली लक्ष्मीजी को स्वकीय कटाक्ष से स्वीकार करते हुए, लज्जा से अधोमुख वाले देव कामशर से समुत्पन्न है सात्विक भाव जिनमें सात्विक भावैक धर्मादि से ओत प्रोत हाथ के द्वारा लक्ष्मीजी को स्वीकार करने वाले भगवान् अपाय से रक्षण करें। समुद्र मथन के

अङ्गीकुर्वन् कटाक्षैस्त्रिभुवनजननीं व्रीडया नम्रमौलिः ।
देवः पापादपायात् कुसुमशरपरीरम्भसञ्जातभावः
सद्यः स्विद्यत्करेण स्मितकमलमुखीमाददानः करेण ॥३॥

पश्चात् लक्ष्मीजी को स्वीकार करने वाले विष्णु भगवान् को लक्षित करके ग्रंथकार का मंगल है। वस्तुतस्तु मैथिल वाचस्पतिका अभिप्राय जनकपुर की सभा में है। अर्थात् देव श्रीरामजी अपाय से रक्षण करें। 'कथंभूतः, इस जिज्ञासा में क्षीराब्धेः का कथन है। क्षीर समुद्र के समान निर्मल अनेक गुण विशिष्ट अति दीर्घ जो विदेह प्रदेश उससे उद्गत न कि समुत्पन्न जो श्रीसीताजी, इस विशेषण से श्रीसीताजी में अयोनिजत्व का सूचन होता है। फिर कैसी कि त्रिदश देवताओं की जो सभा तत्सदृश राजसभा में, मेरे अनुरूप मेरा पति होने के कौन योग्य है इस अभिप्राय से दृष्टिपात करने वाली, उस स्थान में भगवान् श्रीराम को देखकर प्रफुल्लित कमल के समान स्मित मुख वाली, समस्त जगत् के प्रसव में समर्थ ऐसी सीताजी को अपने कटाक्ष से पूर्व में अंगीकार करते हुए भगवान् श्रीराम सभा में दशरथ विश्वामित्र वसिष्ठ प्रभृति गुरुजनों के समक्ष लज्जा से अवनत मुखवाले भगवान् श्रीराम लोकमर्यादा के अनुसार कामशर संपर्क से समुत्पन्न हैं सात्विक भाव जिनमें ऐसे भगवान् घर्मांकित हाथ के द्वारा श्रीसीता जी को अंगीकार करने वाले अपाय से रक्षण करें ॥३॥

तर्ककान्तारचारिण्यः स्खलन्ति प्रायशो गिरः ।
तत् समादधति प्राज्ञा एष धर्मः सनातनः ॥४।
खंडनमुद्दण्डमभूदुपर्युपरि कल्पनासहस्रेण ।
तन्मूलशुद्धमतिना वाचस्पतिना निरस्यते सम्यक् ॥५॥

अथ कथायां वादिनो नियममेतादृशं मन्यन्ते यत् प्रमाणादयः सर्वतन्त्रसिद्धान्ततया सिद्धाः पदार्थाः सन्तीति

तर्क रूप महावन में विचरने वाली वाणी का पतन प्रायः हुआ ही करता हैं, परन्तु बुद्धिमान् पुरुष वहां उसका समाधान कर देते हैं, यह सनातन धर्म है अर्थात् किसी की कहीं त्रुटि हो तो उसका समाधान कर देना, ऐसी ही पूर्वापर की मर्यादा है ॥४॥

श्रीहर्ष का खण्डन ग्रंथ उपरी उपरी हजारों कल्पनाओं से अत्यन्त उद्दण्ड होगया है अतः कथा करने में अत्यन्त विशुद्ध बुद्धि युक्त वाचस्पति मिश्र से उस खण्डन का सम्यक् रूप से निरसन किया जाता है ॥५॥

कथा (शास्त्रार्थ) आरंभ करने से पूर्व वादी अर्थात् नैयायिक प्रभृति एक ऐसा नियम मानते हैं कि प्रत्येक तन्त्र (शास्त्र) के सिद्धान्त रूप से सिद्ध प्रमाणादिक (प्रमाण, प्रमेय, प्रयोजन, संशय, दृष्टान्त, सिद्धान्त, अवयव तर्क निर्णय वाद जल्प वितंडा हेत्वाभास छल जाति निग्रहस्थान प्रभृति) पदार्थ हैं । तब वादी प्रतिवादी को इन सबको

कथकाभ्यामभ्युपेयम् । तदपरे न क्षमन्ते । तथाहि प्रमाणादीनां यत् सत्त्वमभ्युपेयं तत् कस्य हेतोः ? किं तदनभ्युपगच्छद्भ्यां वादिप्रतिवादिभ्यां तदभ्युपगमनियतस्य वाग्व्यवहारस्य प्रवर्तयितुमशक्यत्वात् उत तत्कर्तव्यवाग्व्यवहारहेतुत्वात् उत लोकसिद्धत्वात् । अथवा तदनभ्युपगमस्य तत्वनिर्णयविजयातिप्रसञ्जकत्वादिति ।

अत्र यद्यपि प्रमाणादिसत्त्वाभ्युपगमनियतत्वं तद्धेतुकत्वं तथात्वेन लोकसिद्धत्वं तदधीनफलकत्वं चेति चतुष्टयमप्य-

---

अवश्य मानना चाहिये । इस बात को वेदान्ती चार्वाक प्रभृति नहीं मानते हैं । वेदान्ती लोग कहते हैं कि शास्त्रार्थ के पहिले से प्रमाणादिकी सत्ता को क्यों माना जाय ? क्या प्रमाणादि के स्वीकार के विना वाग्व्यवहार की प्रवृत्ति नहीं कर सकते हैं । क्योंकि वाग्व्यवहार प्रमाणादि के स्वीकार से नियत है । अथवा वादी से होने वाला जो वाग् व्यवहार उसका कारण है प्रमाणादि । अथवा प्रमाणादि लोक सिद्ध हैं । अथवा शास्त्रार्थ का फल जो तत्त्व निश्चय या विजय सो, प्रमाणादि के स्वीकार के बिना सिद्ध नहीं हो सकता है । यहाँ यद्यपि प्रमाण सत्ता के स्वीकार से नियत अथवा प्रमाण सत्ताहेतुक अथवा तद्रूपेण लोकसिद्धत्व अथवा तदधीन फलकता ये चारों एक रूप ही हैं तब चार विकल्प अलग-अलग करना उचित नहीं है, तथापि पुरस्कार (प्रकार) के

विरुद्धमिति विकल्पो न कल्प्यते। तथापि पुरस्काराभिप्रायेण विकल्पः इदं वा पुरस्कृत्य तथा मन्यसे इदं वेति। ननु तथापि न्यूनो विकल्पः सर्वपुरस्कारपक्षस्यापि विकल्पनीयत्वादिति चेन्न। एकैकखण्डनेनैव सर्वखण्डनसिद्धौ तस्यार्थतः खण्डितत्वेन पृथगनुपन्यासादिति। अत्र नाद्यद्वितीयौ वेदान्तिमाध्यमिकचार्वाकवाग्व्यवहारस्य तेन विनापि सत्त्वात्। न तृतीयः लोको हि प्रमाणं वा बाहीकादिर्वा। अत्र नाद्यः प्रमाणादिसत्त्वाभ्युपगमः प्रमाणादिव्यवहारसिद्ध इत्यस्यापि विचार्यत्वात्। नापरः तद्व्यवहारस्य परीक्षकैर-

---

अभिप्राय से विकल्प किया गया है। यह प्रकार है कि यह प्रकार है ? फिर भी तो विकल्प न्यून ही रहा क्योंकि सर्व प्रकार विकल्प का भी तो कथन होना चाहिये। उत्तर—एक एक के खण्डन करने से ही सर्व प्रकार पक्ष का भी खण्डन हो जाता है। अतः उसका प्रथक् कथन नहीं किया।

इन चारों विकल्पों में से प्रथम द्वितीय विकल्प ठीक नहीं है क्योंकि वेदान्ती माध्यमिक चार्वाक का व्यवहार प्रमाणादि सत्ता स्वीकार के बिना भी होता है। तीसरा विकल्प भी ठीक नहीं है क्योंकि लोक पद से प्रमाण भूत लोक का ग्रहण है या बाहीक का (अर्थात् बैल हांकने वाले अनभिज्ञ का) इसमें प्रथम पक्ष ठीक नहीं है क्योंकि प्रमाणादि सत्ता का स्वीकार प्रमाणादि व्यवहार से सिद्ध

नादरणात् । नान्त्यः समयबन्धेनैव फलानतिप्रसङ्गादिति खण्डनम् ॥

अत्र प्राञ्चः । अलीकापेक्षवैलक्षण्यमात्रमेवेह सत्त्वं विवक्षितं तच्च प्रमाणादिवस्तुस्वरूपमेव । अस्तु वा अबाध्यत्वादिकं सत्त्वं धर्मधर्मिणोर्मया भेदोपगमात् तदवधारणमेव तदभ्युपगमः । अथ सर्वादृष्टेः सन्देहात् स्वादृष्टेश्च व्यभि-

---

है । इसके भी विचारणीय होने से । द्वितीय पक्ष भी ठीक नहीं है क्योंकि पामरादिकों के व्यवहार का विद्वान् लोग आदर नहीं करते हैं । चतुर्थ विकल्प भी ठीक नहीं है क्योंकि समयबन्धद्वारा ही फलानति प्रसंग सिद्ध हो जाता है तब प्रमाणादि सत्ता मानने की आवश्यकता नहीं हैं । यहां तक खण्डन ग्रन्थ का निरूपण किया गया ।

'इतिखण्डनम्' यहाँ तक पूर्व पक्ष का निरूपण किया गया । अब इसके आगे 'अत्र प्राञ्चः' से उद्धारकर्ता का उत्तर होता है ।

अलीक (शश विषाणादिक) तदपेक्षया वैलक्षण्य ही, यहाँ सत्त्व है । (अर्थात् अलीकविलक्षणत्वं सत्त्वम्) यही सत्त्व का लक्षण है । यह सत्त्व प्रमाणादि वस्तु का स्वरूप ही है अथवा अबाध्यत्वसत्त्व है । जिसका बाध न हो वह सत् है । हम लोग धर्म और धर्मी में भेद मानते हैं एतादृश सत्त्वका जो निर्णय वही इस सत्त्व का अभ्युपगम कहलाता है ।

चारात् अबाध्यत्वं दुरवधारणमिति चेन्न । यस्यहि वस्तुनो यावन्तः परीक्षाप्रकारा लोके प्रसिद्धाः तावद्भिः परीक्ष्यमाणे तस्मिन् वस्तुनि चेदन्यथाभावो नावसीयते तदा तदबाधित-मवगम्यते । तादृशमेव च विज्ञानं लौकिकैः प्रमेति तत्करणमेव

पूर्वपक्ष—यहाँ अबाध्यत्वका निर्णय नहीं होसकताहै क्योंकि अबाध्यत्व का अर्थ होता है बाधाभाव । तब यह बाधा भाव सब पुरुषों को हो अथवा अपने को । इसमें प्रथम पक्ष तो बन नहीं सकता है । क्योंकि सब के बाधाभाव को तो सर्वज्ञ ही जान सकता है हमारे जैसे अल्पज्ञ व्यक्ति को सर्वाबाध्यत्व का जानना कठिन है । अतः सभी पुरुषों के बाधा-भाव रूप अबाध्यत्वका निश्चय नहीं हो सकता है । द्वितीय पक्ष भी ठीक नहीं है, क्योंकि स्व का बाधाभाव व्यभिचरित है । किसी वस्तु में एक व्यक्ति को बाधाभाव रहने पर भी व्यक्त्यन्तर को उस वस्तु में बाध बुद्धि नहीं रहती है ।

उत्तर—जिस वस्तु के जितने परीक्षा के प्रकार लोक में प्रसिद्ध हैं उन सब प्रकारों से परीक्षा करने पर यदि उस वस्तु में किसी प्रकार से अन्यथा भाव निर्णीत न हो तब उसको अबाधित समझते हैं और एतादृश जो ज्ञान है उसको लोग प्रमा ज्ञान कहते हैं । इस प्रकार के प्रमाज्ञान के उत्पादक चक्षु-रादि प्रमाण को प्रमाण कहते हैं और तादृश ज्ञान के विषय को प्रमेय कहते हैं, इस कारण से प्रमाणादि का सत्त्व माना जाता है और उसका अभ्युपगम भी माना जाता है । वह

प्रमाणमिति तद्विषय एव च प्रमेयमिति गीयते। तस्मादस्ति प्रमाणादीनां सत्त्वं च अभ्युपगमश्चेति। तद्धि नाभ्युपगम्यते यत्प्रतीयते एव न यथा खपुष्पादि। प्रतीतमपि वा बाध्यते यथा देहात्मत्वादि। उपाधिपुरःसरमेव वा प्रतीयते यथा कुङ्कुमारुणा तरुणीति। प्रमाणादि तु नैवं इति। न च तद्-

---

पदार्थ नहीं माना जाता है जो कि प्रतीयमान न हो, जैसे आकाश कुसुम (क्योंकि आकाश कुसुम प्रतीत नहीं होता है) अथवा जो प्रतीत होता हो और बाधित हो जाता हो उस पदार्थ को भी नहीं मानते हैं, जैसे देह में आत्मत्व ज्ञान। (सभी व्यक्ति देह को आत्मा समझते हैं किन्तु उत्तर-काल में बाध होने से देह आत्मा नहीं है) एवं उपाधि पूर्वक जो जाना जाता है उस ज्ञान को भी प्रमा नहीं कहते हैं, जैसे 'कुंकुमारुणा तरुणीति' यहाँ कुंकुम की अरुणिमा है, स्त्री की नहीं। कुंकुमरूप उपाधि के बल से स्त्री में आरुण्य आता है स्वाभाविक नहीं है। अतः उक्त प्रत्यय को सोपाधिक होने से प्रामाणिकत्व नहीं होता है। प्रमाणादि पदार्थ ऐसा नहीं है, अर्थात् प्रतीत नहीं होता हो ऐसा नहीं है किन्तु प्रतीत होता है। न तो प्रतीत होकर के देहात्म के समान बाधित होता है न कुंकुमारुणा तरुणी के समान सोपाधिक है।

पूर्वपक्ष—प्रमाणादि ज्ञान में प्रामाण्यका सन्देह होने से

गृहीतेःप्रामाण्यसंशयादर्थपर्यन्तमनवधारणमिति । प्रवृत्ति-सामर्थ्यादिना ज्ञातप्रामाण्यस्याप्यवधारणसम्भवादिति न च प्रतीतमपि प्रमाणादिकम् औत्तरकालिकबाधप्रतिसन्धानेन त्याज्यम् । आसंसारं बाधानवतारात् । तादृशबाधस्यापीदानीं विनिश्चायकाभावात् । शङ्कापिशाच्याश्चातिदौर्बल्येनाकिञ्चित्कर-त्वात् त्वयापि च व्यवहारदशायां सर्वलोकसिद्धस्यैव वर्त्मनो-ऽनुसर्तव्यत्वात् । अत एवानुमानवैरिणं चार्वाकं प्रत्यनुमा-प्रयोगं कुर्वाणो न चार्वाकैरभिधीयते तत्प्रयोगस्य लौकिकैरु-

---

विषय पर्यन्त अनिर्णीत हो जायगा ।

उत्तर–प्रवृत्तिसामर्थ्य रूप हेतु द्वारा प्रमाणादि ज्ञान में प्रामाण्य का निर्णय होता है ।

पूर्वपक्ष–प्रमाणादिक ज्ञात होने पर भी उत्तरकाल में बाध के आ जाने से छोड़ दिया जायगा ।

उत्तर–संसार पर्यन्त उसका बाध नहीं होता है । उत्तर काल में होने वाले बाध का भी अभी कोई निश्चायक प्रमाण नहीं है । शंका रूपी पिशाचिनीका तो मूल दुर्बल होने से बाधकत्व नहीं है । आपको भी व्यवहार दशा में सर्व लोक प्रसिद्ध मार्ग का ही अवलम्बन करना पड़ता है । अत एव अनुमान प्रमाण को नहीं मानने वाले चार्वाक के प्रति अनुमान प्रयोग करते हुए आपको चार्वाके से उपा-लम्भ नहीं मिलता है क्योंकि अनुमान प्रमाण को लोगों ने

पगमात् वाद्यनुमतत्वस्यादोषत्वात् प्रकृतव्यवहारदशायां लौकिकं पन्थानं जहत् उपेक्षणीय एव भवति। नापि प्रपञ्चमिथ्यात्वावष्टम्भेन प्रमाणादेरसत्त्वाभ्युपगमः प्रपञ्चमिथ्यात्वे प्रमाणाभावात्। न हि प्रत्यक्षेण तत्सिद्धिः न हि तन्मिथ्यात्वे प्रत्यक्षमस्ति। नाप्यनुमानं प्रत्यक्षबाधात् नाप्यागमः विरोधिप्रत्यक्षबाधेन प्रपञ्चमिथ्यात्वश्रुतेरेवा-

---

मान लिया है। वादी द्वारा अनुमत दोष नहीं होता है। इस व्यवहार काल में लौकिक मार्ग को छोड़ने वाला लोगों से उपेक्षित होता है। न वा प्रपंचके मिथ्यात्व बल पर प्रमाणादिका तिरस्कार कर सकते हैं। क्योंकि प्रपञ्च के मिथ्या होने में कोई प्रमाण नहीं है। प्रत्यक्ष प्रमाण में मिथ्यात्व तो सिद्ध हो नहीं सकता क्योंकि तादृश कोई प्रत्यक्ष नहीं है, यदि मिथ्यात्व साधक प्रत्यक्ष हो तब तो वादी प्रतिवादी में विवाद ही न हो जैसे घटादि पदार्थ चक्षुरादि प्रमाण से सिद्ध है तो इसमें किसी को विवाद नहीं होता है। न वा प्रपंच के मिथ्यात्व में अनुमान प्रणाम है। क्योंकि प्रपंच सत्यता ग्राहक प्रत्यक्ष से अनुमान का बाध हो जायगा। न वा 'एकमेवाद्वितीयं ब्रह्म' इत्यादि आगम प्रपंच मिथ्यात्व में प्रमाण हो सकता है क्योंकि विरोधी प्रत्यक्ष प्रमाण से बाधित होने के कारण तादृश आगम अन्यपरक है। अर्थात् जैसे यजमान और

न्यपरत्वात् । किं च प्रपञ्चमिथ्यात्वं न तावदभावप्रतियोगित्वं सिद्धसाधनात् नाप्यत्यन्तासत्त्वं न हीदं प्रमाणेनालिङ्ग्यते खपुष्पादिवत् । नापि प्राचीनैः प्रमाणादिसत्ता नाङ्गीकृतेत्यतोऽस्माकमपि तदनुपगम इति प्रपञ्चमिथ्यात्वमिति युक्तम् । अभ्युपगमबीजे सति प्राचीनानभ्युपगमस्या-

---

प्रस्तर का भेद ग्राही प्रत्यक्ष यजमानः प्रस्तर का बाधक है तो उक्त आगम सादृश्य अर्थ में लाक्षणिक हो जाता है उसी प्रकार से 'विश्व सत्यं द्वा सुपर्णा' इत्यादि श्रुति संवादित भेद ग्राहक प्रत्यक्ष से "एकमेवाद्वितीयं ब्रह्म" इस श्रुति को अन्य परकत्व मानना ही उचित होगा । और भी यह प्रपंच मिथ्यात्व क्या है ? क्या अभाव प्रतियोगित्व रूप है ? यह ठीक नहीं है क्योंकि इसमें सिद्ध साधन दोष है । सिद्धसाधन स्थल में पक्षता नहीं होती क्योंकि यदि संशय पक्षता हो अथवा सिषाधयिसा पक्षता हो, दोनों ही मत में सिद्धि निश्चय विरोधी होती है । घटाद्यनधिकरण में घटाभाव रहने से अभाव प्रतियोगत्व घट में होने पर घट मिथ्या नहीं कहलाता । स्वाधिकरण में विद्यमान होने से । न वा अत्यन्त असत्व मिथ्यात्व है क्योंकि अत्यन्त असत् ख पुष्पादिक प्रमाण द्वारा ज्ञात नहीं होता है तो यदि यह प्रपंच अत्यन्त असत् हो तो प्रमाणज्ञाप्य नहीं होगा । न वा प्राचीनों ने प्रमाण सत्ता को नहीं स्वीकार किया है इसलिये

नभ्युपगमाहेतुत्वात् । तदेतत् दिगम्बरैर्दर्शनावरणीयं तम इत्युपहस्यते । किं च प्रमाणं स्वार्थविचारे कथायां च विचारयितुः कथयितुश्चानियतोपस्थितिकमज्ञातस्य व्यवहारानङ्गत्वात् । अत एव लौकिकानां स्वार्थविचारे कथायां चाङ्गत्वात् प्रमाणादिकं तत्सत्त्वं च सर्वतन्त्रसिद्धान्त इति । न तत् कथासाध्यम् । न हि तेन मय्येव प्रमा जन्यते न तु त्वयि येन तस्य प्रमाकरणत्वं त्वां प्रति साधनीयं स्यात् तस्य त्वयि

मैं भी नहीं मानता हूँ । इसलिये प्रपञ्च में मिथ्यत्व मानना ही ठीक है ऐसा कहा सो भी ठीक नहीं है, क्योंकि स्वीकार करने का कारण विद्यमान है तब प्राचीनों का अस्वीकार मात्र प्रमाणादि सत्ता के अस्वीकार में हेतु नहीं बन सकता है । इस विषय को लेकर के जैनदर्शन में यह तुमको दर्शनावरणीयतम हैं ऐसा कहकर उपहास किया है । और भी प्रमाण स्वार्थ विचार में तथा कथा में विचार करने वाले तथा कहने वाले दोनों को ही नियतोपस्थितिक है । अर्थात् दोनों के लिये बराबर है । क्योंकि अज्ञात प्रमाण कथा का अङ्ग नहीं होता है । अत एव लौकिक पुरुष के स्वार्थ विचार तथा कथा में अङ्ग होने से प्रमाण तथा प्रमाणसत्त्व सर्व तंत्र सिद्धान्त है । वह प्रमाण सत्य कथा द्वारा सिद्ध नहीं किया जाता है । क्या प्रमाण मुझमें ही प्रमा का उत्पादन करता है, तुममें नहीं ? जिससे कि

मयि च समवृत्तिकत्वात् । एवं च सति प्रमाणत्वासत्त्वाभ्युपगमवतः तदसत्त्वाभिधानमौदासीन्याभिधानं वा नूनं विप्रलम्भकवाक्यं तथा च प्रमाणादिसत्त्वेऽपि प्रमाणं कथायां वाच्यमकथायां वेति विकल्पस्यापि क्वावकाशः तत्सत्वस्य सकलव्यवहर्त्रनुमतत्वेन तत्र प्रमाणाभिधानस्यैवानवकाशात् । किं च प्रमाणादिसत्त्वाभ्युपगमस्तावत्विचारकथयोः प्रवृत्तिहेतुः । तथा च तं विनैव यदि ते मन्यसे तदा परप्रबोधहेतुभूतं वाग्व्यवहारमन्तरेणापि परप्रबोधमिच्छ तथा च विरमय वाग्व्यवहारादपीत्यलमतिपीडनया ॥

प्रमाण में प्रमाणत्व तुम्हारे लिये सिद्ध किया जाय । प्रमाण तो तुम्हारे तथा मेरे लिये समान है । ऐसा होने से प्रमाण सत्ता नहीं मानने वाले के प्रमाणासत्व को अभिधान अथवा उदासीनता का कथन निश्चित विप्रलम्भक का वाक्य है । तब प्रमाणादि सत्ता में भी प्रमाण का कथन किसी कथा में कहा जायगा कि कथा से अतिरिक्त स्थल में । इस विकल्प का भी अवकाश कहाँ ? प्रमाण सत्ता तो सकल व्यवहारियों से अनुमत होने के कारण प्रमाण में प्रमाण का कथन अनवकाशित होता है । और प्रमाण सत्ता का स्वीकार विचार तथा कथा में प्रवर्तक है । तब यदि प्रमाण के बिना विचार को तथा कथा को मानते हो तो अन्यदीय ज्ञान के कारणीभूत जो वाग्–व्यवहार उसके

नन्वियमपि प्रतिबन्ध्युपायव्यतिरेके फलं भवतीत्यभ्युपगम्य वादिभ्यां प्रवर्तितायां कथायां त्वया वाच्या, अन्यथा प्रवर्तितायां वा। नाद्यः स्वयमपि तथोपगमेन तस्यामुपायव्युत्पादनानौचित्यात्। नापरः न्यायमते जगति तादृश्यायाः कथाया एवासम्भवात्। न ह्युपायासत्त्वं तदौदास्यं वा समाश्रित्य वादी वादिनौ वा कथां प्रवर्तयत इति। न्यायमतमिति चेत्। हन्त तर्हि त्वयापि नैयायिकेषु यद्दूषणं दीयते तत् तदङ्गत्वानभ्युपगमप्रवर्तितायां कथायाम् अथ प्रमाणसत्त्वाभ्युपगमाङ्गिकायाम्। नाद्यः तत्र तदभिधानानौचित्यात् स्वयमेव नैयायि-

---

बिना भी परप्रबोध को मान लो। वाग्व्यवहार से भी विरत हो जाओ। इस विषय पर इसके आगे ज्यादा विचार निरर्थक है।

पूर्व पक्ष—उपाय के अभाव में प्रतिबन्धी फलरूप होता है यह मान कर के वादिद्वय से प्रवर्तित कथा में आप कहोगे अथवा प्रकारान्तर से प्रवर्तित कथा में ? इसमें प्रथम पक्ष ठीक नहीं है क्योंकि स्वयं जब आपने ऐसा मान लिया तब उस कथा में उपाय का कथन अनुचित होगा। द्वितीयपक्ष भी ठीक नहीं है क्योंकि न्याय के मत में ऐसी कोई कथा ही नहीं है। उपाय को न मानकर के अथवा उपाय में उदासीनता का अवलम्बन कर के वादी या वादी द्वय कथा को नहीं चलाते हैं। न्यायमत ऐसा है, ऐसा कहो तो आप

केन प्रमाणादेरनङ्गत्वोपगमात् । नान्त्यः त्वन्मते तादृश्यायाः कथाया एवासम्भवात् तस्मात् प्रमाणाद्यनभ्युपगमे कथैव न सम्भवति उन्मत्तकेलिप्रसङ्गात् इत्येव स्यात् ॥

नव्यास्तु प्रमाणस्य हि सत्त्वं नेत्यभ्युपगच्छन् प्रमाणेन कथं दूषयेत् नेति । नाभ्युपैमि किन्तु तत्रौदासीन्येन वर्त इति चेन्न । प्रत्यक्षखण्डनाय त्वया प्रमाणस्याहरणात् औदास्ये च तदसम्भवात् । न हि तत्रोदास्ते चाश्रयते चेति सम्भवति

भी जो नैयायिक को दोष दोगे वह प्रमाण के अनभ्युपगम पूर्वक कथा में अथवा प्रमाणसत्वाभ्युपगम पूर्वक प्रवर्तित कथा में ? इसमें प्रथम विकल्प ठीक नहीं है, क्योंकि उस विषय की चर्चा निरर्थक है । नैयायिक ने स्वयमेव यहां प्रमाण को तादृश कथा में अङ्ग नहीं माना है । द्वितीय पक्ष भी ठीक नहीं है क्योंकि आपके मत में एतादृश कथा असंभवित है । इस कारण से प्रमाणादि के अस्वीकार वादी के मत में कथा ही नहीं चल सकेगी । उन्मत्त व्यवहारवत् सब अव्यवस्थित हो जायगा ।

खण्डनोद्धारकर्ता प्राचीन मत से प्रमाणादि को व्यवस्थित करके अब नवीन के मत से निराकरण करते हैं । "नव्यास्तु" इत्यादि प्रमाण की सत्ता नहीं है ऐसा स्वीकार करके पुनः प्रमाण द्वारा ही किस प्रकार से खण्डन करते हैं ? मैं प्रमाण सत्ता तो नहीं मानता हूँ किन्तु उसमें

तस्मादौदास्याभिधानम् असत्त्वाभिधानं च विप्रलम्भक-वाक्यमिति । सांव्यवहारिकेन प्रमाणेन कथयामि न तु पारमार्थिकीमपि सत्तामभ्युपैमि शेषे बाधोदयादिति चेत् । किमिदं सांव्यवहारिकत्वम् । अविचारितसुन्दरत्वमिति चेत् । तर्हि तदबाधकमेव प्रमाणम् । न हि बाध्येन किञ्चिद्बाध्यते किन्त्वबाध्येनैव । सर्वमेव बाधकं बाध्यम् उभयसिद्धबाध्या-

---

उदासीनता से व्यवहार करता हूँ, यह कहना भी ठीक नहीं हैं क्योंकि प्रत्यक्षादि प्रमाण के खण्डन करने के लिये आप प्रमाण का ग्रहण करते हैं तब उसमें उदासीनता कैसे बनेगी ? उदासीनता भी रखते हैं और उसका ग्रहण भी करते हैं यह दोनों नहीं बन सकता है, इसलिये उदासीनता का अवलम्बन और असत्त्व का कथन वंचक के समान होता है ।

शंका–मैं सांव्यवहारिक प्रमाण से कथा करता हूँ न कि पारमर्थिकी प्रमाणादि सत्ता को मानता हूँ क्योंकि अन्त में तत्त्व ज्ञानोत्तर काल में प्रमाणादि का बाध हो जाता है ।

समाधान–यह सांव्यवहारिकत्व क्या है ?

शंका–अविचारित सुन्दरता विचार करने पर बाधित हो जाती हो । आपात मनोरम हो उसको सांव्यवहारिक कहा जाता है ।

समाधान–तब तो अन्त में बाधित होने वाला प्रमाण

विशेषादिति चेत् । इदमप्यनुमानं बाध्यम् अबाध्यं वा इत्युभयतः पाशारज्जुः । त्वत्कल्पितानि प्रमाणानि त्वत्कल्पितैरेव दूषणैरुपसृष्टानि विलीयन्ते एवं दूषणान्यपि सुन्दोपसुन्द-

---

बाधक नहीं होगा क्योंकि जो वस्तुतः स्वयं बाधित है वह दूसरे का बाधक कैसे होगा ? अबाध से ही बाध्य होता है ।

शंका–जो कोई बाधक है वह सभी बाध्य होता है उभयमत सिद्ध बाध्य के समान । अर्थात् जैसे शुक्तिका में रजत उभयमत सिद्ध बाध्य है, उस रजत के तुल्य यह प्रमाणादिक है अतः यह भी बाध्य है ।

समाधान–यह जो आपने अनुमान बनाया है जिसके द्वारा प्रमाणादि सभी पदार्थ में बाध्यत्व को सिद्ध करते हैं वह अनुमान स्वयं बाध्य है अथवा अबाध्य है ? यदि प्रथम पक्ष कहें तो बाधित होने से यह किसी का बाधक नहीं होगा क्योंकि जो स्वयं बाध्य है सो बाधक कैसे बनेगा ? यदि द्वितीय पक्ष मानै तो यह भी ठीक नहीं है क्योंकि प्रकृत अनुमान अबाध्य हो गया । आप तो सभी बाधक का बाध्यत्व सिद्ध करते हैं तो आपको प्रतिज्ञा हानि दोष होता है इस प्रकार से 'उभयतः पाशारज्जुः' इस न्याय विषयता का अतिक्रमण नहीं कर सकते हैं ।

शंका–नैयायिक से परिकल्पित जो प्रमाण है वह नैया-

यदिति ब्रूम इति चेत् । एवं हि सर्वाणि प्रमाणानि त्वद्रीत्या बाध्यानीति त्वद्वचनार्थः सोपि व्याहतः तस्यैवाबाध्यत्वात् बाध्यत्वे चार्थासिद्धेः किं नश्छिन्नम् उपात्तस्य साधनस्य असाधनत्वे उपादातुरेव निग्रहात् । एतत् सर्वं बाध्यमेव शेषे

यिक परिकल्पित दूषण जाल से युक्त होने के कारण नष्ट हो जाता है और सुन्दोपसुन्द की तरह से दोष भी उसी दोष जाल से नष्ट हो जाता है ऐसा मैं कहता हूं ।

समाधान–ऐसा मानें तब तो 'सर्वाणि प्रमाणानि त्वद्रीत्या बाध्यानि' यह जो आपका वचन है सो भी व्याहत हो जाता है, क्योंकि इस वचन को अबाध्य होने से । यदि इस वचन को भी बाधित मानें तब तो आपका अभिप्राय ही सिद्ध नहीं होगा क्योंकि सभी पदार्थ में बाध्यता अबाधित से होगी । और इस वचन को आपने बाध्य मान लिया ।

शंका–मेरा क्या जाता है, यहां पूर्व पक्षी का अभिप्राय यह है कि मैं सभी को अनिर्वचनीय मानता हूं तो मेरा यह वचन भी बाध्य हो जाय तो क्या क्षति है ।

समाधान–जो हेतु साध्य की सिद्धि करने के लिये लिया जाता है वह कदाचित् साध्य साधक नहीं हो सका तो उस हेतु का आश्रय लेने वाले व्यक्ति निगृहीत माने जाते हैं । यदि आपका साधन साध्यसाधक नहीं बना तो आप निगृ-

बाधोदयादिति चेन्न। आसंसारं तदनुदयात्। व्यवहार-दशोत्तरं बाधो भविष्यतीति चेन्न। आसंसारं व्यवहारदशाया एव सत्त्वात् तदुदोच्यापि दशा भविष्यतीत्यत्र प्रमाणाभावात्। उपनिषदां च तत्प्रमाणत्वाभिमतानाम् त्वया प्रामाण्याभावस्य

हीत माने जाते हैं। यदि आपका साधन साध्य साधक नहीं बना तो आप निगृहीत हो जाते हैं।

शंका–ब्रह्म व्यतिरिक्त सभी प्रमाण प्रमेयादिक पदार्थ बाध्य ही हैं, क्योंकि शेष में (अन्त में) बाध के आजाने से।

समाधान–जहां तक संसार है वहां तक तो बाध नहीं होता है।

शंका–व्यवहारकाल के बाद में बाध आयेगा अर्थात् व्यवहारोत्तर काल में सभी पदार्थ बाधित हो जायेगें।

समाधान–जहां तक संसार है तावत्पर्यन्त तो व्यवहार दशा ही है, संसार के बाद भी कोई दशा होगी–इसमें कोई प्रमाण नहीं है "तत्र माता अमाता भवति पिता अपिता भवति वेदा अवेदा भवन्ति" इत्यादि श्रुति से सिद्ध होता है कि संसार के बाद कोई दशा नहीं होती है तब जो आप कहते हैं कि व्यवहारदशोत्तर काल में सभी पदार्थ का बाध हो जाता है सो ठीक नहीं हैं। आपके मत में प्रमाण-त्वेन अभिमत है उपनिषद्, उसको तो आप प्रामाणिक नहीं मानते हैं और मैं उस उपनिषद् को अन्य परक मानता हूं

मया चान्यपरत्वस्योपगमात् शङ्कामात्रस्य च दौर्बल्येनासाधकत्वात् । व्यवहारदशायां तावत् उपनिषदेव स्वप्रकाशशुद्धबुद्धस्वभावे ब्रह्मणि दशान्तरभूते प्रमाणम् एतद्दशात्यये तु तदेव स्वस्मिन् स्वप्रकाशत्वादिति चेत् । दशान्तरे तस्याः कुतो न प्रामाण्यम् अङ्गवैकल्याद्वा अङ्गिवैकल्याद्वा । नो भौ प्रागिव तदानीमपि बौद्धुर्योग्यताद्यवगतेरुपनिषदां च सत्त्वात् उपनिषज्जन्यबोधो हि वृत्तिलक्षणः सचानिर्वचनीयानाद्यविद्याद्वयमहिम्ना प्रादुर्भवति सारस्वत इव पवनोद्भूतस्य वीचिनि-

---

अतः शंका मात्र दुर्बल होने से असाधक है ।

समाधान—जो प्रकाश भिन्न है उसका नाम जडत्व है प्रकाशभिन्न शब्द का अर्थ होता है प्रकाश सामग्री से अजन्यत्व होना । यदि कदाचित् प्रकाश सामग्री से जन्यता मानें तब तो जड़ में भी प्रकाशत्व की आपत्ति हो जायगी । एवं ज्ञानकर्मत्व शब्द का अर्थ है ज्ञानविषयत्व अर्थात् ज्ञान का जो कर्म हो उसका नाम है ज्ञानकर्म । यह ज्ञान कर्मत्व वस्तुत्व के आधीन है, अर्थात् जो पदार्थ होगा वह ज्ञान का विषय होगा । और स्वव्यवहार में परापेक्षत्व भी अस्वप्रकाशाधीन है अर्थात् जो अस्वप्रकाश है वह सब स्वव्यवहार में अवश्य परापेक्ष होगा । चार ज्ञान (ज्ञान प्रमेय है इत्याकारक ज्ञान, अनुव्यवसाय ज्ञान, योगज धर्म ज्ञान और भगवत् का ज्ञान) से भिन्न जो ज्ञान है तथा जड़ पदार्थ घट पटादिक वह सब अस्वप्रकाश होने से स्व स्वव्यवहार में परापेक्ष ही हैं ।

सर्वाणि स्वव्यवहारे परापेक्षाण्येव अस्वप्रकाशत्वादिति ॥

ननु ज्ञानं जिज्ञासावेद्यं न वा। आद्ये जिज्ञासापि हि सामान्य ज्ञान पूर्विकेति जिज्ञासातः प्राक् ज्ञानस्य सामान्य-ज्ञानमायातम् । तदपि च जिज्ञासातः स्यात् ज्ञात-त्वात् तज्जनन्यपि जिज्ञासा सामान्यज्ञानादिति जिज्ञासाज्ञान-योर्द्वारा द्वयमनिर्वृत्तमापद्येत। न वा पक्षेऽप्यवेद्यं वा स्यात् अजिज्ञासावेद्यं वा। अत्राद्ये ज्ञानव्यवहृतिर्न स्यात् ग्रहणा-भावात्। ज्ञाततयापि न ज्ञानग्रहः ज्ञानाबोधे तस्या अबोधात्

शंका—ज्ञान जिज्ञासा का विषय होता है कि नहीं ? इसमें प्रथम पक्ष ठीक नहीं हैं क्योंकि जिज्ञासा भी तो सामान्य पूर्वक ही होगी। इसलिये जिज्ञासा से पूर्व काल में ज्ञान का भी ज्ञान होता है ऐसा सिद्ध होता है। वह ज्ञान भी जिज्ञासा से होगा, क्योंकि ज्ञान होने से तथा ज्ञान को उत्पादन करने वाली जिज्ञासा सामान्य ज्ञान से ही होगी। इस प्रकार ज्ञान तथा जिज्ञासा के द्वारा दोनों ही अपने आप स्वरूप प्राप्त नहीं करेंगे। न वा अवेद्य जो द्वितीय पक्ष है सो ही ठीक है, क्योंकि अवेद्य ज्ञान होगा अथवा अजिज्ञासा से वेद्य होगा ! इसमें प्रथम अवेद्य पक्ष ठीक नहीं है क्योंकि अवेद्य होगा तब तो प्रमाणाभाव होने से ज्ञान का व्यवहार नहीं होगा। ज्ञातता रूप से भी ज्ञान का ज्ञान नहीं होगा, क्योंकि ज्ञान का अबोध होने से

तस्या ज्ञानोपहितशरीरत्वात् । सा हि न चक्षुःपातमात्रवेद्या । नापि व्यवहारानुमेयं ज्ञानं व्यवहारेण ज्ञानोपस्थितौ व्याप्तिग्रहो गृहीतव्याप्तिकाच्च व्यवहारात् ज्ञानोपस्थितिरित्यन्योन्याश्रयात् । अजिज्ञासावेद्यत्वे चानिर्मोक्षो ज्ञानमनःप्रत्यासत्तेः सर्वदा सत्त्वादिति परिशेषादपि ज्ञानं स्वप्रकाशमिति । उच्यते । आत्ममनःसंयोगस्य यदेन्द्रियार्थसन्निकर्षः सहायीभवति तदा बाह्यार्थानुभवः । स एव सहायो यदा स्थिरस्तदा

ज्ञातता का भी बोध नहीं होगा, क्योंकि ज्ञातता भी ज्ञानोपहित ही होती हैं । वह केवल चक्षुः संयोग से ही बेद्या नहीं होती है । न वा व्यवहारद्वारा ज्ञान अनुमेय हो सकेगा, क्योंकि जब व्यवहार से ज्ञान उपस्थित होगा तब व्याप्ति ज्ञान होगा । और जब गृहीतव्याप्तिक व्यवहार होगा तब उस व्यवहार से ज्ञान की उपस्थिति । तो इस प्रकार से व्यवहार और ज्ञानोपस्थिति में परस्पराश्रय दोष हो जायगा, यदि ज्ञान को अजिज्ञासावेद्य मानें तो अनिर्मोक्ष हो जायगा, क्योंकि ज्ञान और मन का जो सन्निकर्ष है, वह तो सर्वदा विद्यमान है । अतः परिशेष से ज्ञान स्वप्रकाश है ऐसा सिद्ध होता है ।

समाधान—जिस समय में आत्ममनः संयोग का इन्द्रियार्थ सन्निकर्ष सहायक रहता है उस समय में बाह्यार्थ का अनुभव होता है, वह इन्द्रियार्थ सन्निकर्ष रूप सहायक यदि

धारावाहिकानुभवः । यदा च संस्कारपरिपाकस्य स सहायः तदा प्रत्यभिज्ञा । यदा तु तत्सहायरहितः संस्कारपरिपाकः तदा स्मृतिः । यदा तु संस्कारपरिपाकेन्द्रियार्थसन्निकर्षरहित आरब्धज्ञान आत्ममनःसंयोगः तदानुव्यवसाय इत्युत्सर्गः । यदा त्वस्मिन् सत्यप्युत्कटविषयेन्द्रियसन्निकर्षः तदा तदर्थ-ज्ञानम् । न तु ज्ञानज्ञानमित्यलमतिविस्तरेण । तस्माद-जिज्ञासावेद्यत्वेऽपि ज्ञानस्य प्रबलविषयमहिम्ना धाराया

स्थिर रहता है उस समय में धारावाहिक ज्ञान होता है। जब कि संस्कार परिपाक का इन्द्रियार्थ सन्निकर्ष सहायक रहता है उस समय में प्रत्यभिज्ञा 'सोऽयं घटः' इत्याकारिका होती है। जब इन्द्रियार्थ सन्निकर्ष रूप सहायक रहित संस्कार परिपाक रहता है उस काल में स्मरणात्मक ज्ञान होता है, और जिस समय में आरब्ध ज्ञान में आत्म-मनः संयोग को संस्कार परिपाक इन्द्रियार्थ सन्निकर्ष की सहा-यता नहीं रहती है उस समय में अनुव्यवसाय ज्ञान होता है। जब कि आत्ममनः-संयोग के रहते हुए उत्कट विषयेन्द्रिय संनिकर्ष रहता है उस समय में अर्थ विषय ज्ञान होता है न कि ज्ञान का ज्ञान होता है। इस विषय पर अधिक विचार निरर्थक है। इसलिये ज्ञान के अजिज्ञासा वेद्य होने पर भी प्रबल विषय के बल से ज्ञान धारा रुक जाती है विषय की प्रबलता में फल ही प्रमाण है

निवारणात् । प्राबल्ये च फलमेव प्रमाणम् । किञ्चोक्तगत्यापि ज्ञानस्यैव स्वप्रकाशत्वसम्भावनापि । न तु ब्रह्माभिन्नस्य नित्यचैतन्यस्य तस्य घटाद्यनालम्बनत्वात् आसंसारमप्रतीयमानत्वाच्चेति व्यर्थस्ते स्वप्रकाशतासाधनश्रमः । किञ्च प्रकाशस्य स्वधर्मावरुद्धस्यैव प्रकाशमानस्य स्वप्रकाशत्वसिद्धेर्नाद्वैतसिद्धिः । धर्मानवरुद्धस्य तु तस्य स्वप्रकाशत्वेन भाने धर्मोपग्रहप्रवर्तिष्णुशब्दविषयता तस्याविद्यादशायामपि न स्यात् । अथ शब्दान्तरं तावद् ब्रह्मणि न प्रवर्तते । किं तूपनिषत् ।

अर्थात् फल के बल से अथवा दौर्बल्यसे कारण में बलाबल निश्चित किया जाता है । और भी देखिये—उपर्युक्त प्रकार से तो अनित्य ज्ञान में ही स्वप्रकाशत्व की सम्भावना होती है न कि ब्रह्म से अभिन्न नित्यज्ञान में, क्योंकि नित्य ज्ञान में घटादि आलम्बन नहीं है और जहां तक संसार है वहां तक नित्य ज्ञान प्रतीयमान भी नहीं होता है । इसलिये ज्ञान में स्वप्रकाशत्वसाधन का श्रम करना बिलकुल व्यर्थ है । और भी स्वधर्म ज्ञानत्व से आक्रान्त प्रकाशमान प्रकाश में ही स्वप्रकाशत्व की सिद्धि होने से अद्वैत की सिद्धि नहीं होती है । धर्म (ज्ञानत्व) रहित ज्ञान का स्वप्रकाशत्वेन ज्ञान मानें तब तो धर्म के सहकार से चलने वाला जो शब्द है उसका विषय अविद्या दशा में भी नहीं होगा ।

शंका—यद्यपि कार्यार्थक शब्द की प्रवृत्ति ब्रह्म में नहीं

सापि न कण्ठतस्तदाह येन प्रकारतया धर्ममपेक्षेत् । किं तु विषं भुङ्क्ष्वेत्यस्य एकादश्यभोजने यथा तात्पर्यं तद्वत् प्रपञ्चनिषेधश्रुतेरपि ब्रह्माद्वैतविधौ तात्पर्यम् । तथा च ब्रह्माद्वैतमेव तच्छ्रुतेरर्थः यत्परः शब्दः स शब्दार्थ इति न्यायादिति चेन्न । न हि तात्पर्यमात्रं सामग्री कारणान्तरविलोपा-

---

होती है क्योंकि ब्रह्म अकार्य रूप है तथापि उपनिषत् की प्रवृत्ति ब्रह्म में होती है वह उपनिषत् शब्द भी कण्ठतः ब्रह्म में प्रवृत्त नहीं होताहै क्योंकि उपनिषत् शब्द स्यवमेव कहता है कि'यतो वाचो निवर्तन्ते' जहाँसे वाणी निवृत्त होजाती है । यदि ब्रह्म शब्दप्रतिपादित होता तब शब्द की प्रवृत्ति होने के लिये ब्रह्म में प्रकारता रूप से धर्म की आवश्यकता होती । किन्तु जैसे 'विषं भुंक्ष्व' इस वचन का तात्पर्य एकादशी तिथि में भोजन नहीं करना, ऐसा है । उसी प्रकार से प्रपंच निषेधक वाक्य का 'अतोऽन्यदार्तम्' विद्वान् नामरूपाद्विमुक्तः, "ब्रह्मभिन्न सभी पदार्थ मिथ्या हैं," विद्वान् नाम रूप से विमुक्त हो जाता है, इत्यादि वाक्य का ब्रह्माद्वैत में तात्पर्य है । इसलिये ब्रह्माद्वैत ही श्रुति का अर्थ होता है । जिस अर्थ के बोधन की इच्छा से जो शब्द प्रयुज्यमान होता है उस शब्द का वही अर्थ होता है, इस न्याय से ।

समाधान–शब्दबोधमें तात्पर्य ज्ञानमात्र सामग्री नहीं है

पत्तेः । नाप्युपलक्षणन्यायाच्छ्रुत्या ब्रह्मधीः काकपदोपस्थापितकाकस्मारितोत्तृणत्वादिविशिष्ट गृहविशेषधीवत् श्रुतितो ब्रह्मधियोऽनुदयात् ।

अथाविद्यादशायां श्रुतितोऽपि तद्धीः । तथाहि नित्येन तावदध्ययनविधिनाधीतस्वाध्यायो मुमुक्षुरापाततो वेदान्तवाक्यं श्रुत्वावगच्छति यत् आत्मनस्तु कामाय सर्वं प्रियं भवतीत्युपक्रमोपनिषदात्मौपाधिकमितरेषां प्रियत्वं वदन्त्यात्मैव

क्योंकि अन्य सभी कारण का विलोप हो जायगा । न वा 'उपलक्षणन्यायात्' श्रुति द्वारा ब्रह्मज्ञान उत्पन्न हो सकता है । 'काकवन्तो देवदत्तगृहाः, यहाँ जिसे काक पद से उपस्थापित काक स्मारित उत्तृणत्वादि विशिष्ट गृह विशेष का ज्ञान होता है उसी प्रकार से श्रुतिद्वारा ब्रह्म विषयक बोध उत्पन्न नहीं होता है ।

शंका—अविद्या दशा में अर्थात् भेदव्यवहार काल में भी श्रुति द्वारा अद्वैत आत्म ज्ञान होता है । तथा हि नित्य जो अध्ययन विधि "स्वाध्यायोऽध्येतव्यः" स्वाध्याय अर्थात् वेद का अध्ययन करना—इस विधि द्वारा जिसने वेद का अध्ययन कर लिया है ऐसा जो मुमुक्षु वह आपाततः वेदान्त वाक्य "तत्त्वमसि" इसको सुनकरके जानता है कि "आत्मन" इत्यादि आत्मा के निमित्तक सभी प्रिय होता है, इस उपक्रम से और आत्मेतर में जो प्रियत्व है सो

निरुपधिप्रिय इति प्रतीते तत आत्मनि ज्ञाते सर्वमिदं विज्ञातं भवतीत्युपसंहारेणानन्दात्मकस्यात्मनः सर्वाभिन्नत्वमिति प्रतीतेः । अथ एतावादरे खल्वमृतत्वमित्युपसंहारशेषादानन्दात्मकब्रह्माभेददर्शनस्यामृतत्वसाधनत्वमवेत्य कथं तद्दर्शनं स्यादित्याकांक्षायां "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति श्रुत्वा मुमुक्षुर्मीमांसते । न च तस्य मीमांसनाऽसम्भवः । अधीत्य स्नायादिति श्रुतेर्मन्त्रब्राह्मणा-

---

आत्मोपाधिक है तस्मात् आत्मा ही निरुपाधिक (स्वाभाविक रूप से) प्रिय है। ऐसा जानने के बाद आत्मा का विज्ञान होने से सभी पदार्थ विदित होता है। इत्यादि उपसंहार से आनन्द स्वरूप आत्मा सबसे भिन्न है ऐसा ज्ञान होता है। उसके बाद इतना ही अमृतत्व है इस उपसंहार से आनन्द स्वरूप ब्रह्म के अभेद दर्शन को अमृतत्व (मोक्ष) के प्रति कारणत्व को जान करके किस प्रकार से अभेद दर्शन होगा ? एतादृश जिज्ञासा होने के बाद "आत्मा द्रष्टव्य है (दर्शन के योग्य है) मनन करने के योग्य है श्रवण करने के योग्य है निदिध्यासन योग्य है" इस श्रुति से जानकर के मुमुक्षु विचार करता है। नहीं कहेंगे कि ब्रह्म विचार असंभवित है तो ऐसा नहीं कहना द्रष्टव्यादिक चारों ज्ञान समान रूप से उपस्थित हुए हैं। इसलिये पूर्वोक्त उपक्रम उपसंहार से संस्कृत जो वेद वाक्य

ध्ययनवत् गृहस्थीभविष्यत्स्वकरिष्यमाणाग्निहोत्राद्यनुष्ठानसाधनीभूततत्तद्वाक्यार्थविचारमूलस्तम्भत्वेनावश्यकतया कर्ममीमांसाध्ययनस्यापि तदानीं सिद्धेः। एवं च मीमांसामेनां विचारेण मुमुक्षुर्विचारयति । न हि तावदेते चत्वारोऽपि विधयः आत्मदर्शनस्य निदिध्यासनविधिविहितक्रियानुष्ठानमात्रसाध्यतया पृथक्कृतिसाध्यत्वासम्भवेन पृथग्विधानायोगात् । नापि श्रवणमनननिदिध्यासनानि त्रीण्येव यथोक्तक्रमवन्ति प्रधानानि एकस्मै फलाय विधीयन्ते तेषां परस्परनिराकांक्षतया समुच्चयायोगात् ॥

अथ य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्य इति छान्दोग्योपनिषदा आत्मज्ञानस्यैवेष्टसाधनत्वे गमिते ज्ञानस्य प्रकाराकांक्षायामिष्टसाधनत्वमनूद्य द्रष्टव्यः श्रोतव्य इत्यादिविधयः प्रवर्तन्त इति चेन्मैवम् । एवमपि द्रष्टव्य इत्यस्यानर्थक्यादेव । न च सोऽनुवादः । न हि तस्येष्टसाधनत्वानुवादेनात्र किंचित्प्रयोजनम् प्रतिपत्तिचतुष्टयस्य तुल्यवदुपस्थितेः । तस्मात् पूर्वोक्ते नोपक्रमोपसंहारसंस्कृतवेदवाक्येना-

---

है उससे आत्म ज्ञान में मोक्ष रूप इष्ट साधनता का ज्ञान होता है । तत्पश्चात् आत्मा द्रष्टव्य इस एक देश से आत्मदर्शन का अनुवाद करके आत्म ज्ञानार्थी के लिये लाघवात् श्रवण रूप अङ्गी का विधान किया जाता है और मनन

त्मदर्शनस्यावगतम् अपवर्गेष्टसाधनत्वम् आत्मा द्रष्टव्य इत्येकदेशेननूद्य तदर्थितया श्रवणमङ्गि विधीयते लाघवात् । तत्फलीभूते चात्माद्वैतज्ञाने कुतर्काभ्यासदूषितान्तःकरणतया भेददृशामश्रद्धामलक्षालनरूपायोपकाराय मन्तव्य इत्यत्र मननं श्रवणाङ्गतया विधीयते मलक्षालनेऽपि सत्यात्मश्राविकाया उपनिषदो निदिध्यासनरूपेणोत्तरव्यापारेण नात्माद्वैतसाक्षा-

---

तथा निदिध्यासन श्रवण लक्षण अङ्गी का अङ्ग है न कि यह दोनों पृथक्-पृथक् स्वतन्त्र फल वाले हैं। इस विषय का स्पष्टीकरण स्वयं ग्रन्थकार बतलाते हैं। "तत्फलीभूते" इत्यादि, उस श्रवण का फल स्वरूप जो अद्वैतात्मक ज्ञान उसमें कुतर्क के अभ्यास से दूषित है अन्तःकरण (मन) जिनका ऐसे जो भेददृष्टि (जीव ब्रह्म में भेद ज्ञानवान) हैं उनके अश्रद्धा रूप जो मल उसका प्रक्षालनात्मक उपकार के लिये "मन्तव्यः" इस अंश से श्रवण के अङ्ग रूप मनन का विधान किया जाता है। अश्रद्धा रूप मल का प्रक्षालन होने पर भी सत्य आत्म स्वरूप का प्रतिपादन करने वाला उपनिषद् वाक्य निदिध्यासन रूप उत्तर व्यापार के विना अद्वैतात्म साक्षात्कारात्म के उत्पादन में समर्थन होता है। अतः शब्द के लिये एक निदिध्यासन अङ्गान्तर का विधान करता है। जैसे कुल्हाडी के ऊपर मट्टी से निघर्षण किया जाता है। बीज–मोर्चा–

त्कारफलपर्यवसानमिति दात्रस्य पांसुरुक्षणवत् शब्दस्य निदिध्यासनमपरमङ्गं विधीयते। तथा च मननिदिध्यासनाभ्यामङ्गाभ्यां उपहतानि ब्रह्माद्वैतवाक्यानि मुक्तिहेतुभूतब्रह्माद्वैतसाक्षात्कारं फलन्तीति। शब्दश्च आत्मसाक्षात्कारेऽस्मिन् करणम् असाधारणत्वात्। यदेव यस्यां बुद्धावसाधारणं तदेव तस्याः करणमिति मत्सिद्धान्तात्। अद्वैत-

---

लगी हुई कुल्हाडी से जब छेदन कार्य नहीं होता है तब उस पर मट्टी डाल कर उसको घिसा जाता है तब वह कार्य क्षम हो जाता है। इसी प्रकार प्रकृत में निदिध्यासन पांसुघर्षण के समान है। निदिध्यासन के बाद शब्द अप्रतिहित हो कर अद्वैतात्म साक्षात्कार स्वरूप फल का उत्पादन करता है। तब मन निदिध्यासन रूप अङ्गद्वय से सहकृत ब्रह्माद्वैत वाक्य "तत्त्वमसीति" मोक्षकारणीभूत जो ब्रह्माद्वैतसाक्षात्कार रूप फल का उत्पादन करता है। इस आत्म साक्षात्कार रूप कार्य में वाक्य ही करण है असाधारण होने से। जो जिस बुद्धि में असाधारण होता है वही उसका करण होता है। ऐसा नैयायिक का सिद्धान्त है। (जिसके उत्तर काल में जो कार्य होता है उस कार्य के प्रति पूर्ववर्ती करण है। शब्द के उत्तर काल में आत्मसाक्षात्कार होता है। इसलिए उक्त साक्षात्कार में शब्द करण है। ऐसा कहा भी है "वाक्यमप्रतिबद्धं सत् प्राक्

श्राविकास्तु उपनिषदः ऋग्वेदे प्रज्ञानं ब्रह्मेति। यजुर्वेदे अहं ब्रह्मास्मीति। तत्रैव बृहदारण्यके एष त आत्मान्तर्याम्यमृतः। तत्रैव तैत्तिरीये स यश्चायं पुरुषे यश्चासावादित्ये स एक इत्यादि। सामवेदे तत्त्वमसीति। अथर्ववेदे अयमात्मा ब्रह्मेति। एतानि तावन्महावाक्यानि। अत्र प्रथमवाक्ये

परोक्षावभासिते। करामलकवद्बोधमपरोक्षं प्रसूयते" यद्यपि अन्यत्र शब्द को परोक्ष ज्ञान जनकत्व ही है प्रत्यक्ष-ज्ञान जनकत्व नहीं होता है तथापि प्रकृत में प्रत्यक्ष ज्ञान जनकत्व तो है ही। जिस स्थल में विषय प्रत्यक्ष संनिहित रहता है वहां प्रत्यक्ष ज्ञानजनकत्व होता है, 'दशमस्त्वमसि" में शब्द का एतादृश स्वभाव देखा गया है।) ब्रह्माद्वैत का प्रतिपादन करने वाला निम्नलिखित उपनिषद् वाक्य है। ऋग्वेद में "प्रज्ञानं ब्रह्म" जीव ब्रह्म रूप है। यजुर्वेद में "अहं ब्रह्मास्मि" मैं ब्रह्म हूँ। उसी यजुर्वेद के बृहदारण्यक में "एष ते आत्माम्यमृतः" यही तुम्हारा आत्मा जीव अन्तर्यामी अमृत रूप है। उसी यजुर्वेद की तैत्तिरीय शाखा में कहा है "यश्चायं पुरुषे यश्चादित्ये स एक" जो इस पुरुष में है और जो आदित्य में है वे दोनों एक ही चेतन है। सामवेद में "तत्त्वमसि" तुम ईश्वर रूप हो। अथर्ववेद में "अयमात्मा ब्रह्म" यह आत्मा जीव ब्रह्म है। ये चारों महा वाक्य हैं। यहां प्रथम वाक्य में प्रज्ञान पद

प्रज्ञानपदेनैकादशेन्द्रियाधिष्ठातरि द्वितीयवाक्ये चाहमा जीवे चतुर्थवाक्येऽपीदमा स्वप्रकाशे जीव उक्ते सर्वत्र तस्य ब्रह्माभेदोऽनुभाव्यते। तृतीयवेदवाक्ये तु तत्पदस्य वाच्यं यतो वा इमानि भूतानि जायन्ते सदेव सौम्येदमग्र आसीत् तमो वा इदमेकमेवाग्र आसीत् नासदासीन्नोऽसदासीत्तदानीं नासीद्रजो व्योमापरो यत् किमावरीवः कुहकस्य शर्मन्नम्भः किमासीत् गहनं गभीरं न मृत्युरासीत् अमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः आनीतवातं सुधया तदेकं तस्माद्धान्यं न परः किंच नासत्तम आसीत् तमसा गूढमग्रे प्रकेतं सलिलं सर्वमा इदं तुच्छेनास्त्वपिहितं यदासीत्तपसस्तन्महिना जायतैकम्। तदैक्षत बहुस्यां प्रजायेयेत्यादिवाक्यार्थो-

---

से एकादशेन्द्रिय के अधिष्ठाता का ग्रहण होता है। द्वितीय वाक्य में अहं पद से जीव का ग्रहण होता है। चतुर्थ वाक्य में इदं पद से स्वप्रकाश जीव प्रतिपादित होता है। सभी जगह में जीव का ब्रह्म के साथ अभेद का प्रतिपादन किया गया है। तृतीय वेद वाक्य में तत्त्वमसि में तत् पद का वाच्य जिससे यह सब भूत उत्पन्न होते हैं, हे सौम्य! यह परिदृश्य मान जगत् उत्पत्ति के पहले सद्रूप ही था, उत्पत्ति के पहिले तम मात्र था, असत् नहीं था सद्रूप कोई पदार्थ नहीं था। उस समय में आकाश नहीं था मृत्यु नहीं अमृत नहीं दिन नहीं रात नहीं, तम था। उसने ईक्षण

भूतमनाद्यविद्यामायाश्रयो जगदुत्पत्तिस्थितिनिरोधकारणं सच्चिदानन्दैकरसं ब्रह्म । तत्पदस्य लक्ष्यं तु सत्यं ज्ञानमनन्तं ब्रह्म । ब्रह्मैवेदममृतं पुरस्तात् ब्रह्मदक्षिणतः पश्चाच्चोत्तरेणाधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठमित्याद्युपनिषद्भिः प्रतीतं नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयं ब्रह्म । त्वं पदस्य शक्यं तु देहेन्द्रियमनोबुद्धिप्राणाहङ्कारैः कृशस्थूलादिदेह-

---

किया, मैं एक से बहुत हो जाऊँ, इत्यादि वाक्य से अनादि अविद्या का आश्रय आकाशादि सब का उत्पत्ति स्थिति प्रलय का कारण सत् चित् आनन्दात्मक ब्रह्म प्रतिपादित होता है । तत् पद का लक्ष्य तो सत्य ज्ञान अनन्त ब्रह्म है वह अमृत स्वरूप ब्रह्म ही पूर्व में है ब्रह्म ही दक्षिण में, पश्चिम में, उत्तर में ऊधः अर्ध्व में सर्वत्र व्याप्त है ब्रह्म ही सर्वश्रेष्ठ है इत्यादि उपनिषद् वाक्यों से जाना गया नित्य शुद्ध बुद्ध मुक्त सत्य परमानन्दात्मक अद्वय ब्रह्म ही लक्ष्य है । त्वं पदका शक्य वाच्य अर्थ जीव है जो कि देह इन्द्रिय मन बुद्धि प्राण अहंकार से तथा स्थूलत्व कृशत्वादि देह धर्म से, मूकत्व बधिरत्व आदि इंद्रिय धर्म से, काम इच्छा संकल्पादि रूप अन्तःकरण धर्म से अस्ति उत्पत्ति वृद्धि परिणाम अपक्षय विनाशात्मक छै भाव विकार से, अशना पिपासा शोक जरा मरणादि, रूप छै उर्मी से, त्वचा मांस मेद रुधिर अस्थि मज्जा रूप छै कोश से युक्त है, आध्या-

धर्मैर्मूर्कत्वादीन्द्रियधर्मैः कामादिभिरन्तःकरणधर्मैः अस्तित्वोत्पत्तिविवृद्धिपरिणत्यपक्षयविनाशैः षड्भिर्भावविकारैः अशनायापिपासाशोकजरामरणैः षड्भिरूर्मिभिः त्वग्रुधिरमांसमेदोऽस्थिमज्जात्मकैः षड्भिः कोशैरुपेत आध्यात्मिकाधिदैविकाधिभौतिकेन तापत्रयेणाभिभूतः स्वर्गनरकाद्यनुभवी प्रत्यगात्मा ।

त्मिक अधिदैविक आधिभौतिक लक्षण तापत्रय से अभिभूत है स्वर्ग नरकादि स्थान का अनुभव करने वाला प्रत्यगात्मा है वही त्वं पद का वाच्य अर्थ है। और जो यह विज्ञानमय हृदय के भीतर ज्योतिः स्वरूप है इस वाक्य से प्रतिपादित देहादि से विलक्षण देहादि का साक्षी रूप है सो त्वं पद का लक्ष्य है। यहाँ जहदजहत्लक्षणा (भागत्यागलक्षणा) से तत्त्वं में जो विरुद्धांश है, जैसे त्वं पदार्थ में आविद्यक जो देहादि संबन्ध है उस को हटा करके त्वं पदार्थ का एकदेश प्रत्यगात्मा को। एवं तत् पदार्थैक माया संबन्ध को छोड़ कर के त्वं पदार्थैकदेश अन्तर्ज्योति स्वरूप को तत्पदार्थैक देश ब्रह्म के साथ अभिन्नता का प्रतिपादन असि पद से होता है। यहाँ लक्षणा का अर्थ है तात्पर्यमात्र। उपदेश द्वारा जायमान एतादृश वाक्यार्थज्ञान ही तत्व ज्ञान है जो कि श्रोतव्य इत्यादि विधि का विषय है। ऐसा होने से आत्मा से अतिरिक्त वस्तु में प्रकाशात्मकत्व का निराकरण होने से। तात्पर्य रूप से श्रुति द्वारा

लक्ष्यं तु योऽयं विज्ञानमयो हृद्यन्तर्ज्योतिः पुरुष इत्यादि-वाक्यैर्निरूपितो देहादिविलक्षणस्तत्साक्षीति ॥

अत्र च जहदजहत्स्वार्थलक्षणया तत्त्वविरुद्धमाविद्यकं देहादिसम्भेदमपास्य त्वं पदार्थैकदेशं प्रत्यगात्मानमन्तर्ज्योतिरादिरूपं तत्पदार्थीभूतब्रह्माभिन्नतयाऽसिपदेनानुभाव्यते। लक्षणा च तात्पर्यमात्रम् । एतादृशमेव वाक्यार्थज्ञानमौपदेशिकं तत्त्वज्ञानं श्रोतव्य इत्यादिविधिविषयीभूतमिति । एवं च आत्मातिरिक्ते प्रकाशासम्बन्धेन निरस्ते प्रत्यगात्मनि च परमात्माभिन्नतया श्रुत्या तात्पर्यतोऽविद्यादशायामनुभाविते सिद्धं ब्रह्माद्वैतमिति वदन्ति ॥

तत्रोच्यते । शब्दो न साक्षात्कारकारणम् चक्षुषा साक्षात्कारं करोमीतिवत् शब्देन साक्षात्करोमीत्यनवगतेः । किञ्चात्मा वा अरे द्रष्टव्य इत्याद्युपक्रम्यात्मनो वा अरे दर्शनेन श्रवणेन

जीवात्मा को परमात्मासे अविद्या दशा में अभेद का प्रतिपादन होने से ब्रह्माद्वैत की सिद्धि होती है ऐसा अद्वैत मतानुयायी लोग कहते हैं ।

अब नैयायिक समाधान करते हैं—शब्द साक्षात्कारी ज्ञान में (प्रत्यक्ष ज्ञान में) करण नहीं हो सकता है। क्योंकि चक्षु से साक्षात्कार करता हूं इसके समान शब्द से साक्षात्कार करता हूँ ऐसी प्रतीति नहीं होती है। किं च आत्मा देखने योग्य है इत्यादि

मत्या विज्ञानेनेदं सर्वं विदितं भवतीति शतपथे श्रवणात्तुल्यवत्प्रतिपत्तिचतुष्टयावगतेर्नाङ्गाङ्गिभावः । हन्तैवमात्मज्ञानेन सर्वं विदितं भवतीति शतपथादप्यात्माभिन्नं सर्वं सिद्ध्येदिति चेन्न । सर्वस्याविद्यकतयात्मनश्च तात्त्विकत्वेन तयोर-

---

उपक्रम करके अरे आत्मा के दर्शन से श्रवण से मति से विज्ञान से यह परिदृश्यमान संपूर्ण जगत् विदित हो जाता है। इस शतपथब्राह्मण से सुनने में आता है तो एक रूप से चारों प्रकार (दर्शन श्रवण मनन निदिध्यासन) का ज्ञान अवगत होने से चारों ही समान है नहीं तो इन चारों में परस्पर अङ्गाङ्गी भाव है। अङ्गाङ्गी भाव मानने से तुल्यत्त्वावगम बाधित हो जायगा। आत्मज्ञान से यह सब विदित हो जाता है। इस शतपथ से तो यही सिद्ध होता है कि सभी पदार्थ आत्मा से अभिन्न हैं। (यदि यह कार्य जात आत्मस्वरूप न हो तो आत्मा के जानने से कैसे जाना जायगा ? क्या अश्व के ज्ञान से गो जाना जाता है ? इसलिये सब में अत्माभिन्नत्व सिद्ध होता है) ऐसा नहीं कह सकते हैं क्योंकि आकाशादि प्रपंच आविद्यक हैं और आत्मा तात्विक है तो इन दोनों में अभेद होना असंभव है। (क्या कभी भी शुक्ति रजत और घट एक होता है ? क्यों ? तो इसमें एक प्रतिभासिक है और घट व्यावहारिक है। अतः इन दोनों में (तात्त्विक और

भेदासम्भवात् किं तु तज्ज्ञानं स्तूयते। अपि च नित्यानित्यवस्तुविवेके शमदमादिमुमुक्षाभोगवैराग्यैर्ब्रह्मविचारेऽधिकार इत्यात्थ। अत्राद्यो न तावद् ब्रह्मविचारादेव अन्योन्याश्रयात्। नापि न्यायात् ब्रह्मविचारस्य न्यायपूर्वकत्वनियमापत्तेः। न चेष्टापत्तिरपसिद्धान्तात्। किञ्च श्रुतिजन्या ब्रह्माद्वैतविषया धीर्न तावद् ब्रह्माभिन्ना अजन्यत्वापत्तेः।

आविद्यक में) अभेद कथमपि नहीं हो सकता है। किंतु शतपथ में जो अभेद कहा गया है सो ज्ञान की स्तुति मात्र है। और भी नित्य अनित्य वस्तु का विवेक, इहामुत्रार्थ फल भोग विराग, शम दमादि साधन षट्क, और मुमुक्षुत्व इन चार को आप ब्रह्म विचार में कारण कहते हैं, अर्थात् इन चार के रहने से ही ब्रह्म विचार होता है, अन्यथा नहीं। तो इन चार में जो प्रथम है, नित्यानित्य वस्तु विवेक, वह क्या ब्रह्म विचार से ही होता है? यदि ऐसा मानलें तब तो अन्योन्याश्रय होगा। क्योंकि ब्रह्म विचार करने पर नित्यानित्य वस्तु विवेक होगा, और नित्यानित्य वस्तु विवेक होने पर ब्रह्म विचार होगा। न वा न्याय से (युक्ति से) ब्रह्म विचार होगा। ऐसा नहीं कह सकते हैं क्योंकि ऐसा मानने से ब्रह्म विचार को न्याय पूर्वकत्व हो जायगा। इसमें इष्टापत्ति नहीं कह सकते हैं, क्योंकि आपका सिद्धान्त नहीं है। और भी श्रुतिसे होने वाली

नापि ब्रह्मभिन्ना परप्रकाशापत्तेः । तद्भेदाभेदाभ्यां न सा निर्वक्तुं शक्यत इति चेत् । सोऽयं पुंसोऽपराधो न तु वस्तुनः । वस्त्वेव तत्तथेति चेत् । अहो मोहो येन प्रमाण-गोचरस्यावस्तुत्वं तदगोचरस्य तु वस्तुत्वमङ्गीकार्यते नूनं गगनारविन्दादिकमपि वस्तु मंस्यसे । किञ्च सर्वशून्यतानगरं

ब्रह्माद्वैत विषयक बुद्धि ब्रह्म से अभिन्न है अथवा भिन्न है ? इसमें प्रथम पक्ष ठीक नहीं है क्योंकि ब्रह्मनित्य है तो उससे अभिन्न जो अद्वैत ज्ञान सो जन्य कैसे होगा ? यदि द्वितीय पक्ष मानें तो वह भी ठीक नहीं है क्योंकि भेद मानने से ब्रह्माद्वैत ज्ञान पर प्रकाश्य हो जायगा । नहीं कहें कि भेदाभेद अनिर्वचनीय की सिद्धि होती है । सो भी ठीक नहीं है क्योंकि अनिर्वचनीयत्व तो पुरुष का अपराध है पदार्थ का अपराध नहीं है । नहि कहें कि पदार्थ ही ऐसा है जो अनिर्वचनीय है, ऐसा कहा है कि "यथा यथार्था-श्चित्यन्ते विशीर्यन्ते तथा तथा । यदेतत्स्वयमर्थेभ्यो रोचते तत्र के वयमिति ।"

समाधान—आपको यह मोह है कि प्रामाणिक जो पदार्थ उसको तो अवस्तु कहते हैं और जो प्रमाण का विषय नहीं है उसको वस्तु मानते हैं । अर्थात् ब्रह्म विषयक जो वृत्ति है जिसमें पूर्वोक्त विकल्प द्वारा प्रमाण सिद्धत्व नहीं बनता है उसको वस्तु रूप मानते हैं और सकल

विज्ञाननगरं वा प्रविश स्वीकुरु वा पारमार्थिकीं प्रमाणगम्यतामिति। अपि च स्वप्रकाशत्ववत् स्वात्मिकाया लौकिक्याः प्रकाशक्रियायाः कर्मत्वं वाच्यम्। तच्च न। अभेदे क्रियाकर्मभावानुपपत्तेः। अलौकिकधीचतुष्के त्वगतिः समाधिः॥

अथ किमिदं कर्मत्वम्। न तावत्क्रियाफलशालित्वम्।

प्रमाणसिद्ध जो आकाशादि पदार्थ स्वक्रिया में समर्थ हैं उनको नहीं मानते हैं। इस स्थिति में तो आप गगन-कुसुम को भी वस्तु ही मानेंगे। और भी इस स्थिति में आप सर्व शून्यता नगर (माध्यमिक के सिद्धान्त) में प्रवेश कीजिये अथवा विज्ञानवादी के नगर में प्रवेश कीजिये (अर्थात् माध्यमिक या विज्ञानवादी का मत लेकर आप कह रहे हैं। अतः आपको स्वसिद्धान्त परित्याग रूप दोष होता है)। अथवा पारमार्थिक प्रमाण गम्यत्व सबको मानिये। और भी जैसे ज्ञान में स्वप्रकाशत्व मानते हैं उसी तरह स्वात्मक जो लौकिक प्रकाश क्रिया है उसका कर्म ज्ञान को मानिये। परन्तु यहाँ यह हो नहीं सकता है, क्योंकि अभेद में क्रिया का कर्म भाव नहीं होता है। अलौकिक जो चार ज्ञान हैं उनमें तो अगति ही समाधान है।

शंका—यह कर्मत्व वस्तु क्या है? क्रिया के द्वारा होने वाला जो फल, तादृश फल का जो आश्रय हो उसका नाम है कर्म। जैसे "चैत्रो ग्रामं गच्छति" चैत्र गाँव जाता

गमनक्रियाफलीभूतग्रामसंयोगशालिनो ग्रामस्येव चैत्रस्यापि कर्मतापत्तेः। किं तु परसमवेतेति क्रियाविशेषणम्। ननु परत्वं न तावत् कर्मत आत्माश्रयापत्तेः। नापि फलाश्रयतः कर्तुरपि संयोगविभागरूपफलाश्रयत्वादिति चेन्न। तत्क्रियान-

---

है, यहाँ क्रिया है गमन, उस क्रिया से जायमान जो फल संयोगरूप फल उसका आश्रय है गाँव, उसको कर्म कहते हैं तो यह लक्षण ठीक नहीं है, क्योंकि "चैत्रो ग्रामं गच्छति" यहाँ जैसे ग्राम की कर्म संज्ञा होती है उसी प्रकार से चैत्र की भी कर्म संज्ञा हो जायगी। क्योंकि यहाँ क्रिया जो गमन रूपा है उससे होने वाला फल संयोगरूप फल उसका आश्रय जैसे ग्राम है, उसी प्रकार से चैत्र भी है। संयोग द्विष्ठ होता है। संयोग ग्राम तथा चैत्र दोनों में ही रहता है। अतः क्रिया जन्य फलशाली हो वह कर्म है। यह लक्षण ठीक नहीं है। किन्तु परसमवेतत्व, यह भी क्रिया का विशेषण है। अर्थात् परसमवेत जो क्रिया उससे जायमान जो फल उस फल का जो आश्रय होता है उसको कर्म कहें तो एतादृश फलाश्रत्व ग्राम में ही है चैत्र में नहीं है।

शंका—जो यह परत्व विशेषण देते हैं सो कर्मापेक्षया परत्व कहते हैं अथवा फल की अपेक्षा से परत्व, कहते हैं? इसमें प्रथम पक्ष कर्म की अपेक्षा से परत्व यह पक्ष ठीक नहीं है क्योंकि आत्माश्रय दोष हो जायगा। कर्म का

धिकरणत्वे सति तत्क्रियाफलशालिनः कर्मत्वात् । हन्त तर्हि वृक्षात् पतति पत्रेऽपादानीभूतस्यापि वृक्षस्य पत्रनिष्ठस्पन्द-क्रियाजन्यविभागरूपफलाश्रयतया कर्मतापि स्यात् । तथा च वृक्षं पत्रं पततीति स्यात् । न स्यात् धात्वर्थतावच्छेदकत्वेन फलविशेषणात् । पूर्वविभागस्तु न पतिधात्वर्थतावच्छेदक इति

लक्षण कर्म घटित हो जाता है । न वा फलापेक्षया परत्व विवक्षित है । जो द्वितीय पक्ष है सो भी ठीक नहीं है, क्योंकि संयोग विभाग रूप जो क्रिया जन्य फल उसका आश्रय कर्ता भी होता है ।

उत्तर–तत् क्रिया का अनधिकरण हो और तत् क्रिया जन्य जो फल शाली हो उसको कर्म कहते हैं । ऐसा कर्म लक्षण करने से कर्ता में अतिव्याप्ति नहीं होती है । क्योंकि कर्ता गमनादि क्रिया का अनधिकरण नहीं होता है ।

लघुपूर्व पक्ष–तब तो वृक्ष से जब पत्ता गिरता है वहाँ वृक्ष अपादान है, किन्तु पत्र में रहने वाली जो पतन क्रिया तादृश क्रिया से जायमान जो विभाग रूप फल तादृश विभागात्मक फल का आश्रयत्व वृक्ष में भी है, कर्म संज्ञा हो जायगी । यहाँ वृक्ष अपादान है कर्म नहीं है किन्तु उक्त लक्षण के जाने से 'वृक्षं पर्णं पतति' ऐसा भी प्रयोग हो जायगा । अर्थात् कर्म लक्षण को अतिव्याप्ति अपादान में हो जायगी ।

न तरुः पतेः कर्म । अत एव पत्रस्पन्दक्रिया यदा त्यजिनोच्यते तदा वृक्षः कर्मैव पूर्वविभागस्यैव त्यजिधात्वर्थतावच्छेदकत्वात् । यद्यपि यमेव स्पन्दं त्यजिराह तमेव पतिरपि । तथा च त्यजेरेव प्रयोगे तरुः कर्म न तु पतेरपि शब्दशक्तिवैचित्र्यात् । तथा च विशिष्टस्यैव तत्तद्धात्वर्थतावच्छेदकफल-

---

उत्तर–फल में धात्वर्थतावच्छेदकत्व यह विशेषण देने से । अर्थात् क्रिया जन्य जो फल है वह कैसा हो ? तो धात्वर्थ का विशेषण हो ? प्रकृत स्थल में पूर्व विभाग पतधात्वर्थतावच्छेदक नहीं है इसलिये पतन क्रिया का कर्म वृक्ष नहीं होता है । अत एव पत्र में होने वाली स्पन्दन क्रिया जब त्यज धातु से कही जाती है तब तो वृक्ष कर्म कहलाता है 'वृक्षं त्यजति पत्रम्' ऐसा प्रयोग होता है (यहाँ पत्र है कर्ता त्याग है धात्वर्थ वृक्ष है कर्म) क्योंकि यहाँ पूर्व विभाग त्यज धात्वर्थतावच्छेदक है । यद्यपि जिस स्पन्द को त्यज धातु कहता है उसी स्पन्द को पत धातु भी कहता है तथापि त्यज धातु के प्रयोग में ही वृक्ष की कर्म संज्ञा होती है, पत धातु के प्रयोग में नहीं । कर्म संज्ञा वृक्ष को होती है, क्योंकि शब्द की शक्ति विचित्र होती है (त्यज धातु तथा पत धातु के समानार्थकत्व होने पर भी त्यज धातु के योग से ही वृक्ष की कर्म संज्ञा होती है 'वृक्षं त्यजति पत्रम्' यह प्रयोग होता है और पत धातु के योग

शालित्वम् तत्तद्धातुप्रयोगे तत्तत्कारकस्य कर्मत्वमित्यननुगतमेव कस्याः क्रियायाः किं कर्मेति विशिष्यैवाकाङ्क्षोदयात्। नन्वेवं नदी वर्धत इत्यत्र वृद्धिरवयवोपचयरूपा धात्वर्थः। तत्फलं त्वप्राप्तदेशप्राप्तिः। तच्च तीरनिष्ठमतस्तीरं कर्म स्यात्। एवं पतेःस्पन्दविशेषोऽर्थः। तत्फलं त्वधःसंयोगः। स चाधोनिष्ठ इत्यधः कर्म स्यात्। तेन नदीतीरं वर्धत इति भूतलं पत्रं पततीति च प्रयोगः स्यादिति चेदत्र प्राञ्चः। अप्राप्तदेशप्राप्त्युपहितावयवोपचयस्य विशिष्टस्यैव वृद्धिधात्वर्थत्वम्। तथाऽधःसंयोगावच्छिन्नस्पन्दस्य पत्यर्थत्वमिति तीराधःपदार्थयोरुक्तसंयोगविशेषवतोर्धातुभ्यामेवोपस्थितिरिति न तत्र कर्मविभक्तिराकाङ्क्षाविरहात्। तदुक्तम्।

धातोरर्थान्तरे वृत्तौ धात्वर्थेनोपसंग्रहात्।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥इति॥

में वृक्ष की कर्म संज्ञा नहीं होती है :वृक्षात्पतति पत्रम्' यही प्रयोग होता है। (क्योंकि शब्दका सामर्थ्य अलग अलग होता है) ऐसा होने से विशिष्ट को ही तत् धात्वर्थतावच्छेदक फलशालित्व है। अतः तत्तत् धातु के प्रयोग में तत् तत् कारक को ही कर्मत्व होता है सबको नहीं। अतः कर्मत्व अनुगत नहीं है किन्तु अनुगत ही कर्मत्व है। क्योंकि किस क्रिया का कौन कर्म है ? इस प्रकार से विशेष रूप से ही आकांक्षा होती है।

संगच्छते इत्यादौ धातोरर्थान्तरे वृत्तिः । वर्धते पतती-

शंका–पूर्व क्रम से 'नदी वर्धते' इस स्थल में धात्वर्थ है वृद्धि । वृद्धि कहते हैं अवयव का उपचयापचय (बढ़ने-घटने) को । फल है अप्राप्त देश की प्राप्ति, यह जो अप्राप्त देश की प्राप्ति, फल है सो तीर में रहता है, तब तीर को भी कर्म संज्ञा होनी चाहिये और नदी वर्धते तीरे के समान 'नदी तीरं वर्धते' यह भी प्रयोग साधु प्रयोग कहलाना चाहिये, अर्थात् जो तीर अधि- करण है वह कर्म हो जायगा । अधिकरण में कर्मलक्षण जाने से अतिव्याप्ति हो रही है एवं पत् धातु का अर्थ है स्पन्द विशेष, अर्थात् विलक्षण क्रिया । उस क्रिया से जायमान फल होता है उधः संयोग, यह संयोग अधोदेश भूतलादिक में रहता है तो अधोदेश भूतलादिक भी कर्म हो जायगा । तब तो 'नदी तीरं वर्धते' 'भूतलं पत्रं पतति' ऐसा भी प्रयोग होना चाहिये । परन्तु ऐसा तो प्रयोग नहीं होता है ।

इस प्रश्न का उत्तर प्राचीन के सिद्धान्त से कहते हैं कि अप्राप्त देश प्राप्ति से उपहित जो अवयवोपचय वही विशिष्ट रूप से वृध धात्वर्थ है (अर्थात् अप्राप्त देश प्राप्त्यु-पहितत्व विशिष्ट अवयवोपचय धात्वर्थ है) तथा अधः संयोगवच्छिन्न जो स्पन्द (क्रिया) यही पत धातु का अर्थ है, अतः तीर तथा अधः पदार्थ तत्तत्संयोग विशिष्ट की

त्यादौ धात्वर्थेनोपसंग्रहः । माघे माघे व्रजाम्यहमिति काञ्चन-मालिनीवाक्ये प्रयागमिति । प्रसिद्धेरविवक्षातो यथा । गच्छ

उपस्थिति धातु द्वारा ही होती है तब उन दोनों में आकांक्षा का अभाव होने से कर्म विभक्ति नहीं होती है। यदि तीर तथा अधोदेश की उपस्थिति नहीं होती तो द्वितीया विभक्ति द्वारा उन दोनों की उपस्थिति के लिये द्वितीया विभक्ति आवश्यक होती। किन्तु यहाँ तो धातु से ही वह दोनों उपस्थित हो जाते हैं। इस स्थिति में कर्मत्व अनावश्यक है। इस विषय को लेकर वैयाकरणों ने कहा है "धातु यदि अर्थान्तर में वृत्ति हो एवं धात्वर्थ से जिसका संग्रह होता हो, और जो कर्म उसकी अविवक्षा हो, उन स्थलों में सकर्मक क्रिया भी अकर्मिकी कहलाती है। संगच्छते में गम् धातु अर्थान्तर में है। (गम धातु का अर्थ होता है गमन्,) परन्तु प्रकृत मिलना यह अर्थ होता है। इस धातु की वृत्तिता अर्थान्तर में है। वर्द्धते तथा पतति में अधोदेश तथा तीरादिक धात्वर्थ से उपसंगृहीत होता है। एवं माघे माघे व्रजाम्यहम्' हरेक माघ में जाती हूँ, इस कांचनमालिनी वाक्य में 'प्रयागम्' प्रसिद्धि की अविवक्षा का उदाहरण है। "गच्छ गच्छसि चेत्" यहाँ धात्वर्थ प्रसिद्ध है गमन। परन्तु गमन की विवक्षितता नहीं है किन्तु गमनाभाव विवक्षित है। अतः यहाँ सकर्मक धातु भी

गच्छसि चेत् कान्तेत्यादावित्याहुः ॥

नव्यास्तु वृधेर्व्यापारोऽर्थः अवयोपचयः फलं तदवच्छेदकमिति न तीरं कर्म तादृशफलभागित्वाभावात् । पतेस्त्वधः

अकर्मक होता है, यहाँ कर्म की आवश्यकता नहीं है, अकर्मक होने से । गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः । ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् (हे कान्त यदि आप जाना चाहते हैं तो जाइये, आपका मार्ग कल्याणकारक हो, किन्तु मेरा भी जन्म उसी स्थान में हो जहाँ आप जा रहे हैं) अब यहाँ गमन में तात्पर्य नहीं है, जाने पर मेरा मरण हो जायगा क्योंकि जन्म मरणोत्तर कालिक है; अतः गमन का विधान नहीं है किन्तु गमन का निषेध होता है, इसलिये गम धातु का प्रसिद्ध जो गमन उसकी विवक्षा नहीं की जाती है अतः अकर्मक हो जाता है ।

नवीन प्रकृत में समाधान करते हैं—वृध धातु का व्यापार अर्थ होता है, अवयवोपचय फल है, वह फल धात्वर्थतावच्छेदक है इसलिये तीर कर्म नहीं है क्योंकि धात्वर्थतावच्छेदकीभूत जो फल है उसका आश्रय तीर नहीं होती है । अतः 'नदी तीरं वर्द्धते' ऐसा प्रयोग नहीं होता है । और पत धातु का अधोदेश कर्म है क्योंकि धात्वर्थ के उपलक्षणी भूत तत्तत्फल रूप संयोग का आश्रय

कर्मैव धात्वर्थोपलक्षणीभूततत्तत्फलरूपसंयोगाश्रयत्वात् । कर्म-विभक्तिरपि तत्र । अत एव–

उद्धृत्य मेघैस्तत एव तोयमर्थं मुनीन्द्रैरिव संप्रणीताः ।
विलोकयामास हरिः पतन्तीर्नदीः स्मृतीर्वेदमिवाम्बुराशिं ॥

इति माघकाव्यमपि ।

अत एव न अकर्मकधातुगणे लज्जासत्तास्थितिजागरणम् इत्यादौ पतेः पाठः द्वितीयाश्रितातीतपतितेत्यादिना नरकं पतित इत्यादौ समासश्चापि घटत इत्याहुः ॥

नन्वधस्तीरयोः कथं कर्मताशङ्कापि पतने वृद्धौ च

होने से । अतः वहाँ कर्म विभक्ति भी वही होती है माघ काव्य प्रयोग में कर्म विभक्ति होती है ऐसा कहा है "उस समुद्र से मेघ जल लेकर के समुद्र में गिरती हुई नदी को भगवान् ने देखा, जैसे वेद से अर्थ लेकर मुनियों द्वारा बनाई गई स्मृति पुनः वेद रूप समुद्र में ही गिरती हैं, अर्थात् चरितार्थ होती हैं । अत एव अकर्मक धातु के परिगणन में लज्जा तत्ता स्थिति जागरण वृद्धि क्षयादिक में पत धातु का पाठ नहीं किया है । और 'द्वितीयाश्रितातीतपतितेति' इस सूत्र से 'नरकं पतितः' इत्यादि स्थल में समास भी होता है ऐसा कहा है ।

शंका–अधोदेश तथा तीर में कर्मत्व की आशंका ही कैसे होती है ? क्योंकि पतन में तथा वृद्धि में तो कारकत्व

कारकत्वाभावात् कारकविशेषस्य च कर्मत्वादिति चेद् भ्रान्तोऽसि । द्वितीयाप्रयोगो ह्यापाद्यते स चाकारके ऽपि प्रकृतक्रियाफलशालिनि यथा ग्रामादौ । कुत्र तर्हि कीदृशी

ही नहीं है और कारक विशेष का ही नाम होता है कर्म । (कार्य का जो जनक होता है उसका नाम होता है कारण) वह कारण तीन प्रकार का होता है, समयायि कारण असमवायि कारण और निमित्त कारण । पुनः निमित्त कारण छै प्रकारका होताहै—कर्ता कर्म, करण, संप्रदान, अपादान, अधिकरण । अतः कर्म होगा सो कारक अवश्य होगा । अतः जो कारक होगा सो कारण होगा ही । और कारण जो होता है सो कार्य का जनक ही होता है । एक नियम और है कि व्यापक का अभाव होने से व्याप्य का अभाव होता है, तब प्रकृत में कर्म में व्यापक जो जनकता है उसका जब अभाव है तब कारकत्व कैसे रहेगा ? और कारकत्व जनकत्व कैसे होगा ? कर्म तो क्रिया का जनक नहीं है यह पूर्व पक्षी का आशय है ।

समाधान—तुम भ्रान्त हो, मैं तो द्वितीया विभक्ति के प्रयोग में आपत्ति दे रहा हूँ, यह प्रयोग तो कारक भिन्न धात्वर्थतावच्छेदक फलशाली में होता है । जैसे 'ग्रामं-गच्छति' इस प्रयोग में यहाँ धात्वर्थतावच्छेद संयोग रूप फल का जनक तो देवदत्त है क्योंकि देवदत्त चलन कर्ता है

द्वितीया व्रीहीन् प्रोक्षति घटं पश्यामीत्यादौ कर्मत्वे शाक्ती आत्मनं जानातीत्यादौ तु तत्र भाक्ती परत्वाभावात् । ग्रामं गच्छतीत्यादावपि तथा ग्रामोदेस्तत्क्रियायामकारकत्वात् । एवं वह्निमनुमिनोमीत्यादावपीति । विस्तरस्तु तत्त्वालोके मयैवोक्त इतीहोपरम्यते ।

ग्राम जनक नहीं है आश्रयमात्र है ।

शंका–तब किस फल में किस प्रकार की द्वितीया होती है ।

उत्तर–सुनो ! 'बीहीन् प्रोक्षति' व्रीही का प्रोक्षण करता है 'घटं पश्यामि' घट को देखता हूँ । इस स्थल में शाक्ती कर्मता है, व्रीही तथा घट प्रोक्षण तथा ज्ञान क्रिया का जनक है । 'आत्मानं जानाति' आत्मा को जानता है यहाँ भाक्ती कर्मता है, क्योंकि यहाँ पर समवेत क्रिया नहीं है, और ग्रामं गच्छति । ग्राम जाता है, यहाँ भी भाक्ती कर्मता है क्योंकि यहाँ भी ग्राम में क्रिया जनकत्व, नहीं है । यहाँ तो गमन रूप क्रिया जनकत्व तो देवदत्त रूप कर्ता में है । एवं 'वह्निमनुमिनोमि' वह्निका अनुमान करता हूँ, यहाँ भाक्ती कर्मता ही है, क्योंकि यहाँ भी क्रिया का जनक वह्नि नहीं है । इस विषय का विस्तृत विचार मत्कृत तत्वालोक में देखें । अतः इस विषय को मैं यहाँ ही छोड़ता हूँ ।

यत्तु स्वकर्मत्वं स्वप्रकाशत्वमुक्तदोषैर्माभूत् अस्तु स्वविषयत्वमेव स्वप्रकाशत्वम् । यद्वा स्वव्यवहारे ज्ञानान्तरानपेक्षत्वमेव स्वप्रकाशत्वं स्वस्मिन् सत्येव स्वव्यवहारात् । अथ विषयविषयिभावो भेदे दृष्टस्तथा व्यवहारो व्यवहर्तव्यज्ञाना-

---

जिस किसी ने कहा कि यद्यपि स्व का जो कर्म है उसी का नाम स्वप्रकाश है, यह स्वप्रकाशकता लक्षण नहीं बनता है तो भले न बने, क्योंकि स्व में स्व को कर्मत्व नहीं होने से । तथापि स्व का जो विषय हो उसी का नाम है स्व प्रकाश । अथवा स्व के व्यवहार में ज्ञानान्तर की अपेक्षा न करे उसको स्व प्रकाश कहते हैं । स्व के रहने से ही स्व का व्यवहार होता है । क्या घट के अभाव रहने पर घट का व्यवहार कभी भी हो सकता है ? अतः स्व के (ज्ञान के) व्यवहार में अन्य ज्ञान की अपेक्षा नहीं होती है, इसलिये ज्ञान स्व प्रकाश है । एतादृश स्व प्रकाशत्व लक्षण बन सकता है ।

अवान्तर पूर्व पक्ष—अथेत्यादि विषय विषयी भाव संबन्ध वहीं होता है जहाँ परस्पर भेद रहता है, जैसे घट और ज्ञान में । घट और ज्ञान जब परस्पर भिन्न हैं तब ही दोनों में विषय विषयो भाव रूप होता है, इतर संबध का बाध होने से । इसी प्रकार का व्यवहार जहाँ होता है वहाँ व्यवहर्तव्य पदार्थ का ज्ञान अवश्य रहता

द्दृष्टः । तथा च तदुभयं विनापि विषयविषयिभावस्य व्यवहारस्य चाङ्गीकारे दृष्टविरोधः स्यादिति चेन्न । यदि स्वप्रकाशो न स्यात् तदा ज्ञानमेव न सिद्ध्येयेत् परप्रकाशेऽनवस्थानादित्यन्यथानुपपत्त्या दृष्टविरोधविधूननादिति । तन्न । परप्रकाशपक्षे ऽप्यनवस्थाया निरस्तत्वेनान्यथानुपपत्तेरनवतारात् ।

है अन्यथा व्यहर्तव्य के ज्ञान के बिना भी व्यवहार हो जायगा, तब तो भेद और ज्ञान के बिना भी विषय विषयी भाव और ज्ञान के बिना भो ज्ञान का व्यवहार मानलेवें तो दृष्ट विरोध होता है ।

समाधान–ऐसा मत कहो । क्योंकि यदि ज्ञान को स्व प्रकाश न मानो तब तो वह ज्ञान ही नहीं होगा । अर्थात् ज्ञानत्व की सिद्धि नहीं होगी । यदि ज्ञान को परतः प्रकाश मानें तो अनवस्था हो जायगी । इसलिये अन्याथानुपपत्ति के बल से दृष्ट विरोध की शंका दूर जाती है । जैसे कहा है "अन्यथानुपपत्तिश्चेदास्ति वस्तु प्रसाधिका । पिनष्टि दृष्टि वैमत्यं सैव सर्वबलाधिकेति" । यदि पदार्थ की सिद्धि करने वाली अन्यथानुपपत्ति विद्यमान हो तो वह सर्व प्रमाणापेक्षया बलवती होकर के सभी दृष्ट विरोध को दूर कर देती है । चाहे अन्यथानुपपत्ति का जो विरोधी है अन्यथोपपत्ति उसको बतलाइये अथवा दृष्टता का जो आग्रह है उसको छोडिये । जैसे 'घट को देखता है, यहाँ

यत्तु स्वाविषयकेणाज्ञानेन स्वव्यवहारो जन्यत इति तन्न व्यवहारस्य व्यवहर्तव्यविषयकधीसाध्यतानियमात् । न ह्याजानन् न वान्यं जानन् अन्यद्व्यवहरति । सत्तायामपि सद्व्यवहारः सत्तावत्त्वधीजन्य एव । किं तु सा च तत्र भ्रान्ति-

---

ज्ञाता अलग है, ज्ञेय अलग है, और ज्ञान अलग है किन्तु 'आत्मा को जानता है' यहाँ उन सब नियमों को छोडना पडता है, क्योंकि अन्यथानुपपत्ति है। इसी प्रकार से अन्यथानुपपत्ति के होने से भेद रहने पर ही विषय विषयी भाव और व्यवहर्तव्य ज्ञान रह कर के ही व्यवहार होता है। इस नियम को ज्ञान स्थल में छोडना पडता है, अन्यथानुपपत्ति होने से। अतः ज्ञान स्वप्रकाश है यह सिद्ध हुआ। अब यत्तु मत का खण्डन करते हैं—'तन्नेति' ज्ञान को पर प्रकाश मानें इस पक्ष में भी अनवस्था का निराकरण कर दिया गया है। अतः अन्यथानुपपत्ति की चर्चा ही नहीं चलती है। जिस किसी ने कहा कि स्व अविषयक जो अज्ञान उसी से स्व का व्यवहार होता है, स्व ज्ञान से स्व का व्यवहार नहीं होता है। यह भी कहना ठीक नहीं है क्योंकि व्यवहार को व्यवहर्तव्य ज्ञान साध्यत्व का नियम होने से। कोई भी व्यक्ति जाने हुए बिना व्यवहार नहीं करता है। न वा अन्य वस्तु को जान कर के अन्य का व्यवहार करता है। सत्ताओ में भी जो सद् व्यवहार होता है

बाधात् । एवं तद्गुणसंविज्ञानबहुव्रीहौ भुवादयः कुटादय इत्यादौ क्रियावाचित्वादिना गुणीभूतस्यापि भुवः कुटश्च धीश्चरेति क्वापि नाज्ञाते व्यवहारः ॥

अथ सत्तासत्ताभ्यां विचारासहत्वाज्जगदेव शून्यमिति माध्यमिकः । चिद्व्यतिरिक्तमत एवैवमिति खाण्डनिकः ।

वह भी सत्तावत्व ज्ञानाधीन ही है। किन्तु सत्ता में जो सत्त्वावत्व ज्ञान है सो बाध होने के कारण भ्रमात्मक है, शुक्ति रजत के समान। एवं तद्गुण संविज्ञान बहुव्रीहि समास में भुवादिक कुटादिक स्थल में भी क्रियावाचित्व रूप से गुणी (उपसर्जन) भूवादिक का तथा कुटादिक का व्यवहार ज्ञानाधीन ही होता है। इसलिये अज्ञात में किसी जगह व्यवहार नहीं होता है किन्तु ज्ञात में ही व्यवहार होता है। इस स्थिति में अज्ञात जो ज्ञान उसका व्यवहार नहीं होगा। अतः ज्ञान स्व प्रकाश नहीं है किन्तु परतः प्रकाश है।

शंका–सत्व असत्व रूप से विचार करने पर इसकी सत्ता स्थिर नहीं होने के कारण से ज्ञान ज्ञेयात्मक जगत् शून्यरूप ही है, ऐसा शून्यता–वादी माध्यमिक कहता है। तथा ज्ञान व्यतिरिक्त प्रमेयात् असत् मिथ्या है ऐसा खांडनिक (वेदान्ती) कहते हैं। सूत्रकार (गौतम) ने कहा है इन दोनों के मत प्रदर्शन के प्रकरण में। जगत् असत् नहीं

तथा च सूत्रम् । नासन्न सन्न सदसत्सदसतोर्वैधर्म्यादिति । मैवम् । यैर्दोषैः प्रमेयजातं ग्रस्ततया विचारासहं तेदोषाः स्वकमपि ग्रसन्ति न वा । आद्ये क्व प्रमेयशून्यता तद्बीजभूतानां दोषाणामेव विलयात् । तथाप्यहमेव जयी मदुक्तदोषाणामेव प्रागल्भ्यादिति चेत् । धिङ् निस्त्रप व्याहतं ब्रुवाणोऽपि जैत्रतामिच्छसि । दूष्यदूषणसाध्यसाधनजयपराजयाः

है न वा सत् है न वा सदसत् है, सत् असत् के विरोध होने से ।

समाधान—यह प्रमेय समुदाय जिस दोष से ग्रस्त होने के कारण से विचारासह है ये दोष अपने स्वरूप को नष्ट करते हैं अथवा नहीं ? इसमें प्रथम पक्ष अर्थात् दोष अपने स्वरूप को नष्ट करते हैं, ठीक नहीं है । क्योंकि जब दोष अपने स्वरूप को भी नष्ट कर लेते हैं तब प्रमेय शून्यत्व की सिद्धि कैसे ? अर्थात् जब साधक स्वयं विलीयमान होगया तब शून्यता किस हेतु से सिद्ध होगी ?

शंका—तथापि मैं वेदान्ती ही विजयी हूँ क्योंकि मदुक्त दोष सबसे बलवान् हुआ ।

उत्तर—हे निर्लज्ज ! तुझे धिक्कार है, क्योंकि व्याहत वचन बोलता है । और फिर जय की आशा रखता है ।

पूर्व पक्ष—दूष्य तथा दोष साध्य साधन जय पराजय यह सभी वस्तु अविद्या का विलास (कार्य) है, तात्विक

सर्वेऽप्यविद्याविलसिता एवं मरुमरीचिकातोयवदिति चेत् । नूनमुमदिष्णुरसि यदेवं तत्त्वमवगच्छन्नपि निष्फले कथापथे प्रवर्तसे । न प्रवर्ते किं तु चिदात्मनि स्वप्रकाशे भरमवलम्ब्य सुखमास इति चेत् । तर्हि न त्वदुक्तदूषणानि मद्वाक्यस्पृंशि कथकानुक्तत्वादिति दूरमपसर । अन्त्ये तु दोषा एवावशिष्यन्त इति न सर्वशून्यतासिद्धिः । अथ तेषां सर्वेषां सत्त्वासत्त्वौदासीन्येन विचारं प्रवर्तयाम इति चेन्न । न हि तदाश्रयमाण

नहीं है । मरुमरीचिका में जल के समान ।

उत्तर–निश्चित आप पागल हैं जो इस प्रकार तत्व को जानते हुए भी निष्फल कथा में प्रवृत्त होते हैं । मैं कथा में प्रवृत्त नहीं होता हूँ, किन्तु स्वप्रकाश चिदात्मा में विश्वास रख कर सुख से बैठता हूँ । ऐसा कहो तब तो तुम्हारे द्वारा प्रयुक्त जो दूषण वह मेरे वाक्य को तो स्पर्श भी नहीं करता है । क्योंकि कथक से उक्त नहीं होने के कारण से । इसलिये तुम कथा से दूर हो जाओ । द्वितीय भी ठीक नहीं है, क्योंकि जब दोष ने अपने स्वरूप को नष्ट नहीं किया तब तो अन्त में चलकर दोष स्वयं अवशिष्ट रह गया है, तब सर्वशून्यता की सिद्धि कहाँ हो सकी ?

शंका–दोषादिक सभी पदार्थ की सत्ता असत्ता में उदासीन होकर विचार को चलाता हूँ, ऐसा यदि कहो तब तो उन दोषादि पदार्थों का आश्रय करने से केवल वाणी

इति सम्भवति केवलं वाङ्मनसविसंवादजन्मा प्रलापोऽयमिति। यत्तु अद्वैते प्रमाणमुपन्यसिष्यंस्तदवताराय नैयायिकप्रश्नमद्वैते किं प्रमाणमित्येवं रूपं खण्डनकृद् वर्णयामास तेन जानीमः स न्यायनयस्य किं वदन्तीमपि नाश्रौषीत्। तथाहि न्यायनये सर्वत्र प्रमितस्यैव धर्मीकरणात् अद्वैतस्य च त्वन्मतस्य त्वन्मते गगनारविन्दायमानत्वात् व्यावृत्तत्वस्य केवलान्वयित्वोपगमात्। किञ्च नायं बुभुत्सोः प्रश्नः किं तु जिगीषोः स चाचिक्षिप्सुस्तथा चाक्षेपयुक्तिं प्रत्यक्षबाधादिरूपां

मनके विसंवादमात्रसे जायमान यह निरर्थक प्रलाप होताहै।

शंका—'यत्तु इत्यादि अद्वैत में प्रमाण के उपन्यास की इच्छा रखकर नैयायिक के मत से अद्वैत में क्या प्रमाण है? इस तरह से खंडनकार ने जो वर्णन किया है उससे जान पडता है कि खंडनकार ने न्याय सिद्धान्त की किंवदन्ती को भी नहीं सुना है। न्याय का मत इस प्रकार का है। न्याय के सिद्धान्त में सभी जगह जो पदार्थ प्रमित है वही धर्मी होता है। भवन्मतसिद्ध अद्वैत आपके मत में आकाश कुसुम के तुल्य है, व्यावृत्तत्व धर्म के बलान्वयी रूप से माना गया है। और भी देखिये 'अद्वैते किं प्रमाणं, यह प्रश्न तत्व बुभुत्सु का (तत्व जानने की इच्छा वालो का) नहीं है किन्तु विजिगीषु (विजय की इच्छा रखने वाले) का है, उसका आप निराकरण करते है।

हृदि निधाय द्वैतनिषेधधिया किं करणमभिप्रैषीति प्रश्नः। तत्र च श्रुतिस्त्वदभिमतं करणं न घटते बाधादिति प्रष्टुर्भावः। तथा च त्वदुक्तं सर्वमेव प्रश्नखण्डनमलग्नकमिति ॥

अथेदानीमन्योन्याभावप्रतियोगित्वमत्यन्ताभावप्रतियोगि न वेति संशये सति विधिकोटिमद्वैतं साधयितुं खण्डनकृदेकमेवाद्वितीयम् नेह नानास्ति किञ्चनेति श्रुती तावदुदाजहार।

उस क्षेप की युक्ति को, प्रत्यक्ष बाध रूप को हृदय में रख करके द्वैत के निषेध की बुद्धि से तुमको क्या करण है ऐसा प्रश्न कर्ता का अभिप्राय है उसमें भवदभिमत श्रुति में करणत्व नहीं घटता है क्योंकि प्रत्यक्ष बाध है, ऐसा पूछने वालों का भाव है। इस स्थिति में आप से कहे गये सभी प्रश्न खण्डन प्रकार अयुक्त हैं 'अन्यत्भुक्तमन्यद्वान्तम्' के समान हैं।

शंका—अन्योन्याभावीय प्रतियोत्वि अत्यन्ताभाव का प्रतियोगी है अथवा नहीं है ? इस प्रकार का संशय होता है, यहाँ विधि का अङ्गीकार करके अद्वैत की सिद्धि करने के लिये खण्डनकार श्रीहर्ष "एकमेवाद्वितीयम्" एक अद्वैत त्रिविध भेद रहित ब्रह्म है। तथा "नेह नानास्ति किंचन" द्वैतविशिष्ट ब्रह्म में नाना कोई भी दृश्य नहीं है। इस श्रुतिद्वय को प्रमाण रूप से कथन किया है, उस श्रुति में ब्रह्म प्रकृत (प्रक्रान्त) है इस स्थल में ब्रह्म एक

तत्र च ब्रह्मेति प्रकृतम् । तेन यद्यपि ब्रह्मैकमेव द्वितीयं ब्रह्म नास्ति एवकारस्तत्राभेदं नियमयन् भेदाभेदं वारयति तथा अद्वितीयं ब्रह्मणि ब्रह्मप्रतियोगिकोऽन्योन्याभावो नास्तीत्यापाततो व्युत्पत्तिलभ्योऽर्थः प्रतीयते । तथापि नात्र श्रुतेस्तात्पर्यम् । एवं कृत्वोह्येयं गिरागिरेति ब्रूयादितिवदर्थवादत्वापत्तेः । किं तु श्रुत्यन्तरैकवाक्यत्वानुरोधादप्राप्ते शास्त्रमर्थ-

---

ही है द्वितीय ब्रह्म नहीं है । श्रुति घटक एव कार सर्वथा अभेद का प्रतिपादन करता है । अतः भेदाभेद का निराकरण होता है तथा अद्वितीय पद का ब्रह्म में ब्रह्म प्रतियोगिक अन्योन्याभाव नहीं है, एतादृश अर्थ आपाततः व्युत्पत्ति बल से लब्ध प्रतीयमान है । तथापि इस अर्थ में श्रुति का तात्पर्य नहीं है । क्योंकि "एवं कृत्वा उपह्येयं गिरागिरेति ब्रूयात्" ऐसा करके गिरा गिरा, यही बोलना चाहिये । इस वाक्य के समान प्रकृत वाक्य अर्थवाद मात्र हो जायगा । किन्तु श्रुत्यन्तर के 'सदव सौम्येदमग्रे आसीत्" (हे सौम्य श्वेतकेतु यह परिदृश्य मान जगत् उत्पत्ति के पूर्व में सद्रूपही था) के साथ एक वाक्यता के अनुरोध से तथा प्रमाणान्तर से अप्राप्त अर्थ का प्रतिपादन करने वाला शास्त्र अर्थवान् (सफल) होता है । इस न्याय से उक्त श्रुतिद्वय का अद्वैत अर्थ में ही तात्पर्य है ।

शंका—यह घट पटादिक में भेद का ग्रहण करने वाला

वदित्यतश्चाद्वैते तत्तात्पर्यम् । न च घटपटादिभेदप्रत्यक्ष-बाधादिबलान्मुख्यमर्थमपास्य मुमुक्षुणा केवलात्मभावनानिष्ठेन भवितव्यमित्यत्र श्रुतेस्तात्पर्यमिति वाच्यम् । भेदप्रत्यक्षस्य घटपटादिविषयत्वेन श्रुतेश्चापाततस्तदविषयत्वेन विषयभेदेन बाधनायोगात् । क्रत्वङ्गीभूतहिंसाया विदिताया रागप्राप्त-

---

जो प्रत्यक्ष उससे बाध होने से अद्वैत वाक्य मुख्यार्थ को छोड़कर मुमुक्षु को केवल आत्म भावना निष्ठ होकर के रहना चाहिये, इस अर्थ में तात्पर्य क्यों नहीं होगा ?

समाधान–प्रत्यक्ष घट पटादि नियत विषयक भेद का ग्रहण करता है और आपाततः सर्वविषयक अभेद का ग्रहण करने वाली है। अतः विषयभेद होने से प्रत्यक्ष में बाधकत्व तथा श्रुति में बध्वत्व नहीं होता है। यद्यपि "अग्निषोमीयपशुमालभेत" अग्निषोम निमित्तक पशु का आलम्भन करना, इस श्रुति से प्राप्त जो हिंसा है उसमें राग प्राप्त होने से "मा हिंस्यात् सर्वाभूतानि" किसी भी देश काल में प्राणी का नाश नहीं करना, इस श्रुति में बाध होता है, उसी प्रकार से अद्वैत श्रुति घट पटादि प्रत्यक्ष के साथ स्वजन्य अभेद ज्ञान का तथा घट एवं पट के साथ तथा घट पट तद्भेद के साथ तद्विषयक प्रत्यक्ष का तथा तत्तद्विषयक प्रत्यक्ष परस्पर अभेद का अवगाहन (विषय) करे। इन सब का परस्पर

हिंसानिषेधः श्रुत्यैवेति । तथा अद्वैतश्रुतिर्घटपटादिप्रत्यक्षेण सह स्वजन्याभेदज्ञानस्य तथा घटेन पटेन तद्भेदेन च सह तद्विषयकप्रत्यक्षाणामेवं तेषां प्रत्यक्षाणामन्योन्यमभेदमवगाहताम् । न हि तेषामप्यन्योन्यं भेदो घटपटभेदग्राहिणा प्रत्यक्षेण प्रागग्राहीति । तथा च न श्रौतप्रत्यक्षेण श्रौतधीर्बाध्या स्वाभेदात् श्रुत्या तदभेदालिङ्गनात् घटपटादीनां सर्वेषा-

---

भेद घटपट भेद ग्राही प्रत्यक्ष पहिले से नहीं किया है। इसलिये श्रौत प्रत्यक्ष से श्रौत ज्ञान का बाध नहीं होता है, क्योंकि स्व के साथ अभेद होने से। श्रुति सब ही के अभेद का आलम्बन विषय करती है। घट पटादि सभी पदार्थ का भेद प्रत्यक्ष विषय का अर्थ तः अभेद सिद्ध होता है। घट से अभिन्न जो ज्ञान तथा उस ज्ञान से अभिन्न जो पट है उनका परस्पर भेद नहीं हो सकता है।

शंका–तत्तत् ज्ञान का परस्पर भेद प्रत्यक्ष से ग्रहीत होगा।

उत्तर–तब उन ज्ञानों के भी परस्पर भेद का अवलम्बन श्रुति करै, ऐसा होने से मूल पर्यन्त अनुपपत्ति होने से अर्थतः अभेद सिद्ध हो जाता है।

शंका–जैसे श्रुति सर्वत्र अभेद को ग्रहण करती है उसी प्रकार से प्रत्यक्ष सर्वत्र भेद का ग्रहण करै ?

उत्तर–इसमें अनवस्था दोष हो जाता है तथा विषया-

मेव भेदप्रत्यक्षालिङ्गितानामप्यभेदोऽर्थात् सिध्यति । न हि सम्भवति घटाभिन्नज्ञानाभिन्नं पटादि परस्परं भिन्नमिति । अथ तेषामपि ज्ञानानां भेदः प्रत्यक्षेणालिङ्गनीयः । तदा तद्धियामभेदं श्रुतिरवगाहताम् तावतैव मूलपर्यन्तमनुपपत्तेरभेद आयास्यति । न च प्रत्यक्षेण तद्भेदालिङ्गनमपि अनवस्थानात् विषयान्तरसञ्चाराच्च । तथा च भेदधीर्यतो निवर्तते तदेवाश्रित्याभेदश्रुतिः प्रवृत्ता तदभेदं अर्थापत्तिसहकाराच्च मूलपर्यन्तमभेदं साधयिष्यति । तस्मात्—

सुदूरधावनश्रान्ता बाधबुद्धिपरम्परा ।
निवृत्तावद्वयाम्नायैः पार्ष्णिग्राहैर्विजीयते ॥

पार्ष्णिग्राहः पृष्ठस्थोऽरातिः । न च तुल्यन्यायतया भेद-

न्तर का संचार नहीं होता, इसलिये जिस स्थान में भेद ज्ञान निवृत्त हो जायगा उस स्थल में प्रवृत्त श्रुति अर्थापत्ति के सहकार से अभेद करती हुई मूल पर्यन्त अभेद का साधन कर देगी, तस्मात् बहुत दूर तक दौड़ने के कारण थकी हुई बाध परम्परा जहाँ निवृत्त होती है उसी स्थल में पार्ष्णिग्राह रूप अद्वैत वाक्य से जीती जाती है। पार्ष्णिग्राह का अर्थ होता है पीछे रहने वाला शत्रु ।

शंका—तुल्य न्याय से प्रत्यक्ष भी चरम बुद्धि में भेद का ग्रहण करेगा ।

उत्तर—तुल्य न्यायता सामान्य लक्षणा की तरह प्रमाण

प्रत्यक्षेण चरमबुद्धेरप्यालिङ्गनम् । न हि तुल्यन्यायता सामान्यलक्षणादिवत् प्रमाणसहकारिणी येन व्यवहितानागतानपि गमयेत् ॥

अथ सर्वाः बुद्धयः सर्वस्वविषयभिन्नाः बुद्धित्वादिति । न सर्वतद्विषयावगाहने सार्वव्यापत्तेः अलौकिकप्रत्यक्षेषु व्यभिचाराच्च तेषु स्वस्यापि विषयत्वात् । अथ सर्वं भिन्नं प्रमेयत्वादिभ्य इति तदानुपसंहारस्वरूपासिध्यादयः । न हि

को सहकारिणी नहीं है जिससे कि व्यवहित पदार्थ का भी बोध न करे ।

शंका—सभी बुद्धि स्व स्व विषय से भिन्न-भिन्न है, बुद्धि होने से । इस अनुमान के द्वारा विषय विषयी में भेद सिद्ध होगा ।

उत्तर—यदि प्रत्यक्ष से सर्व विषय का ज्ञान हो जाय तब तो सबको सर्वज्ञ हो जाना चाहिये । और अलौकिक प्रत्यक्ष में व्यभिचार दोष भी होता है, क्योंकि अलौकिक, प्रत्यक्ष में स्व भी विषय होता है ।

प्रश्न—सभी विषय विषयी भिन्न है, प्रमेय होने से । इस अनुमान के द्वारा सर्व भेद की सिद्धि होगी ।

उत्तर—इस अनुमान में अनुपसंहारी तथा स्वरूपासिद्धि दोष होता है । सभी को पक्ष बनाने से पक्ष व्यतिरिक्त में हेतु साध्य का उपसंहरणस्थल नहीं है । तथा सभी पक्ष में

सर्वेषां पक्षीकृतानां स्वरूपं हेतुमत्तां वा किञ्चज्ज्ञो वेद । अथ काचिदेव बुद्धिः पक्षः तद्धर्म एव च हेतुः तदा बुद्ध्यन्तरं द्वारीकृत्याद्वैतश्रुतिः प्रवेक्ष्यति । तथा च ।

हेत्वाद्यभावसार्वज्ञ्ये सर्वं पक्षयताऽऽस्थिते ।
किञ्चिच्च त्यजता दत्ता सैव द्वारद्वयश्रुतेः ॥
आस्थिते अङ्गीकृते । अथ घटपटौ भिन्नावित्यादिरूपया

हेतुमत्त्वज्ञान किस असर्वज्ञ को होगा ? इसलिये उपसंहर-स्थलाभाव होने से अनुपसंहारी अनैकान्तिक दोष हो जाता है, तथा पक्ष में हेतु का नहीं रहना यह जो स्वरूपासिद्धि है सो भी होती है । इसलिये यह अनुमान ठीक नहीं है ।

प्रश्न–सभी बुद्धि पक्ष नहीं है, किन्तु यत्किंचित् बुद्धि को ही पक्ष बनाता हूँ । इसलिये अनुपसंहारी अनैकान्तिक दोष नहीं होगा, तथा यत्किंचित् पक्ष में रहने वाले प्रमेयत्व को ही हेतु बनाता हूँ, इसलिये स्वरूपासिद्धि दोष भी नहीं होगा ।

उत्तर–तब तो पक्ष से भिन्न दूसरी बुद्धि को द्वार बनाकर के अद्वैत श्रुति का प्रवेश होगा, तब मूल पर्यन्त अद्वैत सिद्ध हो जाता है । "हेत्वाद्येत्यादि" ऐसा कहा है कि यदि सभी बुद्धि को पक्ष रूपेण स्वीकार करो तो हेत्वभाव तथा सार्वज्ञ रूप होता है । यदि कदाचित् किसी को छोड़ते हो अर्थात् यत्किंचित् बुद्धि को पक्ष बनाते हो

प्राथमिकधिया योऽनयोर्भेदो गृहीतः स एव बुद्धितद्बुद्धिधाराया अभेदे सति न निर्वहेत । न हि सम्भवति वस्त्वनेकम् तदभिन्नं तु तज्ज्ञानमेकमिति । तस्मादर्थभेदान्यथानुपपत्त्यैव धीधारायामपि भेद इति न तदभेदं श्रुतिराह बलवदर्थापत्तिविरोधादित्याशंक्य साप्यर्थापत्तिर्ज्ञाता भविष्यतीति तस्यास्तज्ज्ञानस्य चाभेदे श्रुतिः प्रवर्तिष्यत इति धीवेद्यभेदस्यान्यथानुपपत्तेस्तज्ज्ञानस्य चाभेदे श्रुतिः प्रवर्त्स्यतीत्यर्थः ।

तब तो वही दरवाजा अद्वैत श्रुति को प्रवेश करने को मिल जाता है । आस्थित शब्द का अर्थ होता है अङ्गीकार (स्वीकार) घट पट भिन्न है इत्याकारक जो प्राथमिक प्रत्यक्ष बुद्धि है उसके द्वारा गृहीत जो घट पट का भेद सो बुद्धि तथा बुद्धि धारा का अभेद मानने पर युक्त नहीं होगा । क्योंकि वस्तु अनेक हैं और वस्तु से अभिन्न जो ज्ञान सो एक है, यह कैसे बन सकेगा ? इसलिये अर्थ भेद अन्यथा अनुपपन्न है । इस अन्यथानुपपत्ति से ही बुद्धि धारा में भी भेद सिद्ध होगा । इसलिये अभेद श्रुति धीधारा का अभेद नहीं कहती है, बलवत्ती अर्थापत्ति के विरोध होने से । ऐसी शंका करके उत्तर करते हैं कि यह अर्थापत्ति भी तो स्व ज्ञान की अपेक्षा करती है, अर्थापत्ति तथा उसके ज्ञान का अभेद करने के लिये अभेद श्रुति प्रवृत्त होगी । ततः ज्ञान वेद्य जो

अस्तु वा भेदप्रत्यक्षविषय एव घटादावभेदश्रुतिप्रवृत्तिः। योग्यताज्ञानं न शाब्दधीहेतुरङ्गुल्यग्रे करिशतं विहरतीत्यादौ व्यभिचारात्। अस्तु वा तदपि। श्रौतधीश्चेयं प्रमैव श्रुतेरन्यत्रालब्धावकाशायाः प्रमाणत्वात्तद्विरोधेन भेदप्रत्यक्षस्यैवाप्रमाणत्वात्। अथ योग्यताया असंसर्गाग्रहादियमसंसर्गाग्रहरूपा। तथाप्यस्या असदसं-

---

भेद उसके तथा तज्ज्ञान के साथ अभेद करने में श्रुति अवश्यमेव प्रवृत्त होगी। अथवा भेद प्रत्यक्ष का विषय जो घटादिक पदार्थ है उसके अभेद करने में भी श्रुति प्रवृत्त होती है। इसमें अयोग्यता ज्ञान प्रतिबन्धक होगा ऐसा नहीं कहना, क्योंकि योग्यता ज्ञान को शाब्दबोध कारणता मानने में 'अंगुली के अग्र भाग में सौ हाथी विहार करते है, इस वाक्य में व्यभिचार होता है। अर्थात् उक्त वाक्य में योग्यता ज्ञान नहीं है और शब्दाबोध सर्वानुभव सिद्ध है। अथवा मान लिया जाय कि योग्यता ज्ञान शाब्दज्ञान में कारण है, तथापि श्रौत ज्ञान प्रमा रूप ही है, क्योंकि श्रुति के अन्यत्र चरितार्थ नहीं होने से वह प्रमाण रूप है। श्रुति विरोध होंने से भेद प्रत्यक्ष को ही अप्रमाण रूप होता है। यद्यपि योग्यता असंसर्गका अग्रह रूपा होने से यह भी असंसर्गाग्रह रूपा है। तथापि इसको असंसर्गाग्रह रूप होने से संसर्ग ज्ञान की सिद्धि होती है।

पक्षधर्मता, उनमें जो समानता है सो वैज्ञानिक है । अर्थात् परस्पर निरूप्य निरूपक भावापन्न विषयता रूप ही है न तु वास्तविक है । अथवा व्याप्ति पक्षधर्मतावत्वेन ज्ञायमान होकर के अनुमिति जनकत्व रूप से अभिमत है । इस प्रकार वर्णन करने से यद्यपि अनेक दोषों का निरास हो जाता है तथापि सत्प्रतिपक्षित हेतु द्वय में अबोधकत्व प्रयुक्त अनेक खण्डन अवशिष्ट रह जाते है । इस स्थिति में मैं कहता हूँ तत्रब्रूम इत्यादि, मिथः अर्थात् परस्पर विरोधी व्याप्ति विशिष्टत्वेन ज्ञायमान् हेतु द्वय को एक धर्मी एक अधिकरण में प्रति सन्धीयमान दो हेतु को, स्व व्यापक जो साध्य तद्विषयक अनुमिति की उत्पत्ति नहीं हो सकती है, अर्थात् विरुद्ध तया ज्ञायमान हेतु द्वय से एक अधिकरण में स्व स्व साध्य विषयक अनुमिति कथमपि नहीं होगी, अन्यथा परस्पर वरोधिता के प्रतिसन्धान काल में भी यदि एक अधिकरण में तादृश हेतु द्वय को अनुमिति जनकत्वाभाव नहो मानें तब तो विरुद्ध हेतु के सत्ताकाल में एक अधिकरण में तत्तत् हेतु का व्यापक साध्य द्वय का व्यवहार होना चाहिये ?

योरपि व्यवहारः स्याद्विनिगमनाविरहात् द्वयोरपि याथार्थ्ये वस्तुनो विरूद्धद्वैरूप्यं च स्यात् तस्माद्व्याप्तिपक्षधर्मताधीसद्भावेप्यनुमितिरसम्भवन्ती कमपि स्वप्रतिबन्धकमाक्षिपति तच्च प्रतिबन्धकं न तावदुभयलिङ्गव्याप्तिपक्षधर्मतावगाहितृतीयलिङ्गपरामर्शविषयीभूतव्याप्तिपक्षधर्मतासंशयः विरोधिसन्धान-

---

और विनिगमता विरह से यदि दोनों को यथार्थ मानें तब तो एक ही अधिकरण में विरूद्ध द्वैतरूप्यवत्व हो जायगा। तस्मात् व्याप्ति पक्ष धर्मता ज्ञान के सद्भाव में भी न होती हुई अनुमिति किसी प्रति बन्धक का आक्षेप करती है। वह प्रतिबन्धक तो उभय लिंग हेतु की व्याप्ति पक्ष धर्मता का अवगाहन करने वाला जो तृतीय लिंग परामर्श, उस परामर्श का विषय जो व्याप्ति पक्षवत्ता, उसका जो सन्देह है सो प्रतिबन्धक नहीं हो सकता है, क्योंकि विरोधो के अनुसंधान के बिना तादृश संशय ही नहीं हो सकता है। तस्मात् प्रथमोपस्थितिक होने से अन्तरग होने से तथा उपजीव्य होने से परस्पर विरोधी व्याप्यत्वेन अवगम्य मान जो धर्म द्वय अर्थात् हेतुद्वय उन दोनो का एक धर्मी अधिकरण में जो प्रति सन्धोय मानत्व है वही विरुद्ध कोटि द्वयावगाही ज्ञान जन्य होने से प्रति बन्धक है जिससे कि एक धर्मी में तादृशानुमिति का उत्पादन नहीं होता है। एवं च सति, ऐसा जब हुआ तब तुल्य बल वाले हेतु से बोधित है साध्य का अभाव जिसका उसको, सत्प्रतिपक्ष कहते है, ऐसी

मन्तरेण तस्यैवानुदयात् तस्मात्प्राथम्यादन्तरङ्गत्वादुपजीव्यत्वाच्च मिथः प्रत्यनीकत्याप्यतयावगम्यमानयोः धर्मयोरेकत्र धर्मिणि प्रतिसन्धीयमानत्वमेव विरोधिकोटिग्रहणजन्यतया प्रतिबन्धकं एवं च सति तुल्यबलबोधितसाध्यविपर्ययत्वं सत्प्रतिपक्षत्वमिति यदाशङ्काथ दूषितं तदयुक्तं न हि तत्रैकमपि साधनं स्वसाध्यं बोधयत्यपरेण प्रतिबन्धादिति न चाविनिगमादुभयोः

आशंका करके लक्षण को दूषित किया है, सो अयुक्त है। उस सत्प्रतिपक्ष स्थल में कोई भी एक साधन अपने साध्य का अनुमापक नहीं हो सकता है, इतर हेतु से प्रतिबन्ध होने के कारण से। नहीं कहो कि विनिगमक के अभाव होने से उभयसाध्यको एकानुमिति उत्पन्नता होती है वह अनुमिति परस्पर विरुद्धार्थावगाहिनी होने से संशयाकारा होगी। अर्थात् 'पर्वतो वह्निमान्न वा" पर्वत वह्निमान् है अथवा वह्न्यभाववान् है ? इत्याकारिका रत्नकोशकारमताभिप्रायिका होगी ? और संशायक होने से हेत्वाभास होगा। ऐसा कहना ठीक नहीं है, क्योंकि तब तो मिलित हेतु द्वय संशय का जनक होगा और प्रत्येक हेतु अर्थात् उन दोनों के बीच से एक एक हेतु हेत्वाभास होगा। ऐसा हुआ तब तो जो संशय का जनक हुआ सो हेत्वाभास नहीं हुआ, तथा जो हेत्वाभास हुआ सो संशय जनक नहीं हुआ। यह तो महान अनर्थ हो गया।

साध्ययोरेकैवानुमितिरुदेति सा च परस्परविरुद्धार्थवगाहित्वे-नार्थात्संशयाकारेति संशायकत्वेनास्याभासत्वमिति वाच्य तर्हि द्वयं मिलितं संशायकं प्रत्येकं च हेत्वाभास इति यो हेत्वाभासः स न संशाययति यस्तु संशायति स न हेत्वाभासः इति महद्वैशसं अथ द्वयोर्मिथो विरुद्धव्याप्ययोरेकत्रदर्शनाज्जिज्ञा-सोदेति अनयोः साध्ययोरनयोश्च हेत्वोः कि तत्त्वमिति तेनेदृशजिज्ञासाजनकत्वमेव सत्प्रतिपक्षितत्वमिति तन्न । जिज्ञासाजननेप्येकस्मिन्धर्मिणिविरोधिसाधनद्वयप्रतिसन्धानमेव

प्रश्न–विरुद्ध व्याप्ति द्वय वाले जो हेतु द्वय उन दोनों का एक अधिकरण में समावेश देखकर अर्थात् वह्निसाधक धूम तथा वह्न्याभाव साधक पाषाणमयत्व को एक पर्वत रूप अधिकरण में देखकर तादृश दृष्टा पुरुष के मन में जिज्ञासा होती है कि इन दोनों साध्य में तथा इन दोनों हेतु में से कौन सत् है और कौन असत् है ? इसलिते यथोक्त जिज्ञासा का उत्पादकत्व ही सत्प्रतिपक्षत्व है। एतदतिरिक्त हेतु स्थल में एतादृश जिज्ञासा नहीं होती है।

उत्तर–यह कहना ठीक नहीं है। क्योंकि एतादृश जिज्ञासा के उदय में तो एक अधिकरण में विरोधी साधन द्वय का जो प्रतिसन्धान अर्थात् ज्ञान वही तंत्र अर्थात् विवक्षित है, जनक रूप से। तब तो प्रथमोपस्थितिक होने से तथा आवश्यक होने से उसी को अर्थात् एक अधिकरण

तन्त्रमिति प्राथम्यादावश्यकत्वाच्च तदेव दोषः तेन गमकतौपयिकव्याप्तिपक्षधर्मताधीविषयेण यत्साध्यधीप्रतिबन्धनं तदेव सत्प्रतिपक्षितलक्षणं नन्वेवं कार्यं प्रतिबन्धन्प्रतिहेतुः सत्प्रतिपक्षयिता तेन च प्रतिरुद्धकार्यः सत्प्रतिपक्षित इति त्वद्वाक्यार्थः तथा च सत्प्रतिपक्षितत्वस्य ज्ञातस्य दोषतया तज्ज्ञाने सति कार्यप्रतिबन्धः कार्यप्रतिबन्धे च सति तद्घटितसत्प्रतिपक्षत्वसिद्धौ तज्ज्ञानमित्यन्योन्याश्रयः स्यात् न स्यात् कार्यप्रतिबन्धो

में विरोधी हेतु द्वय के सनुसन्धान को ही दोष मानिये। इसलिये अनुमिति जनकता में कारणी भूत जो व्याप्ति पक्ष धर्मता विषयक ज्ञान, उस ज्ञान से अनुमिति का जो प्रतिबन्ध होना, यही सत्प्रतिपक्ष का लक्षण उचित है।

प्रश्न—इस प्रकार से कार्य का प्रतिबन्धक होता हुआ प्रति हेतु द्वितीय हेतु को सत्प्रतिपक्षित बनाता है, उस द्वितीय हेतु से प्रतिरुद्ध है कार्य जिसका ऐसा जो हेतु सो सत्प्रतिपक्षित है, ऐसा आपके वाक्य का अर्थ होता है। ऐसा हुआ तब ज्ञान जो सत्प्रतिपक्षितत्व उसका दोष रूप से ज्ञान होने पर कार्य का प्रतिबन्ध होगा। और जब कार्य का प्रतिबन्ध हो जायगा तब तद्घटित सत्प्रतिपक्षितत्व सिद्ध होने पर उसका ज्ञान होगा। तो इस प्रकार से अन्योन्याश्रय दोष हो जाता है।

उत्तर—नही होगा। क्योंकि कार्य अनुमिति का जो

हि सत्प्रतिपक्षस्य फलं सत्प्रतिपक्षस्तु विरुद्धानुमितिहेतुभूतव्याप्तिपक्षधर्मतोपपन्नलिङ्गोपस्थितिः सा चावश्यं विपरीतानुमितिं प्रतिबध्नातीहि द्वयोरप्यनुमित्योः प्रतिबन्धः बाधस्तु नैवम्। ननु बाधे बलवता प्रमाणेन प्रकृतानुमितेः प्रतिबन्ध

प्रतिबन्ध है सो तो सत्प्रतिपक्ष का फल है और सत्प्रतिपक्ष तो परस्पर विरुद्ध जो अनुमिति द्वय, उसमें कारणीभूत जो व्याप्ति पक्षधर्मता विशिष्ट लिंग, उसकी जो उपस्थिति अर्थात् ज्ञान, उसी का नाम है सत्प्रतिपक्ष। यह जो एतादृश लिंगोपस्थिति है सो अवश्यमेव विपरीतानुमिति का प्रतिबन्ध करने वाली है, इसलिये सत्प्रतिपक्ष स्थल में दोनों ही अनुमिति का परस्पर हेतु से प्रतिबन्ध हो जाता है। और बाध दोष तो ऐसा नहीं है, वह तो तद्वत्ता बुद्धि के तदभाव निश्चय ज्ञापन द्वारा प्रति बन्धक है।

प्रश्न—बाधस्थल में तो बलवान् प्रमाण से प्रकृत अनुमिति का प्रतिबन्ध होता है, और यहां सत्प्रतिपक्षस्थल में तो समान बलवान हेत्वन्तर से प्रकृतानुमिति का प्रतिबन्ध होता है, इसलिये बाध से इस सत्प्रतिपक्ष का भेद होगा। ऐसा कहा है। विरोधी जो बोधक उससे भिन्न साधकता में कारणीभूत जो रूप, तदात्मक सम्पत्तिमत्वेन ज्ञायमान जो प्रतिहेतु, उससे प्रतिरुद्ध है कार्य (अनुमित्यात्मक) जिसका, ऐसा जो लिंग हेतु, तादृश लिंगत्व ही सत्प्रतिपक्ष है। यहां

इह तु समानबलेनेति ततोऽस्य भेदः स्यात् तदुक्तं विरोधिबोधकान्यगमकतौपयिकरूपसम्पत्तिमत्तया ज्ञायमानेन प्रतिरुद्धकार्यलिङ्गत्वं अत्र चोपजीव्येनानुमानेन बाधेऽतिव्याप्तिवारणाय विरोधि बोधकान्येति गमकतौपायिकरूपसम्पत्तिमत्ताया विशेषणं। हन्तैवं बाधे बलवता प्रतिबन्धः सत्प्रतिपक्षे तु समानबलेनेति प्रतिबन्धाविशेषादुभयोरैक्यं स्यात् इति चेन् मैवम्। एवं हि पञ्चानामप्यैक्यं स्यात् अनुमितिप्रतिबन्धलक्षण फलावि-

---

उपजीव्य अनुमान से बाध में अतिव्याप्ति वारण करने के लिये विरोधि बोधकान्यत्व गमक तौपयोगिक रूप सम्पत्तिमत्ता का विशेषण दिया गया है। ऐसा होने पर बाध में बलवत्प्रमाणान्तर से प्रकृतानुमिति का प्रतिबन्ध होता हैं। और सत्प्रतिपक्ष में तो समान बलवान प्रतिहेतु से अनुमिति का प्रतिबन्ध होता है। तब प्रतिबन्ध तो दोनों जगह अर्थात् बाध सत्प्रति उभय में समान ही है तब तो दोनों दोष एक हो जोने चाहिये।

उत्तर–यदि यत्किंचित् समानता को लेकर के एकत्वापादन करें तब तो पाँचो हेत्वाभास को भी एकत्व हो जाना चाहिये। अनुमिति प्रतिबन्ध लक्षण फल तो सब में समान ही है। अर्थात् जो भी कोई हेतु हो वह यदि दुष्ट हो जाय तो वहां अनुमिति नहीं होती है। तब अनुमिति बन्धकत्व सर्वत्र एक रूप से होने से सभी हेत्वाभास को एक ही हो जाना चाहिये।

शेषात् । किं नश्छिन्नमिति चेत् नहि फलैक्ये हेत्वैक्यं सम्भवति फलस्य ततो भेदात् किन्तु शरीरैक्ये तच्च न पञ्चानां न वाऽनयोरपीति । ननु समानत्वाभिमता विरुद्धव्याप्तिपक्षधर्मतोपपन्नलिंगोपस्थितिः सत्प्रतिपक्षः तत्कवलितः सत्प्रतिपक्षित इति त्वन्मतं तथा च सत्प्रतिपक्षस्य हेतुदोषस्य हेत्वाभासान्तरज्ञानावश्यकत्वे उपस्थितेरपि ज्ञानं वाच्य तथा य समानबलत्वेन

प्रश्न–तो इसमें मेरा क्या बिगडता है ? भले एक ही हेत्वाभास रहै ।

उत्तर–फल की एकता होने से हेतु की एकता संभवित नहीं होतो है फल के हेतुसे भिन्न होने के कारण से । किन्तु शरीर की एकता होने से हेतु में एकता होती है । शरीर का एकत्व पांचों हेत्वाभासों को नहीं है, न वा बाध सत्प्रतिपक्ष की शरीर की एकता है ।

प्रश्न–समान बलवत्व रूप से अभिमत जो विरुद्ध व्याप्ति पक्ष धर्मता से विशिष्ट लिंग, तदुपस्थित उसी, नाम है सत्प्रतिपक्ष । तत्कवलित तद्घटित अर्थात् सत्प्रतिपक्ष दोष युक्त जो हेतु सो सत्प्रतिपक्षित होता है, ऐसा आपका मत है । तब हेतु का दोष जो सत्प्रतिपक्ष उसमें हेत्वाभासान्तर ज्ञान के आवश्यक होने से उपस्थिति का ज्ञान भी कहना चाहिये । तब समान बलवत्व रूप से ज्ञाय मान का ज्ञान भी होना चाहिये, परन्तु यह युक्त नहीं है, क्योंकि समान-

ज्ञायमानस्य ज्ञानमपीह वाच्यं तच्चायुक्तं समानबलोपस्थितिरेव प्रतिबन्धिका न तु तद्धीरपि तत्सत्त्वे तद्विलम्बेन प्रतिबन्धविलम्बादर्शनादिति चेत् । अत्राहुः येन ज्ञानेन हेत्वाभासशरीरं निर्मीयते तस्य ज्ञानमवश्यं वाच्यं यथा व्यभिचारे निश्चितसाध्याभाववद्गामित्वलक्षणे निश्चयस्यापि ज्ञानं बाढं सत्प्रतिपक्षस्थलेऽप्युपस्थितेर्ज्ञानमवश्यमेवैष्टव्यमिति हेत्वाभासानां ज्ञाननियम इत्यप्याहुः ।

ननु बाधो दोषो न तु बाधकं बाधश्च साध्याभावप्रमेति

बलोपस्थिति ही तो अनुमिति में प्रति बन्धक है । न तु उपस्थिति का ज्ञान भी प्रतिबन्धक है । उपस्थिति के रहने पर उपस्थित विषयक ज्ञान के विलम्ब से प्रतिबन्ध में विलम्ब देखने में नहीं आता है ।

उत्तर–अत्राहुः जिस ज्ञान के द्वारा हेत्वाभास का शरीर निर्मित होता है । उसका ज्ञान होना आवश्यक है, जैसे निश्चित साध्याभावाधिकरण वृत्तित्व लक्षण व्यभिचार में निश्चय का ज्ञान आवश्यक होता है उसी प्रकार से सत्प्रतिपक्ष स्थल में भी उपस्थिति का ज्ञान आवश्यक है, हेत्वाभास ज्ञान के आवश्यकहोने से ।

प्रश्न–बाध है दोष, न कि बाधक दोष है । बाध नाम है साध्याभाव प्रकारक जो प्रमा जैसे वह्न्याभाववत् ह्रद विषयक निश्चय । इसलिये फल है दोष, न कि करण

फलं दोषो न तु करणं तथा सत्प्रतिपक्षे विरुद्धं करणं बाधे तु विरुद्धं फलं दोषः अत । एव साध्याभावप्रमायाः प्रामाण्य-ग्रहः प्रतिबन्धक इति तवैव सिद्धान्तोद्गार इति चेत् । अत्र केचित् बाधे प्राथम्यात्करणस्यैव दोषत्वं वस्तुतस्तु करणमपि स्वफलीभविष्यद्विरुद्धावगतिं विना न दूषयितुमलमिति तस्य तदुपधानमवश्यं वाच्यं तथा च चरमोत्पन्नापि साध्याभावधी-र्बाधकस्य दूषकत्वे प्रथमोपस्थिता चोपजीव्या चेति विवक्षित-

---

दोष है। तथा सत्प्रतिपक्ष में विरुद्ध जो करण सो दोष होता है, और बाध में विरुद्ध जो फल सो भी दोष है। अत एव साध्याभाव प्रकारक जो प्रमा तद्गत जो प्रामाण्य का ज्ञान उसी को प्रतिबन्धकत्व होता है, ऐसा आपका ही सिद्धान्त है।

उत्तर–यहाँ कोई कहते हैं--बाध में प्रथमोपस्थितिक होने से करण ही दोष है। वस्तु तस्तु स्वफल के लिये करण होता हुआ करण भी विरुद्ध हेतु विषयक ज्ञान के बिना अनुमिति को दूषित करने में समर्थ नहीं हो सकता है। इसलिये फल जनकत्व करण को कहना आवश्यक है। ऐसा हुआ तब चरम में उत्पन्न हाने वाली भी साध्याभाव प्रकारक प्रमा बाधक की दूषक होने में प्रथमोपस्थित है तथा उपजीव्य है। इसलिये विवक्षित विवेक से साध्याभाव प्रमा ही बाध दोष है। इसी प्रकार से सत्प्रतिपक्ष में

विवेकेन सैव बाधो दोषः तथा च सत्प्रतिपक्षे विपरीतं करणं प्रतिबन्धकं तत्र फलोदयस्यासम्भवात् बाधे तु विपरीतं फलमेव प्रतिबन्धकमिति क्वानयोः सङ्करसम्भावनापि एवं व्यवस्थापिते एतत्प्रणालीमजानानं प्रति विरोधिबोधकान्येत्युपलक्षणविधयोक्तमिति सर्वं सुस्थम् । यत्तु द्वे अप्यनुमाने सत्प्रतिपक्षिते सती जाती इति गुरुमतमवेत्य स्वव्याघातकत्वं त्वन्मते न सदुत्तरे सत्प्रतिपक्षेऽतिव्याप्तं तथाहि स्थापनाहे-

---

विपरीत जो करण है वही प्रतिबन्धक है और दोष है। क्योंकि सत्प्रतिपक्ष में अनुमिति रूप फल की उत्पत्ति नहीं होती है। बाधस्थल में तो विपरीत जो फल है वही प्रतिबन्धक होता है। इस स्थिति में बाध प्रतिपक्ष में सांकर्य की सम्भावना भी नही होती है। इसलिये यथोक्त रूप से व्यवस्था होने से इस प्रणाली को न जानने वाले व्यक्ति के प्रति विरोधि बोधकान्य पद का उपलक्षण रूप से लक्षण में कथन किया गया है। जिस किसी ने कहा है कि दोनों अनुमान जब सत्प्रतिपक्षित होते हैं तब जाति रूप हो जाते हैं. इस प्रकार से गुरु मत को जान (प्राप्त) करके स्व व्याघातकत्व जाति है। आपके मत से सदुत्तर नहीं है, तो यह जातिलक्षण सत्प्रतिपक्ष में अतिव्याप्त होता है, अर्थात् सत्प्रतिपक्ष में स्व व्याघातकत्व वा असदुत्तरत्व रूप जातित्व हो जाता है। तथाहि स्थापना

तुरसाधकः समबलप्रतिपक्षप्रतिहतत्वादितिवत् सत्प्रतिपक्षत्वं अनेनैव हेतुना त्वस्याप्यसाधकत्वं साधयितुं क्षममुभयोरपि सत्प्रतिपक्षत्वाविशेषादिति खण्डनं। तन्न। अबोधात् जातौ हि साधर्म्यमात्रं बलं तच्च स्थापनाजात्योः समानमेवेति जाति-वाद्याशयः। समीकरणाभिसन्धिनैव जात्युत्थानात् स्वप्रयोगस्य बलवत्त्वाभिमाने च समीकरणाभिसन्धिना तदुत्थानमेव न स्यात् तथा च जातिवत्स्थापनापि स्वसाध्यं साधयेत्

हेतु असाधक है समान बल वाला है प्रतिपक्ष से प्रतिहत होने से इसके समान सत्प्रतिपक्षत्वभी इसी हेतु से (समबल प्रतिपक्ष हतत्व हेतु से) स्व में भी असाध-कत्व के साधन करने में समथ होगा। क्योंकि दोनों में सत्प्रतिपक्षत्व समान रूप होने से, ऐसा खण्डनग्रन्थ है।

उत्तर–त न, सो ठीक नहीं है। अबोधात्, आपको यथार्थ ज्ञान नहीं है, तथाहि जाति दोष में साधर्म्य मात्र बल रहता है, एतादृश बलस्थापनानुमान में तथा जाति में समान ही है, ऐसा जाति वादी का आशय है, समानता के अभिप्राय से ही जाति दोष का उत्थान किया गया है। यदि स्व प्रयोग में बलवत्व का अभिमान रहै तब तो समानता के अभिप्राय से स्व प्रयोग का उत्थान ही नहीं होगा। तब तो जाति दोष के समान स्थापनानुमान भी स्व साध्य का साधन करेगा और जाति साध्य के विपरीत साधर्म्यान्तर

तथा साधर्म्यान्तरमपि जातिसाध्यविपरीतं साधयेत् साधर्म्यत्वेन तस्यापि स्थापनाजात्युभयतुल्यत्वात् तस्माद्यथा जातिवादी समबलयानुमानप्रतिहतत्वेन स्थापनाया असाधकतां मन्यते स्थापयति च तथा तत एवाविशेषात् स्वानुमानस्यापि तथा मन्येत साधयेच्चेति भवति जातेः स्वव्याघातकत्वं सत्प्रतिपक्षे तु नैवं न हि तत्रोच्चारयिता स्थापको वा द्वयोः समबलत्वं मन्यते किन्तु स्वानुमानस्य बलवत्त्वमपरस्य तु विशेषा-

---

का भी साधन करेगा, क्योंकि साधर्म्यत्व रूप से साधर्म्यान्तर भी स्थापमान तथा जाति उभय के तुल्य है। तस्मात् जिस तरह जातिवादी समबलानुमानप्रतिहतत्व हेतु से स्थापनानुमान को असाधक मानता है तथा स्वयं तादृश रूप से स्थापना भी करता है। तथा उसी तरह से तादृश समानता को लेकर के स्वकीय अनुमान को भी मानता है तथा साधन भी करता है। इसलिये जाति दोष को स्व व्याघातकत्व होता है। सत्प्रतिपक्ष में तो ऐसा नहीं है क्योंकि उच्चारयिता अथवा स्थापक दोनो अनुमान में समबलत्व नहीं मानते हैं किन्तु स्वकीय अनुमान में मानते हैं। दूसरे को अनुमान में विशेषादर्शन दशा में आभिमानिक बल के भ्रम मात्र को जानता है। ऐसा होने के बाद परकीयानुमान में स्यकीय बलवत् हेतु से प्रतिबद्ध होने के कारण से असाधकता को सिद्ध

दर्शनदशायां बलभ्रममात्रमिति हि तस्याभिमानात् तथा च परानुमानस्यासाधकतामयं बलवत्प्रतिबन्धत्वेन साधयति न तु स्वानुमानस्य तथा साधयितुं क्षमते तेन परानुमानस्य बलवत्त्वानङ्गीकारेण स्वानुमानस्य बलवत्प्रतिबन्धत्वानभ्युपगमात् किन्तु बलवत्त्वाभिमतमपरानुमानं प्रतिबन्धकं मन्यते तेन च रूपेण न परस्यासाधकतां साधयति मदनुमानं बलवत्त्वेनावगतं किन्तु बलवन्न भवतीति तेनानगींकारात् तथा च बलवत्प्रतिबन्धत्वेन परस्यासाधकतां साधयति न तु स्वस्यापि तेन रूपेणेति न सत्प्रतिपक्षः स्वव्याघातक इति । ननु सत्प्रतिपक्षत्वेनासाधकता-

---

करते है। न कि स्वानुमान में असाधकता का साधन करने में समर्थ होता। परानुमान को बलवान् तथा स्वकीयानुमान में बलवान् हेतु से प्रति बद्ध को नहीं मानता है। किन्तु बलवत्वेन अभिमत अपर अनुमान को प्रतिबन्धक मानता हैं। तादृश रूप से परानुमान में असाधकता को सिद्ध नही करता हैं। मदीयानुमान बलवत्वेन उसको अवगत है किन्तु बलवान् नहीं है ऐसा स्वीकार नही किया। ऐसा होने से बलावान् हेतु से प्रतिबद्ध होने के कारण परकीयानुमान में असाधकता को सिद्ध करता है, नतु स्वानुमान में तेन रूपेण असाधकता को सिद्ध करता है। इसलिये सत्प्रतिपक्ष दोष स्वव्याघातक नहीं होता है।

साधनन्तस्यैव हेतुदोषत्वात्तच्च द्वयोः समानमेवेति चेत् । सत्यम् । एकेन हयपरानुमानस्यासाधकता साध्यते सा च बलवत्प्रतिबन्धत्वलक्षणेन सत्प्रतिपक्षत्वेन न तु स्वस्यापि तथा साधयितुं शक्नोति बलवत्प्रतिबन्धत्वलक्षणस्य हेतोः स्वयमेवानभ्युपगमात्। ननु तथापि स्थेयादिः सत्प्रतिपक्षितत्वेन द्वयोरप्यसाधकतां साधयितुं शक्नोत्येवेति भवत्येव सत्प्रतिपक्षत्वं व्याघातकमिति चेत् । सत्यम् । तथापि सत्प्रतिपक्षयिता यद्बलवत्प्रतिबन्धत्वमाद्रियते तन्नोभयसाधारणत्वेन मन्यत इति

प्रश्न–सत्प्रतिपक्षत्वेन जो असाधकता का साधन है, उसी को हेतु दोषत्व है। यह जो हेतु दोषत्व है सो तो दोनों हेतु में समान ही है।

उत्तर–सत्यं, ठीक है एक हेतु से अपरानुमान में असाधकत्व का साधन किया जाता है। वह जो असाधकता है सो बलवत् प्रतिबन्धकत्व लक्षण जो सत्प्रतिपक्षत्व उसके द्वारा होती है। स्वकीय हेतू में एतादृश असाधकता की सिद्धि नहीं की जा सकती, बलवत्प्रतिबन्धकत्व स्व हेतु में स्वीकार नहीं किया है।

प्रश्न–मध्यस्थ व्यक्ति (स्थेयादि) दोनों हेतु में सत्प्रतिपक्षितत्व रूप से असाधकता का साधन कर सकता है। इसलिये सत्प्रतिपक्षत्व भी व्याघातक है।

उत्तर–सत्प्रतिपक्ष दोष देने वाला जो बलवत् प्रति-

स्वाशयानुसारेण सदुत्तरयन्न तेन व्याहन्यते जातिवादी तु तथेतिविशेषः अत एव सत्प्रतिपक्षः सदुत्तरं जातिरसदुत्तरमिति सर्वतन्त्रसिद्धान्तः। एतद्विरुद्धार्थाभिप्रायो तु गुरुरपि लघुरेवेति एवमपि रत्नप्रकाशतदुबोधावपि नेयाविति संक्षेपः। निरालम्बनाद्यनुमानमपि व्याप्त्यादिपुरस्कारप्रयुक्तं सदुत्तरमेव तदपुरस्कारप्रयुक्तं तु जातिरिति विवेकः।

अथ बाधो निरूप्यते

तत्र तावत्साध्याभावप्रमा बाधः प्रमिताभावप्रतियोगि-

बन्धकता का आदर करता है सो उभय साधारणत्वेन नहीं मानता हैं। अपने अभिप्राय के अनुसार से सत् उत्तर करता हुआ उससे व्याहत नहीं होता है, जातिवादि तो व्याहत होता है अत एव सत्प्रतिपक्ष सदुत्तर है और जाति असदुत्तर है ऐसा सभी दर्शनानुमत है। इसके विरुद्ध कथन करने वाले गुरु भी लघु ही है। रत्न प्रकाशादि मत को भी इसी प्रकार संगत करना चाहिये। निरालम्बनादि अनुमान भी व्याप्त्यादि प्रयुक्त हों तब तो वह भी सदुत्तर हैं और यदि व्याप्त्यादि रहित हो तो वह जाति रूप है।

अब बाध का निरूपण करते हैं

अथ सत्प्रतिपक्ष के निर्वचन के अनन्तर बाध का निरूपण करते हैं। बाधादिक हेत्वाभास का खण्डनकार ने बाध स्वरूप को अनवस्थितप्राय उत्पन्न ग्रन्थ कहा है।

साध्यको बाधितः यद्यप्यकेवलान्वयिनः सर्वस्यैव साध्याभाव-

अतः यहां उद्धार कर्ता कहते हैं कि बाध में जो बाधत्व है उसका दिग्दर्शन कराया जाता है। तत्र निर्वचन प्रसंग में साध्याभाव प्रकारक जो प्रमा उसको बाध कहते है (जैसे वह्निमान ह्रद यहां ह्रद वह्न्य भाव वाला है, साध्याभाव वह्न्यभाव तत्प्रकारक वह्न्यभाव है प्रकार जिसमें ऐसी जो प्रमा, वह्न्यभाववान् ह्रदः इत्याकारक जो प्रमा उसो का नाम है बाध। बाध निश्चय रहने से वह्निमान् ह्रद इस अनुमिति का प्रनिबन्ध हो जाता है।) तथा प्रमित प्रमा विषयोभूत जो साध्याभाव, उसका प्रतियोगी जो साध्य, तत्सम्बन्धी जो हेतु सो बाधित कहलाता है। यद्यपि अकेवलान्वयो सभी हेतुओं की साध्याभाव प्रमा हो सकती है, इसलिये व्यतिरेकी साध्यक वह्न्यादि साध्यक सकल हेतु में बाध का लक्षण जाने से सद्धेतु में अति व्याप्ति होती है, तथापि बाध लक्षण घटक जो साध्याभाव प्रमा है सो पक्ष में विवक्षित है अर्थात् पक्ष मे जो साध्याभाव प्रमा उसका नाम बाधक होता है। विश्वनाथ भट्टाचार्य ने भी कहा है और युक्ति सिद्ध भी यही है, वाध्य बाधक भाव अधिकरण को अन्तर्भाव करके ही होता है। वह्निवाला जल है इस बुद्धि के प्रति वह्न्यभाव वाला जल है यही प्रति बन्धक होता है। न तु वह्न्यभाव वाला भतल है इत्याकारक निश्चय वह्निवाला जल है

प्रमा सम्भवतीति व्यतिरेकिसाध्यकाशेषसद्धेतुव्याप्तिः तथापि पक्षे सा विवक्षिता बाधे च पक्षतास्तीत्युक्तं तेन पक्षे साध्याभावप्रमा बाधः न च कपिसंयोगसाध्यके सद्धेतावतिव्याप्तिः

यह प्रतिबन्धक होता है। न तु वह्न्यभाव वाला भूतल है इत्याकारक निश्चय वह्निवाला जल है, इस बुद्धि का बाधक होता है। समान विषय में ही विशिष्ट बुद्धि तथा बाध निश्चय की विरोधिता सर्वानुमत है। बाध स्थल में पक्षता रहती है, ऐसा कहा गया है। अर्थात् यदि संशय पक्षता है तब जल वह्निमान है वा नहीं ? यह सन्देह ही पक्षता है। यदि सिषाधयिषा पक्षता है तो भी वह्नि की इच्छा रूप पक्षता रहती है, इसलिये पक्ष में पक्षत्वेन अभिमत अधिकरण में जो साध्याभाव प्रकारक प्रमा उसका नाम है बाध। यहा प्रमा शब्द का अर्थ है निश्चयात्मक ज्ञान। अन्यथा प्रमात्वेन प्रतिबन्धकता में गौरव होता है।

प्रश्न—कपि संयोग साध्यक एतद्वृक्षत्व रूप सद्धेतु में बाध लक्षण की अतिव्याप्ति होती है, अर्थात् पक्ष में साध्याभाव प्रमा को बाध कहते है तो वृक्ष में शाखावच्छेदेन कपि संयोग के रहने पर भी मूलावच्छेदेन उसी वृक्ष रूप अधिकरण में कपिसंयोगाभाव रूप साध्याभाव के रहने से पक्ष में साध्याभाव प्रमा रहती है तो अलक्ष्य में लक्षण के जाने से अतिव्याप्ति होगी। वृक्ष में कपि संयोग के रहने

प्रतियोगिव्यधिकरणेति साध्याभावविशेषणात् । ननु साध्याभावप्रमा गृहीतप्रामाण्या वा प्रतिबध्नीयाद् गृहीतप्रामाण्या वा । नाद्यः तस्या बुद्ध्यन्तरमात्रविनाश्यत्वेन तावन्तं कालमनवस्थितेः । नापरः तस्याः संशयोपस्थितिसाध्याभावधीवदधिकबलत्वानवगमेन प्रतिबन्धकत्वायो-

---

पर भी मूलावच्छेदेन कपिसंयोगाभाव की प्रमा ही है ।

उत्तर—प्रतियोगो व्यधिकरण, यह साध्याभाव का विशेषण साध्याभाव को दिया जाता है, अर्थात् साध्याभाव में प्रतियोगी व्यधिकरण जो साध्याभाव प्रमा, उसको कपिसंयोगो में बाध्य कहते हैं । साध्यभाव प्रमा तो है. परन्तु वह प्रतियोगी समानाधिकरण है प्रतियोगी व्यधिकरणी नहीं है । इसलिये अव्याप्यवृत्ति साध्यक सद्धेतु में अतिव्याप्ति नहीं होती है ।

प्रश्न—यह जो साध्याभाव प्रमा है सो गृहीति प्रामाण्य होकर के अनुमितिकी प्रतिबन्धक होती है अथवा अगृहीत प्रामाण्य होकर के अनुमिति की प्रतिबन्धक होतो है ।

इसमें प्रथम पक्ष ठीक नहीं है क्योकि वह प्रमा बुध्यन्तर मात्र से विनष्ट होने वाली तादृश प्रमा तावत्काल पर्यन्त स्थिर नहीं रह सकती है । न या द्वितीय पक्ष ठीक है, क्योंकि नहीं है गृहीत प्रामाण्य जिसमें ऐसी जो कोई है सो प्रतिबन्धक नहीं हो सकती है, जैसे संशयोपस्थित साध्याभाव ज्ञान की तरह अधिक बलवत्व का अनवगम अर्थात् अज्ञान

गात् । साध्याभावधियः प्रामाण्यग्रहः प्रतिबन्धक इति चेत् । न तर्हि बाधो दोषः प्रामाण्यस्य ततो भिन्नत्वात् साध्याभावधियः प्रामाण्यग्रहानन्तरं पुनर्जाता साध्याभावधीः सा च विशेषदर्शनोदीच्यत्वेन शङ्कानास्कन्दितेति सैवानुमितिप्रतिबन्धिकेति चेत् सा हि तृतीयलिङ्गपरामर्शादर्वाक् पश्चाद्वा आद्ये परा-

---

होने से । अर्थात् जैसे संशयात्मक साध्याभाव ज्ञान प्रतिबन्धक साध्यवत्ता ज्ञान में नहीं होता है । इसी तरह गृहीता प्रामाण्यक साध्याभाव प्रमा भी साध्यवत्ता ज्ञान में प्रतिबन्धिका नहीं हो सकेगी । अधिक बलवत्व ज्ञान का अभाव होने से ।

प्रश्न–नहीं कहो कि साध्याभाव विषयक जो ज्ञान तन्निष्ठ जो प्रामाण्य ग्रह वही प्रतिबन्धक होगा ।

उत्तर–तब तो बाध दोष नहीं होगा, क्योंकि प्रामाण्य तो उससे भिन्न है ।

प्रश्न–साध्याभाव ज्ञान का जो प्रामाण्यज्ञान तनन्तर पुनः जायमान जो साध्याभाव बुद्धि वह विशेष दर्शन का उत्तरकालिक होने से शंकाक्रान्त नहीं है इस लिये वह बुद्धि अनुमिति की प्रतिबन्धिका होगी ।

उत्तर–वह जो साध्याभाव धी है सो तृतीय लिंग परामर्श से पहिले होती है वा पश्चात होती है ? इसमें प्रथम पक्ष मानें तब तो उस परामर्श से ही साध्याभाव की बुद्धि नष्ट हो जायगी, तब अविद्यमान होने के कारण वह बुद्धि अनु-

मर्शेनैव तर्हि सा ध्वंसितेत्यसत्त्वान्न प्रतिबन्धुमीष्टे अन्त्ये किं तया लिङ्गपरामर्शस्य चरमकारणत्वेनानुमितिः स्यादेव सत्प्रतिपक्षवदसावपि प्रतिबध्यत इति चेत् । तर्हि तृतीयलिङ्गपरामर्शस्य व्याप्तिपक्षधर्मतासम्पन्नद्वयग्राहिणः समसमयतया भागशः प्रतिबध्यप्रतिबन्धकभावो युज्यते प्रकृते तु निष्परिपन्थिना तृतीयलिङ्गपरामर्शेनादावनुमितौ जनितायां बाधैव नोदेष्यति अनुमित्यैव प्रतिबन्धात् । उदिता बाधनानुमितिं प्रतिबध्नीयात् ।

मिति का प्रतिबन्ध करने में समर्थ कैसे होगी ? यदि अन्तिम पक्ष अर्थात् परामर्श के अनन्तर में होती है तो वह साध्याभाव बुद्धि क्या कर सकेगी ? क्योंकि तृतीयलिंग परामर्श अनुमिति का चरम कारण है ता उस चरम कारण के रहने से अनुमिति अवश्य मेव उत्पन्न हो जायगी, तब साध्याभाव प्रमा निरर्थक हो जातो है ।

प्रश्न–जिस प्रकार से सत्प्रतिपक्ष अनुमिति का प्रतिबन्धक होता है उसो तरह साध्याभाव ज्ञानरूप बाध भी अनुमिति का प्रतिबन्धक होगा ।

उत्तर–तब तो व्याप्ति पक्षधर्मताद्वयका ग्राहक जो तृतीयलिंग परामर्श सो समान समय वाला होने से भागरूप से प्रतिबध्य प्रतिबन्धक भाव ही युक्त होगा । प्रकृत में तो प्रतिबन्धक रहित परामर्श से प्रथमतः अनुमिति उत्पन्न हो जायगी । तब साध्यभाव ज्ञानात्मक बाध की उत्पत्ति नहीं

तदुक्तं गृहीत्वार्थं गताश्चौराः कस्तानाच्छेत्तु मर्हतीति । अथ प्रागुत्पन्नैव बाधादूऽरविप्रकृष्टा तृतीयलिङ्गपरामर्शं प्रतिरोत्स्यति यथा सिषाधयिषा पक्षतां घटयतीति चेत् । निरन्वयध्वस्तापि सा मतिरेतस्य व्यामोहः । अथ बाधेन हेतुमति पक्षे

होगी क्योंकि अनुमिति से बाध का प्रतिबन्ध हो जाने से । जब बाध उत्पन्न हो लेगा तभी वह बाध अनुमति को रोकेगा न तु उत्पत्ति केपूर्व वा विनाश के अनन्तर प्रतिबन्धक हो सकेगा । तदुक्तम्, ऐसा कहा है कि धनलूटकरके जब चोर भाग गये तब उन चोरों को कौन मार सकेगा ? प्रकृत में इसी प्रकार परामर्श रूप करण से जब अनुमिति हो जायगी तब उसको रोक कौन सकेगा । प्रत्युत् उत्पन्न अनुमिति से बाध ही बद्ध हो जायगा ।

प्रश्न–प्रथमोत्पन्न अदूर विप्रकृष्ट अर्थात समीपवर्ती जो बाध, उससे तृतीय लिंग परामर्श का ही प्रतिरोध होगा, जैसे समीपस्थ सिषाधयिषा पक्षता बनतो है । (यहां दृष्टान्त दार्ष्टान्तिक में इतना भेद है कि दृष्टान्त में समीपवर्ती सिषाधयिषा से पक्षता का सम्पादन होता है और दार्ष्टान्तिक में समीपस्थ बाधक से तृतीयलिंग परामर्शका प्रतिरोध होता है । समीपस्थ से भी कार्य होता है, मात्र इतने अंश में समानता प्रदर्शन है ।

उत्तर–निरन्वय विनष्ट भी बाध ज्ञान बाधक होगा, यह इनका महान् व्यामोह है ।

व्यभिचारो निर्वाह्यत इति तद्वारैव बाधो विरोधीति तर्हि क्लृप्तत्वाद्व्यभिचार एव दोषः स्यात् हेत्वसत्त्वे त्वसिद्धिरिति नोभयथापि बाधः । तदुक्तं बाधायामपक्षधर्मो हेतुरनैकान्तिको वेति । अथ पक्षे हेतोः साध्याभाववद्गामितासन्देहो न दोषाय अनुमानमात्रोच्छेदापत्तेः किन्तु तन्निश्चयः न च साध्याभाव-

---

पूर्वपक्ष—बाध दोष द्वारा हेत्वधिकरण पक्ष में व्यभिचारका उत्थान होता है, तदनन्तर व्यभिचार द्वारा ही बाध विरोधी होता है । तब तो ऐसा निश्चित होने से व्यभिचार को ही दोष कहा जाय । और यदि पक्ष में हेतु न हो तब तो स्वरूप सिद्धि को हो दोष मान लिया जाय । उभयथापि बाध में दोषत्व नहीं होता है । अर्थात् बाध स्थल में पक्ष में हेतु रहता है अथवा नहीं ? यदि रहता है तो साध्यभाववत् पक्ष में हेतु की वृत्तिता होने से व्यभचार होता है उसी से प्रतिबन्धकता होगी, बाध को अतिरिक्त मानने की क्या आवश्यकता है ? यदि पक्ष में हेतु नहीं रहता है तब भी स्वरूप सिद्धि से ही निर्वाह हो जाता है, फिर बाध को अतिरिक्त दोष क्यों माना जाय ? तदुक्तम् ऐसा कहा है कि बाध स्थल में हेतु अपक्ष धर्म है अर्थात् पक्ष में हेतु नहीं रहता है अथवा हेतु अनैकान्तिक है । लघुपूर्वपक्ष-पक्षात्मक सध्याभावाधिकरण में हेतु की वृत्तिता संदेह है, वह दोषाधायक नहीं है । यदि पक्ष में तथाविध संदेह भी दोषाधायक होगा तब तो प्रायः सदनुमान का उच्छेद ही हो जायगा ।

प्रमायाः प्रामाण्यनिश्चयादेव तथा च गृहीतप्रामाण्या साध्याभावप्रमा पक्षे व्यभिचारनिश्चयमप्यापादयन्ती स्वतो दोषः प्राथम्यादावश्यकत्वादुपजीव्यत्वात्स्वतो दूषकत्वाच्चेति । एवं क्लृप्तत्वाद्व्यभिचारो दोषोस्तु दूषणक्षमत्वेसति प्रथम्याद्बाधा वेति विवादसीमा । अत्र च व्यभिचारव्याप्यत्वासिद्धयोः । सङ्करे यथा प्रथमोपस्थितः स्वतो दूषणक्षमस्तत्र व्यभिचारो दोषस्त-

---

क्योंकि वह्नि सन्देहाधिकरण में धूम की वृत्तिता रहने से । किन्तु निश्चित साध्याभावाधिकरण में हेतु की वृत्तिता प्रतिबन्धक है । और साध्याभाव प्रमा के प्रामाण्य निश्चय-मात्र से दोषाधायकत्व है । ऐसा हुआ तब गृहीत है प्रामाण्य जिस में, ऐसी जो साध्याभाव 'प्रमा, सो पक्ष में व्यभिचार निश्चय को आपादन करती हुई स्वत एव साध्याभाव प्रमा दोष है । प्रथमोपस्थित आवश्यक होने तथा व्यभिचार का उपजीव्य होने से । ऐसा हुआ तब निर्णीत होने से व्यभिचार दोष हो, दूषण समर्थ होकर प्रथमोपस्थित होने से । अथवा बाध दोष हो । बस इतने ही तक विवाद की सीमा है ।

लघु उत्तर—यहो प्रकृत स्थल में व्यभिचार और व्याप्यत्वासिद्धि का सकर होने से जिस प्रकार से उस स्थल में प्रथमोपस्थित होने से तथा स्वत एव दूषण में समर्थ होने से व्यभिचार दोष है, उसी प्रकार से प्रकृत में बाध दोष है, आपके कथन का ऐसा अभिप्राय होता है । ऐसा भले होवै ।

विवादसीमा अत्र च व्यभिचार व्याप्यत्वासिद्धयोः संकरे यथा प्रथमोपस्थितः स्वतः दूषणक्षमस्तत्र व्यभिचारो दोषस्तथात्र बाध इति त्वद्वचनार्थः अस्तु तावदेवं तथापि व्यभिचारान्न बाधः पृथक् असङ्कीर्णाभावादिति । अत्राहुः । प्रथमे क्षणे घटे पृथ्वीत्वसम्बन्धः जातेः सम्बन्धश्चेति वैशेषिकवचनात् द्वितीये च क्षणे तत्र गन्धोदयः तस्य घटत्वात् । अत एवाहुः । क्षणम-

---

तथापि व्यभिचार से प्रथक् बाध दोष नही है । असंकीर्ण का अभाव होने से ।

समाधान–अत्राहु रिति प्रथम क्षण में घट में पृथिवीत्व जाति का संबन्ध होता है, अर्थात् घट की जब उत्पत्ति होती है उसी क्षण में जाति का सम्बन्ध भी होता है । उत्पन्न होता है जाति का सम्बन्ध होता है ऐसा वैशेषिक का वचन है । और द्वितीय क्षणावच्छेदेन तत्र उस घट में गन्धकी उत्पत्ति होती है क्योकि जिस लिये उसमें घटत्व रहता है अर्थात् घटपार्थिव द्रव्य है । अतएव कहा है 'क्षणमगुणोभाव इति' अर्थात् निर्गुण निष्क्रिय होकर के द्रव्य उत्पन्न होता है तथा क्षण पर्यन्त निर्गुण निष्क्रिय रहता है तदनन्तर द्वितीयादि क्षणावच्छेदेन उसमें गुणादिक की उत्पत्ति होती है (द्रव्य निर्गुण उत्पन्न होता है, क्षण-पर्यन्त निर्गुण रहता है, इस नियम को स्वीकार करने में राजाज्ञा नहीं है किन्तु युक्ति प्रमाण है, तथाहि जिस क्षण

गुणो भाव इति तथा च प्रथमे क्षणे पृथिवीत्वेन घटे यद्गन्धानुमानं तत्तावन्न सम्भवति तत्र तदा गन्धासत्त्वात् नाप्यसत् व्यभिचाराद्यभावात् अथ तत्र गन्धसम्बन्ध एवानुमीयते स च

में घट उत्पन्न होता है यदि उसो क्षण में उसमें गन्धादिक भी उत्पन्न हो तब तो समकालिक उस गुण के प्रति समकालिक घट द्रव्य समवायोकारण नहीं बनेगा, क्योंकि अव्यवहित पूर्ववर्ती जो होता है सो ही कारण होता है तथा अव्यवहित पश्चाद्वर्ती जो होता है सो कार्य होता है। समकालिका में कार्य कारण भाव नहीं होता है। जैसे सव्येतर विषाण में। अतः घटीय गंधादिक गुण के प्रति घट की समवायिकारणता की सिद्धि हो, इसके लिये "निर्गुणं निष्क्रियं च द्रव्यमुत्पद्यते क्षण निर्गुणं निष्क्रियं च तिष्ठति" इस नियम को माना जाता हैं) ऐसा हुआ तब प्रथम क्षण में पृथिवी हेतु से घट रूप पक्ष में जो गन्धका अनुमान होता है "आद्यक्षणावच्छिन्नो घटो गन्धवान् पृथीवीत्वात्" उत्पत्ति क्षणावच्छिन्नघट गन्ध वाला है पृथिवोत्ववान् होने से। यह जो गन्ध का अनुमान होता है सो तो नहीं हो सकता है। क्योंकि तब घट में तदा उत्पत्तिक्षणावच्छेदेन गन्धका अभाव है। नहीं कहो कि तादृश स्थल में साध्य है ही नही सो भी नहीं है, द्वितीयादि क्षणावच्छेदेन गन्ध के रहने से पृथिवीत्व तथा गन्ध में व्यभिचारादिक दोष नहीं

समवायलक्षणस्तत्रस्त्येव गन्धयोग्यता वा सापि तत्रास्तीति मैवम् । यदि तत्राश्रयस्वातन्त्र्यात्कश्चिद् गन्धमनुमिनोति तदा

है । अर्थात् यत्र यत्र पृथिवीत्वं तत्र गन्ध यह व्याप्ति होती है, व्यभिचारादिक दोष नही हैं । अब यदि बाध दोष न माना जाय तब तादृश अनुमिति के अनुत्पाद में अर्थात् तादृशानुमिति वन्धक कौन होगा ? गन्धव्याप्य पृथिवीत्व वाला आद्य कालिक घट है, इस परामर्श की सर्वांश में शुद्धता है । अतः इस अनुमिति की प्रतिबन्धकता बाध मात्र में हैं, अतः एक बाध दोष व्यभिचार स्वरूपासिद्धि में अन्तर्गत न होकर के प्रथगेव हेत्वाभास होता हैं आभास-लक्षणोपपन्न होने से ।

प्रश्न—उत्पत्ति क्षण विशिष्ट घट गंध वाला है पृथिवी-त्ववान् होने से । यहां गन्ध को घट में साध्य नहीं बनाता हूँ, किन्तु गन्ध का जो सम्बन्ध समवाय है उसी को साध्य बनाता हूं । तादृस घट गन्ध सम्बन्ध वान् है, पृथिवीत्ववान होने से । यही अनुमिति का आकार है । अथवा गन्ध योग्यता को साध्य बनाता हूं, यह जो गन्ध का सम्बन्ध है तथा गन्ध की योग्यता है सो घट में विद्यमान है । तब तो यह सद्धेतु है, इसमें दोष का अन्वेषण करना ही व्यर्थ है ।

उत्तर—सब व्यक्तियों का अभिप्राय भिन्न भिन्न होता है, तो यदि कोई व्यक्ति अपने आशय के अनुकूल उत्पत्ति

किं वाच्यं बाधादन्यत् साध्यसंसर्गाभाववति सद्धेतुर्व्यभिचरित एव तेन गन्धप्रागभावावच्छिन्ने घटे तत्पृथिवीत्वं व्यभिचरितमेवेति चेन्मैवम् । साध्यवद्भिन्नसाध्यात्यन्ताभाववद्गामित्वस्य

कालिक घट में गन्ध का अनुमान करे तब उस स्थल में बाध को छोडकर और दूसरा कौन सा दोष बताया जा सकता है । अतः बाध दोष एक अलग ही है । एवं मूलावच्छिन्न वृक्ष कपि संयोगी है, इस स्थल में भी बाध व्यतिरिक्त दोष की सम्भावना न होने से बाध दोष का प्रथक होना आवश्यक है ।

प्रश्न–साध्यप्रतियोगिकसम्बन्धाभावाधिकरण में विद्यमान सद्धेतु भी तो व्यभिचारी ही कहा जाता है । इसलिये गन्धप्रागभावावच्छिन्नघटात्मक पक्ष में पृथिवीत्व हेतु व्यभिचारी ही है ।

उत्तर–साध्यवत्वावच्छिन्न प्रतियोगिताक भेदाधिकरण निरूपित वृत्तित्व अथवा साध्याभावाधिकरण निरूपित वृत्तित्व का नाम ही व्यभिचार होता है, एतादृश व्यभिचारित्व गन्धसाध्यक स्थल में पृथिवीत्व को नहीं है, क्योंकि घट जब गन्धवान् है तब उसमें गन्धवान्न, इत्याकारक भेद नहीं रह सकता है और साध्याभाव गन्धाभावाधिकरणता भी नहीं है, इसलिये पृथिवीत्व हेतु व्यभिचारी नहीं है ।

वा व्यभिचारपदार्थत्वात् प्रथमे क्षणे न गन्धोदयः सम्भवतीति तत्रापि गन्धात्यन्ताभाव एवेति चेत् । धिङ् मूर्ख नहि यत्र यदवच्छेदेन यस्य प्रागभावस्तत्र तदवच्छेदेन तस्यात्यन्ताभाव इति कोप्याह नापि युज्यते प्रागभावस्य प्रतियोगिसादेश्यनियमात् अत्यन्ताभावस्य तद्वैदेश्यनियमादिति कथं तर्हि गन्ध-

---

प्रश्न–प्रथम क्षणावच्छेदेन घट में तो गन्धोदय नहीं होता है, इसलिये आद्यक्षणावच्छेदेन गन्धाभाव घट में है तब तो पृथिवीत्व व्यभिचरित ही है।

उत्तर–धिग् मूर्ख ! जिस अधिकरण में यदवच्छेदेन जिसका प्रागभाव रहता है उस अधिकरण में तदवच्छेदेन उसका अत्यन्ताभाव भी रहता है, यह बात युक्ति युक्त भी नहीं है: क्योंकि प्रागभाव प्रतियोगी के समान देश में रहता है, ऐसा नियम है। तथा अत्यन्ताभाव प्रतियोगी के समान देश में नहीं रहता, अपितु विभिन्न देश में रहता है। अत्यन्ताभाव को प्रतियोगितावच्छेदकावच्छिन्न प्रतियोग्यधिता के साथ विरोध होता, ऐसा नियम होने से।

प्रश्न–तब तो गन्ध प्रागभावावच्छिन्न घट गन्धवान् है, इस वाक्य में अयोग्यता कैसी होगी ? क्योंकि एक पदार्थ संसर्ग का अपर पदार्थ निष्ठ अत्यन्ताभाव प्रतियोगित्व रूप हो तो अयोगता है। सो तो प्रकृत में नहीं है। प्रत्युत यहां तो प्रथमक्षणावच्छिन्न घट में तो गन्ध का

प्रागभावावच्छिन्नो घटो गन्धवानित्यत्र वाक्येऽयोग्यता एक-पदार्थसंसर्गस्यापरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वे हि सा सा च नात्र आद्यक्षणावच्छिन्ने घटे गन्धस्य प्राग्भावो न त्वत्यन्ताभाव इति। मैवम्। यत्र हि यन्न सम्भवति तत्र तस्य बाधश्चायोग्यता च तेन गन्धप्रागभावावच्छिन्ने घटे न सम्भवतीति तत्र न तदुभयमविकलम् अयन्तु विशेषो यः प्रागभावस्तल्लक्षणमात्रम् अत्यन्ताभावस्थले यावत्सत्त्वम् अत्र द्वितीयस्य स्फुटावभासत्वात्तत्रैव तदुभयमुदाहृतं प्राचीनैर्न तु प्रागभावस्थले

प्रागभाव है। गन्ध के अत्यन्ताभाव को तो आप नही मानते हो, तब अत्यन्ताभावप्रतियोगित्व रूप अयोग्यता कैसे रही ? अर्थात् अयोग्यता नहीं है। तब तो उक्त वाक्य के प्रमात्मक शाब्द बोधोत्पादक होने पर प्रामाणिकत्व हो जाना चाहिये।

उत्तर–जो पदार्थ जिस क्षण में जिस अधिकरण में नही रहता है उस अधिकरण में उसका बाध तथा अयोग्यता होती हैं। इसलिये गन्धप्रागभावावच्छिन्न घट में गन्ध नहीं होती है। अतः तादृश घट में गन्ध का बाध और अयोग्यता दोनों अविकल रूप से रहती है। पर यह विशेषता है कि प्रागभाव तो लक्षण मात्र है। अत्यन्ताभाव स्थल में यावत्सत्व रहता है। यहां द्वितीय को अर्थात् अत्यन्ताभाव को स्फुटावभासी होने से अत्यन्ताभावस्थल में

दुर्बोधत्वादिति योग्यतालक्षणे यदत्यन्ताभावग्रहणं तत्सम्पाता-यातमन्यमतावलम्बनेन वेति। न च जात्या व्यक्त्याक्षेपे प्रलये व्यभिचार इति यन्नैयायिकैरुक्तं तदेवं सति विरुध्येत न हि व्यक्तिध्वंसवद्गामितया जातेर्व्यक्तिव्यभिचारिता सम्भवतीति। मैवम्। तत्रत्यव्यभिचारिपदेनाव्यभिचारविरोधिनः कार्त्स्न्येन सम्बन्धाभावस्य विवक्षितत्वात्। अन्यथा तादृशं पृथिवीत्वं

ही बाध और योग्यता उदाहृत किया गया। अर्थात् प्राचीनाचार्यों ने किया, किन्तु प्रागभावस्थल में ही तदुभयका कथन नहीं किया, दुर्बोध होने से। इसलिये योग्यता के लक्षण में जो अत्यन्ताभाव गृहण हैं सो सम्पात से आया है अर्थात् भ्रम से आ गया है। अन्यमत के अवलम्बन से आ गया है।

प्रश्न—जाति में व्यक्ति का आक्षेप होता है अतः प्रलय में व्यभिचार होता है, ऐसा जो नैयायिकों ने कहा है सो विरुद्ध होता है। क्योंकि व्यक्ति का ध्वंसाधिकरण प्रलय में जाति की वृत्तिता होने से व्यभिचारित्व सम्भवित नहीं है।

उत्तर—तत्स्थल में व्यभिचारी पद से अव्यभिचार विरोधी संपूर्ण रूप से सम्बन्ध का अभाव विवक्षित है, अन्यथा तादृश पृथिवीत्व के मध्य में भी गंध का अनुमापक नहीं होगा, ऐसा कह दिया गया है। तस्मात्गृहीत है

मध्येपि गन्धं न गमयेदित्यस्योक्तप्रायत्वादिति साध्याभावधियो गृहीतप्रामाण्यायाः साध्यधीप्रतिबन्धकतया तदभावस्तृतीयलिङ्गपरामर्शेनापेक्ष्यते तस्याअभ्युत्थानात्तु सह नास्तीति ॥

प्रामाण्य जिसमें, ऐसी जो साध्याभाव प्रमा, सो अनुमिति अर्थात् साध्यवत्ता ज्ञान की प्रतिबन्धिका है। इसलिये तादृश बाधाभाव तृतीयलिंग परामर्श से अपेक्षित होता है, साध्याभाव प्रमा के उत्थान से परामर्श उसके साथ नहीं होता है।

इति पश्चिमाम्नाय–श्रीरामानन्द–पीठ-श्रीशेषमठाधीश
जगद्गुरु श्रीरामानन्दाचार्य–योगिराज
स्वामि श्रीरामप्रपन्नाचार्य दर्शनकेशरीकृत
खण्डनोद्धारदीपिकायां प्रमागतदाभासोद्धार-
नामकः प्रथमः परिच्छेदः संपूर्णः।

❀अथ द्वितीयपरिच्छेदः प्रारभ्यते❀

हेत्वाभासखण्डनानन्तरं निग्रहस्थानत्वेन स्मृतान् प्रतिज्ञाहान्यादीन् खण्डयति तत्र स्वीकृतोक्तपरित्यागः प्रतिज्ञाहानिरित्यलक्षणं झटिति संवरणेतिव्याप्तेः। न हि झटिति संवृतं पतितमपि निग्रहस्थानं निगृह्णति किञ्च स्वीकृतेपि व्यर्थं स्वीकृत्यास्वीकारो हि त्याग इति स्वीकारस्य त्यागपदार्थान्तर्ग-

---

हेत्वाभास लक्षण का खण्डन करने के पश्चात् निग्रह स्थानत्व रूप से स्मृत प्रतिज्ञा हान्यादिक का खण्डन करते हैं। स्वीकृत जो उक्त कथित पदार्थ, उसका जो परित्याग, यही प्रतिज्ञा हानि का लक्षण है, सो ठीक नहीं है, क्योंकि झटित् संवरण में अति व्याप्ति हो जाती है। झटित संवृत अर्थात् पतित निरस्त जो निग्रह स्थान सो निगृहीत नहीं करता है। और भी देखिये प्रतिज्ञा हानि के लक्षण में स्वीकृत जो पद है सो निरर्थक है, क्योंकि स्वीकार करके जो अस्वीकार करना उसी का नाम त्याग होता है। तो स्वीकार जो है सो तो त्याग पदार्थ के अन्तर्गत होने से त्याग से स्वीकार का ज्ञान होगा, पुनः स्वीकार पद प्रयोग में पुनरुक्ति दोष हो जाता है।

उत्तर—प्रतिज्ञा हानि में निग्रह स्थान का जो सामान्य लक्षण है उसका अनुवर्तन होने से झटिति संवरण में अति व्याप्ति का निराकरण हो जाता है। कथा में कारणीभूत

तत्वेन तत एव प्राप्त्या पौनरुक्त्यात् । निग्रहस्थानसामान्य-लक्षणानुवृत्त्या झटिति संवरणातिव्याप्तिनिरासात् न हि झटिति संवृतं कथाकारणीभूतसम्यग्ज्ञानविरहनिग्रहस्य स्थानमुन्नायकं भवति नापि स्वीकृतपदं पुनरुक्तं परिहारमात्रस्यैव न्यागपदार्थ-त्वात् परोक्तं दूषणं परिहरतीत्यादेर्दर्शनात् नापि रूपान्तरेण स्वी-कृत्य रूपान्तरेण त्यागेतिव्याप्तिस्त्यागस्य प्रकाराकांक्षायां स्वीकारप्रकारस्यैवोपस्थितत्वेनान्वयात् उपस्थितपरित्यागे गौरवात् आग्नेयीन्यायात् । न चापसिद्धान्तेतिव्याप्तिः तत्रापि नैयायिकोहमित्यादिना संक्षिप्ताचरेण सर्वस्यैव न्यायसिद्धान्त-

---

जो सम्यग् ज्ञान तद्विरह निग्रह का स्थान झटिति संवरण का उत्तेजक नहीं होता है । न वा स्वीकृत पद पुनरुक्त होता है, क्योंकि परिहार मात्र को ही त्याग कहा जाता है। लोक में परोक्त दूषणका परिहार करता है, ऐसा प्रयोग देखने में आता है । न वा रूपान्तर से स्वीकार करके रूपा-न्तर से त्याग में अति व्याप्ति होती है । त्याग के प्रकार की आकांक्षा होने पर स्वीकार का जो प्रकार है वही उपस्थित होने से अन्वित होता है क्योंकि उपस्थित का छोड़कर के अनुपस्थित का स्वीकार करने में गौरव होता है, आग्नेयादि न्याय से ।

प्रश्न—यथोक्त लक्षण के अपसिद्धान्त में अतिव्याप्ति होती है क्योंकि अपसिद्धान्त में भी मैं नैयायिक हूँ इत्यायिक

स्योक्तौ पश्चात्तदेकदेशत्यागे उक्तलक्षणसत्त्वादिति वाच्यं स्वीकृतस्य विशिष्योक्तस्य संवरणावसरात्यये परित्यागः प्रतिज्ञाहानिरिति लक्षणात् । हन्तैवं संवरणावसरात्यये स्वीकृतपरित्याग इत्येवास्तु तावन्मात्रस्यैव निग्राहकत्वात् शेषं व्यर्थमिति चेत् । मैवं वोचः । विचित्राभिसन्धाना हि प्राञ्चः तथाहि विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानमिति सङ्क्षेपे पारमार्षं सूत्रं विस्तरे तु प्रतिज्ञाहानिरित्यादि एवमसाधनाङ्गवचनमदोषोद्भावनमिति प्रस-

---

हूं इत्यादि संक्षिप्त अक्षर सभी न्याय सिद्धान्त का कथन करके पश्चात् एक देश का परित्याग करने पर प्रतिज्ञा हानि का लक्षण उसमें चला जाता है ।

उत्तर–संवरण का जो अवसर है उसको बीत जाने पर स्वीकृत तथा विशेष रूप से उक्त पदार्थ का जो परित्याग सो ही प्रतिज्ञा हानि का लक्षण है ।

प्रश्न–तब तो संवरण का जो अवसर उसके अत्यय बाद स्वीकृत का परित्याग, इतना ही प्रतिज्ञाहानि का लक्षण कहिये । एतावत् मात्र अंश से ही निगृहीत हो जायगा । शेष जो पद है स्वीकृत तथा विशिष्योक्त सो निरर्थक हे ।

उत्तर–ऐसा मत कहो ! प्राचीनाचार्यों का अभिप्राय विलक्षण होता है । तथाहि सूत्रकार ने संक्षेप रूप में कहा है कि विप्रतिपत्ति अप्रतिपत्ति यह निग्रह स्थान है और उसी संक्षेप

ज्यपर्युदासाभ्यां सङ्क्षेपे चतुर्द्धेति बौद्धाः विस्तरे तु चतुर्दशेति त एवाहुः । तथा चामीषां यावन्ति रूपाणि निग्रहे सम्भवन्ति तेषां मध्ये केनचित्कानिचित्परिगृहीतानि केनचित्कानिचिदभिप्रायस्वातन्त्र्यात् सम्भवन्ति तु सर्वाण्येव रूपाणीति । अयन्तु विशेषो यत्स्वाश्रितशास्त्रानुक्तं रूपं निग्रहक्षममपि पुरस्कृत्य

कथित पदार्थ का विस्तार रूप से कथन किया गया है प्रतिज्ञा हानि प्रतिज्ञा संन्यास इत्यादि रूप से । इसी तरह असाधन वचन स्वल में अदोष का उद्भावन यहां प्रसज्य पर्युदास के द्वारा संसेक्ष में चार प्रकार से है और उसी का विस्तार रूप से कथन करने पर चतुर्दश प्रकार होता है, ऐसा कहत हैं । ऐसा हुआ तब प्रतिज्ञाहान्यादि के निग्रह में जितने रूप सम्भवित हैं उन रूपों के बीच में से किसी ने किसी रूप का परिग्रह किया, किसी और ने किसी और रूप का परिग्रह किया, अपने अपने अभिप्राय के अनुकूल । परंतु ये सभी रूप उसके सम्भवित हैं । इसमें यह विशेषता है कि स्वाश्रित जो शास्त्र उसमें अनुक्त जो रूप अर्थात् प्रकार वह निग्रह में समर्थ है । उस रूप को पुरस्कृत करके निग्रह करता हुआ अपसिद्धान्त को प्राप्त करता है । अर्थात् जो पदार्थ स्व शास्त्र के अनुकूल स्व शास्त्रोक्त नहीं है किन्तु निग्रह करने में समर्थ है, यदि उस पदार्थ का प्रयोग करके वादो को निगृहीत किया जाय, तब उस स्थल में

निगृह्णन्नपसिद्धान्तमासादयतीति । हन्तैवं चौरापराधेन माण्डव्यनिग्रहः कुरुर्भेनाहिसंतृप्रतोमुर्नेर्मताश्रायणेन सद्धर्मेनानिगृह्णतो वादिनोपसिद्धान्तः स्यादिति किमित्र क्रियातां दुर्लभा हि शास्त्रपरिपाटी तथाहि खाण्डनिक त्वमेव वेदान्तमाश्रयमाणो वेदानामपि प्रामाण्यमपजानानो व्याघातादप्यबिभ्यत् प्रमाणपथावतीर्णं सर्वं जहत् तदनवतीर्णं ब्रह्माद्वैतं दधत्स्वाश्रितशास्त्रश्रद्धालुतया परं जीवसीति । नन्वेकस्य परित्यागपरिग्रहौ विरुद्धाविति

अपसिद्धान्त है, ऐसा कहा जाता है ।

प्रश्न–अरे ऐसा हुआ तब तो चोर के अपराध से माण्डव्य का निग्रह न्याय लग जाता है ।×

उत्तर–क्या किया जाय ? शास्त्र की परिपाटी विलक्षण होती है, तथाहि हे खाण्डनिक ! जैसे वेदान्त मत का आश्रय लेकर के आप ही अर्थात् आप वेदान्तमतावलम्बी होते हुए भी, वेद का जो प्रामाण्य है उसका तिरस्कार करते हुए व्याघात दोष से भी नही डरते हुवे प्रमाणसिद्ध सभी पदार्थ का त्याग करते अप्रामाणिक ब्रह्माद्वैत को धारण करते हुए स्वाश्रित जो शात्र है उसमें श्रद्धालुता के कारण से जीते हैं ।

प्रश्न–एक पदार्थ परित्याग तथा परिग्रह अर्थात स्वीकार यह विरुद्ध है, इसलिये विरोध को ही यहाँ

× इस जगह की पंक्ति कुछ अस्तव्यस्त प्रतीत होती है, अतः पाठक लोग स्वयं विचार करलें ।

विरोध एवात्र दोषोस्त्विति चेत् । मैवम् । त्यागस्यानुद्भावने तद्घटितस्य विरोधस्योद्भावनाशक्यतया आवश्यकोद्भावनस्य त्यागस्यैवात्र दोषत्वात् सेयं प्रतिज्ञाहानिः पक्षहानिसाध्यहानि-लिङ्गहानिदृष्टान्तहानितद्विशेषणहानिक्रमहानिभेदादनेकधा प्रतिज्ञा-पदं त्वत्र निर्वाह्यभागपरं तेन सर्वं सङ्ग्रह इति स्थापकेनोक्तस्य दूषकेण दूषितस्य साध्यभागस्य पूर्वानुक्तविशेषणवतोऽभिधानं

दोष कहो ।

उत्तर—त्याग का यदि उद्भावन नहीं करते हैं तब त्याग घटित जो विरोध उसका उद्भावन भी अशक्य होता है । इसलिये आवश्यकोद्भावन जो त्याग उसी को दोष कहना ठीक है, और त्याग ही दोष है । सो यह प्रतिज्ञा हानि, पक्ष हानि, साध्य हानि, लिंग हानि, दृष्टान्त हानि, पक्षविशेषणादि हानि क्रम हानि भेद से अनेक प्रकारका है । प्रतिज्ञाहानि में जो प्रतिज्ञा पद है सो निर्वाह्य भाग का बोधक है । इससे सभी का संग्रह होता है । पूर्व में अनुक्त विशेषण वाला स्थापक से उक्त तथा दूषक से दूषित जो साध्य भाग, उसका जो कथन, उसका नाम प्रतिज्ञान्तर होता है । नहीं कहोकि यहां पूर्व पदार्थ का निर्वचन नहीं हो सकता है, तो यह कहना ठीक नहीं है, क्योंकि जिस काल में उक्त विशेष का समभिहार सम्भवित हो उसी काल विशेष को

प्रतिज्ञान्तरं न च पूर्वपदार्थानिरुक्तिः यस्मिन् काले उक्तिविशेष्यस्य समभिव्याहारः सम्भवति तत्कालस्य पूर्वपदार्थत्वात् तेन विशेष्य समभिव्याहारौपयिककालेऽनुक्तस्य साध्यविशेषणस्य दूषणाभिधानानन्तरं यदभिधानं तत्प्रतिज्ञान्तरम्। नन्वीदृशः कालो विशेष्याभिधानादव्यवहितः पूर्वश्चोत्तरश्च भवति तथा चैतयोरेकस्मिन्ननुक्तत्वात्पूर्वमुक्तं भवत्येवेति चेन्न। सामान्याभावस्याश्रयणात्। न च प्रागुक्तस्य प्रकरणलभ्यस्य विशेषणस्यानुक्तभ्रान्त्या दूषितस्याभिधानेऽतिव्याप्तिरिति वाच्यम् अनुक्तपदेनाप्रतिपा-

---

पूर्व पदार्थ कहा जाता है। इसलिये विशेष समभिव्याहार का उपयोगी जो काल उसमें अनुक्त साध्य विशेषण के दूषण कथन के अनन्तर जो कथन उसी का नाम प्रतिज्ञान्तर कहा जाता है।

प्रश्न–एतादृश अर्थात् विशेष्य के समभिव्याहार के उपयुक्त जो काल है सो तो विशेष्याभिधान का अव्यवहित पूर्वकाल तथा पश्चात काल दोनों हो सकता है। तब तो एक में जो कथित है अपर में अनुक्त है तथापि पूर्व कथित होता ही है।

उत्तर–यहां अनुक्त में सामान्यभाव की विवक्षा है इसलिये कोई दोष नहीं होता है।

प्रश्न–पूर्व कथित प्रकरण में प्राप्त जो विशेषण उसका अनुक्त भ्रम से दूषित है उसके कथन में (अभिधान में)

दितस्योक्तत्वात् तस्य तु प्रकरणेनैव प्रतिपादितत्वात् । ननु तथापि परस्मिन्ननुत्पन्नप्रतिपत्तौ प्रतिपादितत्वस्याभावात्तत्राति-व्याप्तिरेवेति चेन्न । श्रोतृप्रतिपत्त्यनुकूलकारणाकात्स्न्र्यस्य प्रतिपादितपदार्थत्वात् तस्य चानुत्पन्नप्रतिपत्तिके सत्त्वात् न च प्रतिज्ञाहान्या हेतुहानेरिव प्रतिज्ञान्तरेण हेत्वन्तरस्यापि सङ्ग्र-होस्त्विति मणिण्ठमतमादेयं स्वतन्त्राभिप्रायस्य नियोगपर्यनु-योगानर्हत्वादित्युक्तत्वात् प्रतिज्ञाविरोध उक्तव्याघातः स च

अतिप्याप्ति होती है ।

उत्तर–अनुक्त पद से अप्रतिपादितत्व कहा जाता है, उसका तो प्रकरण से हौ प्रतिपादन हो गया है ।

प्रश्न–नहीं उत्पन्न है प्रतिपत्ति जिसमें तादृश पुरुष में प्रतिपादितत्व का अभाव होने से उसमें अतिव्याप्ति होती है ।

उत्तर–श्रोता पुरुष की जो प्रतिपत्ति (ज्ञान) तदनुकूल कारण का अकात्स्न्र्य उसको प्रतिपादित पदार्थ कहा जाता है । एतादृश प्रतिपादित पदार्थत्व अनुत्पन्न प्रतिपत्तिक में भी है, नहीं कहो कि प्रतिज्ञा हानि से जैसे हेतु हानि दोष होता है वैसे ही प्रतिज्ञान्तर से हेत्वन्तर को मानना चाहिये। यह मणिकण्ठ का जो मत है सो भी आनादेय है । क्योंकि स्वतन्त्रेच्छा जो मुनि सो नियोगपर्यनुयोगार्ह नहीं है । ऐसा कहा गया है । प्रतिज्ञा विरोध में व्याघात होता

यस्य येन रूपेण यदनन्वयो येनाभ्युपगतस्तस्य तेनैव रूपेण तेन पुंसान्वयाभ्युपगमः स च पदादिभिरुन्नीयत इति पदादि-व्याघात उच्यते। ननु यावज्जीवमहं मौनी अवाचकः शब्द इदं न जानामि ज्ञानमविषयमित्यादिषु विरोधपप्रञ्चेषु नाभ्युपगमान्तरं पश्यामो येन विरोधः स्यादिति। मैवम्। मौनं हि वचनोच्चा-रणसमर्थस्य तदनुच्चारणं तत्राहं मौनीति शब्दोच्चारयितृत्वं आत्मनोऽभ्युपगच्छति कथमन्यथा वाचा प्रतिपादयति एवं

है सो कहा गया है। वह व्याघात यस्य जिसको जिस रूप से जिसके साथ अनन्वय का जिसने स्वीकार कर लिया है उसका उसी रूप से उसी पुरुष का अन्वय का स्वीकार कर लेना ही व्याघातक होता है। वह व्याघात पदादि के द्वारा उन्नीयमान होता है, इसलिये उसको पदादि व्याघात कहते हैं।

प्रश्न–यावज्जीवन मैं मौनी हूं, शब्द अवाचक है। इसको अमुक वस्तु को नहीं जानता हूं. ज्ञान अविषयक है, इत्यादि विरोध स्थल में तो दूसरा कोई अभ्युपगम नहीं देख पड़ता है जिससे कि विरोध हो।

उत्तर–जो व्यक्ति शब्द के उच्चारण में समर्थ है उससे शब्द का उच्चारण न होना ही मौन है, इस स्थिति में मैं मौनी हूँ इत्याकारक शब्द का उच्चारयिता अपने को मानता है, अन्यथा किस प्रकार से वाणी से प्रतिपादन करता है?

चाहं मौनीति व्यक्तमभ्युपगमान्तरं न चेत्प्रतिपादयति न तर्हि प्रतिपादकः एवमवाचकः शब्द इत्यादावपि शब्दस्य वाचकत्व-मभ्युपैति कथमन्यथा तेन प्रतिपादयति तथा चावाचकः शब्द इति ब्रुवतो व्यक्तमभ्युपगमान्तरं एवमिदमिति प्रत्यक्षविषयमिदमा निर्दिशति न जानामीति तज्ज्ञानमपन्हुते एवं ज्ञानमविषयमि-त्यादिवदत एतद्वाक्यजमपि ज्ञानं ज्ञानाविषयत्वं न विषयी-करिष्यतीति गलेपादिकयापि ज्ञानस्य विषयत्वमङ्गीकारयितव्य

ऐसा हुआ तब अह मौनी, यहां अभ्युपगमान्तर व्यक्त है। यदि प्रतिपादन नहीं करता है तब वह प्रतिपादक नहीं है। इसी तरह शब्द अवाचक है उस स्थल में भी शब्द को वाचक स्वीकार करता है। अन्यथा शब्द द्वारा प्रतिपादन कैसे करता है। ऐसा हुआ तब अवाचक शब्द है ऐसा कहते हुए को अभ्युपगमान्तर है यह स्पष्ट है। एव इदमहं जानामि, इस स्थल में प्रत्यक्ष विषयीभूत पदार्थ का इदं शब्द से निर्देश करता है (इदं शब्द प्रत्यक्ष विषय में शक्त है) और न जानामि इस प्रकार से ज्ञान का अपह्नव करता है। इसी प्रकार से ज्ञान अविषय है ऐसा बोलने वाले को इस वाक्य से जायमान भी ज्ञान ज्ञानाविषयत्व को विषय नहीं करेगा। अतः गले पादुका न्याय से ज्ञान में सविषयत्व का स्वीकार करना चाहिये। ऐसा हुआ तब ज्ञान में अविषयत्वाभ्युपगम विरुद्ध है।

एवञ्च ज्ञानस्याविषयत्वाभ्युपगमो विरुद्धः। यत्तु घटो नास्तीत्यादौ घटोस्तीत्यस्य घटसत्त्वविधायकतया नञश्च घटासत्त्वविधायकतयात्रापि प्रतिज्ञाविरोधः स्यादिति खण्डनम्। तदव्युत्पत्तिवजृम्भितम्। घटेन नञो नञा चास्त्यन्वयस्य सार्वलौकिकत्वात्। ननु घटनञोः कथमन्वयः उभयोरतादात्म्यात् नापि घटस्य नञर्थे प्रतियोगितयान्वयः घट इति प्रथमान्तात्सम्ब-

---

प्रश्न–"घटोनास्ति" घट नहीं है, इत्यादि स्थल में "घटोस्तीत्यस्य" घट है यह वाक्य घट की सत्ता का विधान करता है, नञ् पद जो है सो घट का असत्व विधायक है। इसलिये घटो न--में भी प्रतिज्ञा विरोध दोष होता है, ऐसा खण्डनकार का कथन है।

उत्तर–यह केवल खंडनकार का अबोध मात्र है। क्योंकि घटो नास्ति इस स्थल में घट को नञ् से साम्य है और नञ् का अस्ति इस क्रिया के साथ अन्वय होता है सो सर्वलोकानुभव सिद्ध है। इस स्थिति में सर्वलोकानुभव समर्थित वस्तु में विशेष प्रदर्शन अज्ञान प्रयुक्त न कहा जाय तो क्या कहा जाय ?

प्रश्न–घट और नञ् का अन्वय कैसे होगा ? क्योंकि घट है भाव रूप और नञ् है अभावात्मक तब दोनों में तादात्म्य कैसे होगा ? भावाभाव का तादात्म्य सर्वथा विरुद्ध है। न वा प्रतियोगिता सम्बन्ध से घट का अन्वय

न्धितया तस्योपस्थित्यसम्भवात् तत्सम्भवे वा घटस्य नेत्यनेन घटसम्बन्धिकः कश्चिन्निषेद्धव्यो न घट एवेति । मैवम् । घटो नेति शब्दाद्घटनिषेधस्तावत्प्रतीयत इति सार्वलौकिं ईदृशञ्च प्रत्ययमपन्हुवानो माध्यमिकवदुपेक्षणीयः स्यात् । ननु प्रतीम एवं किं ततः । शब्दादीदृशः प्रत्ययः कथं स्यादिति पृच्छाम इति चेदनुभवं पृच्छ । अनुभवः कूटसाक्षीति चेत् । आत्मानमुपाल-

---

नञर्थ अभाव में हो सकता है । क्योंकि प्रथमान्त घट पद से सम्बन्धित या घटोपस्थिति असम्भव हैं । यदि सम्भव हो तब तो "घटस्य न" इस वाक्य से घट का सबन्धो कोई पदार्थ निषेध का विषय होगा । घट निषिद्धमान नहीं होगा ।

उत्तर–घटो न, घट नहीं है, इस शब्द से घट का निषेध अर्थात् घटनिष्ठ प्रतियोगिताक अभाव प्रतीयमान होता है, यह सर्वलोक प्रसिद्ध वस्तु है । एतादृश सर्वलोकानुमत ज्ञान का निराकरण करने वाले आप माध्यमिक का तरह उपेक्षणीय हो जायेंगे ।

प्रश्न–ऐसा तो मैं जानता हूँ । तब शब्द द्वारा एतादृश ज्ञान कैसे होता है ? यह पूछता हूँ ।

उत्तर–यह बात अनुभव से पूछो ! अनुभव तो कूट साक्षी है । अर्थात् अनुभव भ्रम प्रमा साधारण होने से अप्रामाणिक है । तो अनो आपत्मा को उपालम्भ दो,

भस्व येन तादृशमेव कूटमनुभवं पुष्यसि । अपसिद्धान्ते शास्त्रकाराभ्युपगमेनात्र तु स्वाभ्युपगमेन सह स्वाभ्युपगमान्तरस्य विरोध इत्यपसिद्धान्तादस्य भेदः । नित्यः शब्दः कृतकत्वादित्यादौ प्रतिज्ञाविरोधवत् विरुद्धहेत्वाभासत्वेपि प्रतिज्ञाविरोध एव निग्रहाय साध्याभावहेत्वोर्व्याप्त्युपजीवनेन प्रवर्तिष्णुं हेत्वाभासमपेक्ष्याभ्युपगमविरोधमात्रोपजीवनमात्रप्रवृत्ततयास्य द्रागेव सम्भृतसामग्रीकत्वादिति सह प्रतीतावप्रतीतौ च न विरोध इति

जिससे कि तादृश कूटानुभव की पुष्टि करते हो । अपसिद्धान्त में तो शास्त्रकार के अभ्युपगम से अभ्युपगमान्तर में विरोध होता है और यहाँ तो स्वाभ्युपगम के साथ स्वकीय अभ्युगमांतर का विराध होता है, इसलिये अपसिद्धान्त से प्रतिज्ञा विरोधादिक का भेद होता है कृतक होने से शब्द नित्य है, इत्यादि स्थल में प्रतिज्ञा विरोध के समान विरुद्ध हेत्वाभास में भी निग्रह के लिये प्रतिज्ञा विरोध को ही मान लीजिये । साध्याभाव और हेतु को जो व्याप्ति उसको उपजीवन करके प्रवर्तनशील जो हेत्वाभास तदपेक्षया अभ्युपगम विरोध मात्र का उपजीवन मात्र के प्रवृत्त होने से इस प्रतिज्ञा विरोध को झटित सामग्री विशिष्टत्व है, इसलिये सह प्रतीति अथवा अप्रतीति में विरोध नहीं है । इस प्रकारसे खण्डन करने पर आपके मत में भी समान रूप से विरोध है । ऐसे नैयायिक के बचन में प्रतिवन्दी

खण्डने तवापि विरोधमन्तः समानमिदमिति नैयायिकवचसि प्रतिबन्दिखण्डनं तद्यथा प्रतिबन्दी तावद्दूषणप्रतिबन्दी वा समाधिप्रतिबन्दी वा नाद्यः अप्रस्तुतत्वात् स्वपक्षे दोषे परेण देशिते तत्पक्षदोषोदीरणं न क्वापि घटते किञ्च परदत्तस्य दोषस्यानुद्धरणात् एकनिग्रहान्तत्वात्तस्याः । नापरः यः प्रतिबन्द्या द्योत्यते स एव तर्हि समाधिरभिधीयतां किमनया कुसृष्ट्या किञ्चावयोर्भिन्नमताश्रितयोः समानः समाधिरिति न नियमः एकस्मिन्मते यः समाधिस्तस्य परमते विमतेरपि सम्भवात् किञ्च परोद्भावितं दोषज्ञानाद-

---

खण्डन होता है, जैसे यह प्रतिबन्द है सो दोष का प्रतिबन्दी है अथवा समाधान में प्रतिबन्दी है ? इसमें प्रथम पक्ष ठीक नहीं है क्योंकि यहां दोष तो प्रस्तुत है ही नहीं । स्वपक्ष में अन्य किसी ने दोष दिया तो उसके पक्ष का दोष कथन तो कहीं भी नहीं घटता है । और भी देखिये, परप्रदत्त दोष का उद्धार नहीं । और प्रतिबन्दी का अन्त तो एक निग्रह से हो हो गया । द्वितीय पक्ष भी ठीक नहीं है, क्योंकि जो प्रतिबन्दी द्वारा द्योतित होता है उसी को समाधान रूप में कहो इस कुसृष्टि से क्या फल मिलता है ।

और भी देखिये हम दोनों आदमी भिन्न मत के अनुयायी हैं तब दोनों का समान ही उत्तर होगा, ऐसा नियम नहीं है । हो सकता हैं कि एक का जो उत्तर हो उसमें दूसरे को विवाद हो । और भी देखिये–पर से उद्भावित

पोद्यत इति । अविनिगमस्तु युगपदुपस्थितयोः प्रमाणाभावादन्यतराभावः अत्र च प्रमाणाभाव एव दोषो न त्वविनिगमः लाघवगौरवे तु प्रमाणस्य लघुगुरुविषयत्वसम्भवे लघुपरिच्छेदकत्वं गुर्वपरिच्छेदकत्वञ्च स्वभावभेदौ प्रमाणसहकारितामात्रेण तु तर्कव्यपदेशः प्रतिबन्दिस्त्वापाततोऽर्थान्तरं तथाहि यदि क्षितौ कर्ता स्यात् शशे शृङ्गमपि स्यात् शशशृङ्गवदसावपि प्रमाण-

---

